# Ribhu Gita from Shiva Rahasya

# શ્રીશિવરહસ્યાન્તર્ગતે ઋભુગીતા

## Document Information

```
Text title : Ribhugita from Shivarahasya (Amsha 6)
File name : RGall.itx
Category : gItA, giitaa, shivarahasya, shiva
Location : doc_giitaa
Transliterated by : Anil Sharma anilandvijaya at gmail.com
Proofread by : Anil Sharma, Sunder Hattangadi, Ruma Dewan
Description-comments : shivarahasyAntargatam Amsha 6, Adhyayas 1-50
Latest update : August 6, 2023
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 6, 2023

*sanskritdocuments.org*

# શ્રીશિવરહસ્યાન્તર્ગતે ઋભુગીતા

## અનુક્રમણિકા


૧. ઋભુસ્તુતિર્નામ પ્રથમોઽધ્યાયઃ ।

૨. શિવેન ઋભું પ્રતિ સૂત્રોપદેશો નામ દ્વિતીયોઽધ્યાયઃ ।

3. શિવઋભુસંવાદો નામ તૃતીયોઽધ્યાયઃ ।

૪. ઋભુનિદાઘસંવાદો નામ ચતુર્થોઽધ્યાયઃ ।

૫. શિવેન કુમારોપદેશવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ।

૬. પ્રપઞ્ચસ્ય સચ્ચિન્મયત્વકથનં નામ ષષ્ઠોઽધ્યાયઃ ।

૭. સ્વાત્મનિરૂપણં નામ સપ્તમોઽધ્યાયઃ ।

૮. પ્રપઞ્ચશૂન્યત્વ-સર્વનાસ્તિત્વનિરૂપણં નામ અષ્ટમોઽધ્યાયઃ ।

૯. અહમ્બ્રહ્માસ્મિપ્રકરણનિરૂપણં નામ નવમોઽધ્યાયઃ ।

૧૦. બ્રહ્મતર્પણાત્મહોમાખ્ય પ્રકરણદ્વયવર્ણનં નામ દશમોઽધ્યાયઃ ।

૧૧. જીવન્મુક્તપ્રકરણં નામ એકાદશોઽધ્યાયઃ ।

૧૨. દેહમુક્તિપ્રકરણવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ।

૧૩. સર્વમાત્મપ્રકરણં નામ ત્રયોદશોઽધ્યાયઃ ।

૧૪. આત્માનન્દપ્રકરણવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ।

૧૫. બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ ।

૧૬. ચિદેવત્વમ્પ્રકરણવર્ણનં નામ ષોડશોઽધ્યાયઃ ।

૧૭. સર્વસિદ્ધાન્તસઙ્ગ્રહપ્રકરણં નામ સપ્તદશોઽધ્યાયઃ ।

૧૮. ઋભુનિદાઘસંવાદો નામ અષ્ટદશોધ્યાયઃ ।

૧૯. બ્રહ્માનન્દપ્રકરણં નામ એકોનવિંશોઽધ્યાયઃ ।

૨૦. આત્મવૈભવપ્રકરણં નામ વિંશોઽધ્યાયઃ ।

૨૧. સર્વપ્રપઞ્ચહેયત્વપ્રકરણવર્ણનં નામ એકવિંશોઽધ્યાયઃ ।

૨૨. નામરૂપનિષેધપ્રકરણં નામ દ્વાવિંશોઽધ્યાયઃ ।

૨૩. રહસ્યોપદેશપ્રકરણં નામ ત્રયોવિંશોઽધ્યાયઃ ।

૨૪. અહં બ્રહ્મપ્રકરણનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ ।

૨૫. બ્રહ્મણસ્સર્વરૂપત્વનિરૂપણપ્રકરણં નામ પઞ્ચવિંશોઽધ્યાયઃ ।
૨૬. જ્ઞાનામૃતમનોમયપ્રકરણવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ।
૨૭. આનન્દરૂપત્વનિરૂપણપ્રકરણં નામ સપ્તવિંશોઽધ્યાયઃ ।
૨૮. આત્મવૈલક્ષણ્યપ્રકરણં નામ અષ્ટાવિંશોઽધ્યાયઃ ।
૨૯. તન્મયભાવોપદેશપ્રકરણં નામ એકોનત્રિંશોઽધ્યાયઃ ।
૩૦. બ્રહ્મૈકરૂપત્વનિરૂપણપ્રકરણં નામ ત્રિંશોઽધ્યાયઃ ।
૩૧. મહાવાક્યાર્થનિરૂપણપ્રકરણં નામ એકત્રિંશોઽધ્યાયઃ ।
૩૨. સર્વમિથ્યાત્વનિરૂપણપ્રકરણં નામ દ્વાત્રિંશોઽધ્યાયઃ ।
૩૩. સચ્ચિદાનન્દરૂપતાપ્રકરણં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ।
૩૪. દૃષ્ટાન્તૈર્બ્રહ્મસાધનપ્રકરણં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ।
૩૫. બ્રહ્મભાવનોપદેશપ્રકરણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ।
૩૬. બ્રહ્મભાવનોપદેશપ્રકરણં નામ ષટ્ત્રિંશોઽધ્યાયઃ ।
૩૭. સર્વસિદ્ધાન્તપ્રકરણં નામ સપ્તત્રિંશોઽધ્યાયઃ ।
૩૮. પ્રપઞ્ચશૂન્યત્વપ્રકરણં નામ અષ્ટત્રિંશોઽધ્યાયઃ ।
૩૯. સર્વલયપ્રકરણં નામ એકોનચત્વારિંશોઽધ્યાયઃ ।
૪૦. ચિત્તવૃત્તિનિરોધપ્રકરણં નામ ચત્વારિંશોઽધ્યાયઃ ।
૪૧. ગ્રન્થપ્રશસ્તિનિરૂપણં નામ એકચત્વારિંશોઽધ્યાયઃ ।
૪૨. નિદાઘાનુભવવર્ણનપ્રકરણં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ।
૪૩. નિદાઘાનુભવવર્ણનપ્રકરણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ।
૪૪. નિદાઘાનુભવવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ।
૪૫. નિદાઘકૃતગુરુસ્તુતિવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ।
૪૬. જ્ઞાનોપાયભૂતશિવવ્રતનિરૂપણં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ।
૪૭. ઋભુકૃતસઙ્ગ્રહોપદેશવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ।
૪૮. સ્કન્દકૃતશિવવ્રતોપદેશવર્ણનં નામ અષ્ટચત્વારિંશોઽધ્યાયઃ ।
૪૯. શિવસ્ય જ્ઞાનદાતૃત્વનિરૂપણં નામ એકોનપઞ્ચાશોઽધ્યાયઃ ।
૫૦. સુદર્શનસ્ય મુક્તિલાભવર્ણનં અંશશ્રવણફલનિરૂપણં
ચ નામ પઞ્ચાશોઽધ્યાયઃ ।

## ૧. ઋભુસ્તુતિર્નામ પ્રથમોઽધ્યાયઃ

હેમાદ્રિં કિલ માતુલુઙ્ગફલમિત્યાદાય મોદાધિકો
મૌઢ્યાન્નાકનિવાસિનાં ભયપરૈર્વાક્યૈરિવ પ્રાર્થિતઃ ।

નીલીશમ્બરનીલમમ્બરતલં જમ્બૂફલં ભાવયન્-
તં મુઞ્ચન્ગિરિમમ્બરં પરિમૃશલ્ઁલમ્બોદરઃ પાતુ મામ્ ॥ ૧.૧॥

વામં યસ્ય વપુઃ સમસ્તજગતાં માતા પિતા ચેતરત્
યત્પાદામ્બુજનૂપુરોદ્ભવરવઃ શબ્દાર્થવાક્યાસ્પદમ્ ।
યન્નેત્રત્રિતયં સમસ્તજગતામાલોકહેતુઃ સદા
પાયાદ્દૈવતસાર્વભૌમગિરિજાલઙ્કારમૂર્તિઃ શિવઃ ॥ ૧.૨॥

સૂતઃ -
જૈગીષવ્યઃ પુનર્નત્વા ષણ્મુખં શિવસમ્ભવમ્ ।
પપ્રચ્છ હૃષ્ટસ્તં તત્ર મુનિભિર્ગણપુઙ્ગવૈઃ ॥ ૧.૩॥

જૈગીષવ્યઃ -
કરુણાકર સર્વજ્ઞ શરણાગતપાલક ।
અરુણાધિપનેત્રાબ્જચરણસ્મરણોન્મુખ ॥ ૧.૪॥

કરુણાવરુણામ્ભોધે તરણિદ્યુતિભાસ્કર ।
દિવ્યદ્વાદશલિઙ્ગાનાં મહિમા સંશ્રુતો મયા ॥ ૧.૫॥

ત્વત્તોઽન્યત્શ્રોતુમિચ્છામિ શિવાખ્યાનમનુત્તમમ્ ।
ત્વદ્વાક્યકઞ્જપીયૂષધારાભિઃ પાવયાશુ મામ્ ॥ ૧.૬॥

સૂતઃ -
ઇતિ તસ્ય ગિરા તુષ્ટઃ ષણ્મુખઃ પ્રાહ તં મુનિમ્ ॥ ૧.૭॥

શ્રીષણ્મુખઃ -
શ઼ૃણુ ત્વમગજાકાન્તેનોક્તં જ્ઞાનમહાર્ણવમ્ ।
ઋભવે યત્પુરા પ્રાહ કૈલાસે શઙ્કરઃ સ્વયમ્ ॥ ૧.૮॥

બ્રહ્મસૂનુઃ પુરા વિપ્રો ગત્વા નત્વા મહેશ્વરમ્ ।
ઋભુર્વિભું તદા શમ્ભું તુષ્ટાવ પ્રણતો મુદા ॥ ૧.૯॥

ઋભુઃ -
દિવામણિનિશાપતિસ્ફુટકૃપીટયોનિસ્ફુર-
લ્લલાટભસિતોલ્લસદ્વરત્રિપુણ્ડ્રભાગોજ્વલમ્ ।
ભજામિ ભુજગાઙ્ગદં વિધૃતસામિસોમપ્રભા-
વિરાજિતકપર્દકં કરટિકૃત્તિભૂષ્યત્કટિમ્ ॥ ૧.૧૦॥

ભાલાક્ષાધ્વરદક્ષશિક્ષકવલક્ષોક્ષેશવાહોત્તમ-

ત્ર્યક્ષાક્ષય્ય ફલપ્રદાવભસિતાલઙ્કારરુદ્રાક્ષધૃક્ ।
ચક્ષુઃશ્રોત્રવરાઙ્ગહારસુમહાવક્ષઃસ્થલાધ્યક્ષ માં
ભક્ષ્યીભૂતગરપ્રભક્ષ ભગવન્ભિક્ષ્વર્ચ્યપાદામ્બુજ ॥ ૧.૧૧॥

ગઙ્ગાચન્દ્રકલાલલામ ભગવન્ ભૂભૃત્કુમારીસખ
સ્વામિંસ્તે પદપદ્મભાવમતુલં કષ્ટાપહં દેહિ મે ।
તુષ્ટોઽહં શિપિવિષ્ટહૃષ્ટમનસા ભ્રષ્ટાન્ન મન્યે હરિ-
બ્રહ્મેન્દ્રાનમરાન્ત્રિવિષ્ટપગતાન્નિષ્ઠાહિ મે તાદૃશી ॥ ૧.૧૨॥

નૃત્તાડમ્બરસજ્જટાપટલિકાભ્રામ્યન્મહોડુચ્છટા
ત્રુટ્યત્સોમકલાલલામકલિકાશમ્યાકમૌલીનતમ્ ।
ઉગ્રાનુગ્રભવોગ્રદુર્ગજગદુદ્ધારાગ્રપાદામ્બુજં
રક્ષોવક્ષકુઠારભૂતમુમયા વીક્ષે સુકામપ્રદમ્ ॥ ૧.૧૩॥

ભાલં મે ભસિતત્રિપુણ્ડ્રરચિતં ત્વત્પાદપદ્માનતં
પાહીશાન દયાનિધાન ભગવન્ભાલાનલાક્ષ પ્રભો ।
કણ્ઠો મે શિતિકણ્ઠનામ ભવતો રુદ્રાક્ષધૃક્પાહિ માં
કર્ણૌ મે ભુજગાધિપોરુસુમહાકર્ણ પ્રભો પાહિ મામ્ ॥ ૧.૧૪॥

નિત્યં શઙ્કરનામબોધિતકથાસારાદરં શઙ્કરં
વાચં રુદ્રજપાદરાં સુમહતીં પઞ્ચાક્ષરીમિન્દુધૃક્ ।
બાહૂ મે શશિભૂષણોત્તમમહાલિઙ્ગાર્ચનાયોદ્યતૌ
પાહિ પ્રેમરસાર્દ્રયાઽદ્ય સુદૃશા શમ્ભો હિરણ્યપ્રભ ॥ ૧.૧૫॥

ભાસ્વદ્બાહુચતુષ્ટયોજ્જ્વલ સદા નેત્રે ત્રિનેત્રે પ્રભો
ત્વલ્લિઙ્ગોત્તમદર્શનેન સુતરાં તૃપ્તૈઃ સદા પાહિ મે ।
પાદૌ મે હરિનેત્રપૂજિતપદદ્વન્દ્વાવ નિત્યં પ્રભો
ત્વલ્લિઙ્ગાલયપ્રક્રમપ્રણતિભિર્માન્યૌ ચ ધન્યૌ વિભો ॥ ૧.૧૬॥

ધન્યસ્ત્વલ્લિઙ્ગસઙ્ગેપ્યનુદિનગલિતાનઙ્ગસઙ્ગાન્તરઙ્ગઃ
પુંસામર્થૈકશક્ત્યા યમનિયમવરૈર્વિશ્વવન્દ્ય પ્રભો યઃ ।
દત્વા બિલ્વદલં સદમ્બુજવરં કિઞ્ચિજ્જલં વા મુહુઃ
પ્રાપ્નોતીશ્વરપાદપઙ્કજમુમાનાથાદ્ય મુક્તિપ્રદમ્ ॥ ૧.૧૭॥

ઉમારમણ શઙ્કર ત્રિદશવન્દ્ય વેદેડ્ય હૃ-
ત્ત્વદીયપરભાવતો મમ સદૈવ નિર્વાણકૃત્ ।
ભવાર્ણવનિવાસિનાં કિમુ ભવત્પદામ્ભોરુહ-

પ્રભાવભજનાદરં ભવતિ માનસં મુક્તિદમ્ ॥ ૧.૧૮॥

સંસારાર્ગલપાદબદ્ધજનતાસમ્મોચનં ભર્ગ તે
પાદદ્વન્દ્વમુમાસનાથ ભજતાં સંસારસમ્ભર્જકમ્ ।
ત્વન્નામોત્તમગર્જનાદઘકુલં સન્તર્જિતં વૈ ભવે-
દ્દુઃખાનાં પરિમાર્જકં તવ કૃપાવીક્ષાવતાં જાયતે ॥ ૧.૧૯॥

વિધિમુણ્ડકરોત્તમોરુમેરુકોદણ્ડખણ્ડિતપુરાણ્ડજવાહબાણ ।
પાહિ ક્ષમારથવિકર્ષસુવેદવાજિહેષાન્તહર્ષિતપદામ્બુજ વિશ્વનાથ ॥ ૧.૨૦॥

વિભૂતીનામન્તો ન હિ ખલુ ભવાનીરમણ તે
ભવે ભાવં કશ્ચિત્ ત્વયિ ભવહ ભાગ્યેન લભતે ।
અભાવં ચાજ્ઞાનં ભવતિ જનનાદ્યૈશ્ચ રહિતઃ
ઉમાકાન્ત સ્વાન્તે ભવદભયપાદં કલયતઃ ॥ ૧.૨૧॥

વરં શમ્ભો ભાવૈર્ભજનભાવેન નિતરાં (ભાવૈર્ભવભજનભાવેન)
ભવામ્ભોધિર્નિત્યં ભવતિ વિતતઃ પાંસુબહુલઃ ।
વિમુક્તિં ભુક્તિં ચ શ્રુતિકથિતભસ્માક્ષવરધૃ-
ગ્ભવે ભર્તુઃ સર્વો ભવતિ ચ સદાનન્દમધુરઃ ॥ ૧.૨૨॥

સોમસામજસુકૃત્તિમૌલિધૃક્ સામસીમશિરસિ સ્તુતપાદ ।
સામિકાયગિરિજેશ્વર શમ્ભો પાહિ મામખિલદુઃખસમૂહાત્ ॥ ૧.૨૩॥

ભસ્માઙ્ગરાગ ભુજગાઙ્ગ મહોક્ષસઙ્ગ
ગઙ્ગામ્બુસઙ્ગ સુજટા નિટિલ સ્ફુલિઙ્ગ ।
લિઙ્ગાઙ્ગ ભઙ્ગિતમનઙ્ગ વિહઙ્ગવાહ-
સમ્પૂજ્યપાદ સદસઙ્ગ જનાન્તરઙ્ગ ॥ ૧.૨૪॥

વાત્સલ્યં મયિ તાદૃશં તવનચેચ્ચન્દ્રાર્ધ ચૂડામણે
ધિક્કૃત્યાપિ વિમુચ્ય વા ત્વયિ યતો ધન્યો ધરણ્યામહમ્ ।
સક્ષારં લવણાર્ણવસ્ય સલિલં ધારા ધરેણ ક્ષણા-
દાદાયોજ્ઝિતમાક્ષિતૌ હિ જગતાં આસ્વાદનીયાં દૃશામ્ ॥ ૧.૨૫॥

ત્વત્કૈલાસવરે વિશોકહૃદયાઃ ક્રોધોજ્ઝિતાશ્ચાણ્ડજાઃ
તસ્માન્મામપિ ભેદબુદ્ધિરહિતં કુર્વીશ તેઽનુગ્રહાત્ ।
ત્વદ્વક્ત્રામલ નિર્જરોજ્ઝિત મહાસંસાર સન્તાપહં
વિજ્ઞાનં કરુણાઽદિશાદ્ય ભગવન્ લોકાવનાય પ્રભો ॥ ૧.૨૬॥

સારઙ્ગી સિંહશાબં સ્પૃશતિ સુતધિયા નન્દિની વ્યાઘ્રપોતં
    માર્જારી હંસબાલં પ્રણયપરવશા કેકિકાન્તા ભુજઙ્ગમ્ ।
વૈરાણ્યાજન્મજાતાન્યપિ ગલિતમદા જન્તવોઽન્યે ત્યજન્તિ
    ભક્તાસ્ત્વત્પાદપદ્મે કિમુ ભજનવતઃ સર્વસિદ્ધિં લભન્તે ॥ ૧.૨૭॥

સ્કન્દઃ -
ઇત્થં ઋભુસ્તુતિમુમાવરજાનિરીશઃ
    શ્રુત્વા તમાહ ગણનાથવરો મહેશઃ ।
જ્ઞાનં ભવામયવિનાશકરં તદેવ તસ્મૈ તદેવ
    કથયે શ‍ૃણુ પાશમુક્ત્યૈ ॥ ૧.૨૮॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુસ્તુતિર્નામ
    પ્રથમોઽધ્યાયઃ ॥

## ૨. શિવેન ઋભું પ્રતિ સૂત્રોપદેશો નામ દ્વિતીયોઽધ્યાયઃ

ઈશ્વરઃ -
શ‍ૃણુ પદ્મજસમ્ભૂત મત્તઃ સૂત્રવિધિક્રમમ્ ।
જ્ઞાનોત્પાદકહેતૂનિ શ્રુતિસારાણિ તત્ત્વતઃ ॥ ૨.૧॥

વ્યાસા મન્વન્તરેષુ પ્રતિયુગજનિતાઃ શામ્ભવજ્ઞાનસિદ્ધ્યૈ
    ભસ્માભ્યક્તસમસ્તગાત્રનિવહા રુદ્રાક્ષમાલાધરાઃ ।
કૈલાસં સમવાપ્ય શઙ્કરપદધ્યાનેન સૂત્રાણ્યુમા-
    કાન્તાત્પ્રાપ્ય વિતન્વતે સ્વકધિયા પ્રામાણ્યવાદાનહો ॥ ૨.૨॥

જિજ્ઞાસ્યં બ્રહ્મ એવેત્યથપદવિદિતૈઃ સાધનપ્રાપ્ત્યુપાયૈ-
    ર્યોગૈર્યોગાદ્યુપાયૈર્યમનિયમમહાસાઙ્ખ્યવેદાન્તવાક્યૈઃ ।
શ્રોતવ્યો ભગવાન્ન રૂપગુણતો મન્તવ્ય ઇત્યાહ હિ
    વેદોદ્બોધદવાક્યહેતુકરણૈર્ધ્યેયઃ સ સાક્ષાત્કૃતઃ ॥ ૨.૩॥

જન્માદ્યસ્ય યતોઽસ્ય ચિત્રજગતો મિથ્યૈવ તત્કારણં
    બ્રહ્મ બ્રહ્માત્મનૈવ પ્રકૃતિપરમદો વર્તમાનં વિવર્તત્ ।
શ્રુત્યા યુક્ત્યા યતો વા ઇતિપદઘટિતો બોધતો વક્તિ શમ્ભું
    નાણુઃ કાલવિપાકકર્મજનિતેત્યાચોદના વૈ મૃષા ॥ ૨.૪॥

યોનિઃ શાસ્ત્રસ્ય વેદસ્તદુભયમનનાદ્બ્રહ્મણઃ પ્રત્યભિજ્ઞા

નિઃશ્વાસાદ્વેદજાલં શિવવરવદનાદ્વેધસા પ્રાપ્તમેતત્ ।
તસ્માત્તર્કવિતર્કકર્કશધિયા નાતિક્રમેત્તાં ધિયં
સ્વામ્નાયક્રિયયા તદપ્રકરણે યોનિર્મહેશો ધ્રુવમ્ ॥ ૨.૫॥

તત્ત્વસ્યાપિ સમન્વયાત્શ્રુતિગિરાં વિશ્વેશ્વરે ચોદના
સા ચાનિર્વચનીયતામુપગતા વાચો નિવૃત્તા ઇતિ ।
આત્મૈવૈષ ઇતીવ વાક્યસુવૃતિર્વૃત્તિં વિધત્તે ધિયા
વેદાન્તાદિષુ એક એવ ભગવાનુક્તો મહેશો ધ્રુવમ્ ॥ ૨.૬॥

નાસદ્વા વીક્ષતે યજ્જડમિતિ કરણૈર્ગન્ધરૂપાદિહીનં
શબ્દસ્પર્શાદિહીનં જગદનુગતમપિ તદ્બ્રહ્મ કિંરૂપમીષ્ટે ।
ગૌણં ચેદપિ શબ્દતો જગદિદં યન્નામરૂપાત્મકં
તચ્ચાત્રાવિશદીશ્વરોઽર્થવચસા મોક્ષસ્ય નિષ્ઠાક્રમઃ ॥ ૨.૭॥

હેયત્વાવચનાચ્ચ તચ્છ્રુતિગિરાં સ્થૂલં પ્રદૃષ્ટં ભવે-
દ્રૂપં નારૂપતોઽપિ પ્રકરણવચનં વા વિકારઃ કિલેદમ્ ।
સ્વાપ્યાયાદપિ તદ્વદાપિ પરમાનન્દો યદીત્થં પરઃ
સામાન્યાચ્ચ ગતેરથાપ્યનુભવે વિદ્યોતતે શઙ્કરઃ ॥ ૨.૮॥

શ્રુતત્વાદ્વેદાન્તપ્રતિપદવચઃ કારણમુમા-
સનાથો નાથાનાં સ ચ કિલ ન કશ્ચિજ્જનિભવઃ ।
સ એવાનન્દાત્મા શ્રુતિકથિતકોશાદિરહિતો
વિકારપ્રાચુર્યાન્ન હિ ભવતિ કાર્યં ચ કરણમ્ ॥ ૨.૯॥

તદ્ધેતુવ્યપદેશતોઽપિ શિવ એવેતિ ચાનન્દકૃ-
ન્મન્ત્રૈર્વર્ણકૃતક્રમેણ ભગવાન્સત્યાદ્યનન્તોચ્યતે ।
નૈરન્તર્યાનુપપત્તિતોઽપિ સુખિતા ચાનન્દભેદોઽર્થતઃ
કામાચ્ચાનનુભાવતો હૃદિ ભિદા જાયેદ્ભયં સંસૃતેઃ ॥ ૨.૧૦॥

પુચ્છં બ્રહ્મ પ્રતિષ્ઠિતેતિ વચનાચ્છેષી મહેશોઽવ્યયઃ ।
આકાશાન્તરતોઽપિ ભૌતિકહૃદાકાશાત્મતા વાક્યતો
બ્રહ્મૈવ પ્રતિભાતિ ભેદકલને ચાકલ્પના કલ્પતઃ (નલ્પતઃ) ॥ ૨.૧૧॥

સુષુપ્ત્યુત્ક્રાન્ત્યોર્વા ન હિ ખલુ ન ભેદઃ પરશિવે
અતોત્થાનં દ્વૈતે ન ભવતિ પરે વૈ વિલયને ।
તદર્હં યત્સૂક્ષ્મં જગદિદમનાકારમરસં
ન ગન્ધં ન સ્પર્શં ભવતિ પરમેશે વિલસિતમ્ ॥ ૨.૧૨॥

અધીનઞ્ચાર્થં તદ્ભવતિ પુનરેવેક્ષણપરં
    સ્વતન્ત્રેચ્છા શમ્ભોર્ન ખલુ કરણં કાર્યમપિ ન ॥ ૨.૧૩॥

જ્ઞેયત્વાવચનાચ્ચ શઙ્કર પરાનન્દે પ્રમોદાસ્પદે
    પ્રજ્ઞાનં ન હિ કારણં પ્રકૃતિકં પ્રશ્નત્રયસ્યાર્થવત્ ।
ન વિજ્ઞેયં દેહપ્રવિલયશતોત્થાનગણના
    સ મૃત્યોર્મૃત્યુસ્તદ્ભવતિ કિલ ભેદેન જગતઃ ॥ ૨.૧૪॥

મહદ્બ્રચ્ચાણીયો ભવતિ ચ સમો લોકસદૃશા
    તથા જ્યોતિસ્ત્વેકં પ્રકરણપરં કલ્પિતવતઃ ।
ન સઙ્ખ્યાભેદેન ત્રિભુવનવિભવાદતિકરં
    સ્વભાવોઽયં શશ્વન્મુખરયતિ મોદાય જગતામ્ ॥ ૨.૧૫॥

પ્રાણાદુદ્ગતપઞ્ચસઙ્ખ્યજનિતા તદ્વસ્ત્રિવચ્ચ શ્રુતં
    તચ્છ્રોત્રં મનસો ન સિદ્ધપરમાનન્દૈકજન્યં મહઃ ।
જ્યોતિષ્કારણદર્શિતે ચ કરણે સત્તા સદિત્યન્વહં
    ચાકર્ષા ભવતિ પ્રકર્ષજનિતે ત્વત્તીતિ વાક્યોત્તરમ્ ॥ ૨.૧૬॥

જાગ્રત્ત્વાવચનેન જીવજગતોર્ભેદઃ કથં કથ્યતે
    લિઙ્ગં પ્રાણગતં ન ચેશ્વરપરં જ્યોતિઃ કિલૈક્યપ્રદમ્ ।
અન્યાર્થત્વવિવેકતોઽર્થગતિકં ચાકલ્પયદ્વાક્યતઃ ।
    પ્રજ્ઞામિત્યપરઃ ક્રમસ્થિતિરસાવન્યો વદન્તં મૃષા ॥ ૨.૧૭॥

પ્રકૃત્યૈવં સિદ્ધં ભવતિ પરમાનન્દવિધુર-
    મભિધ્યોપાદેશાદ્ભવતિ ઉભયામ્નાયવચનૈઃ ।
ભવત્યાત્મા કર્તા કૃતિવિરહિતો યોનિરપિ ચ
    પ્રતિષ્ઠા નિષ્ઠા ચ ત્રિભુવનગુરુઃ પ્રેમસદનઃ ॥ ૨.૧૮॥

અભિધ્યોપાદેશાત્સ બહુ ભવદીક્ષાદિવશતઃ
    સમાસા(ભો)ચોભાભ્યાં પ્રકૃતિજસમામ્નાયવચનાત્ ।
અતો હ્યાત્મા શુદ્ધઃ પ્રકૃતિપરિણામેન જગતાં
    મૃદીવ વ્યાપારો ભવતિ પરિણામેષુ ચ શિવઃ ॥ ૨.૧૯॥

આનન્દાભ્યાસયોગાદ્વિકૃતજગદાનન્દજગતો
    અતો હેતોર્ધર્મો ન ભવતિ શિવઃ કારણપરઃ ।
હિરણ્યાત્માઽઽદિત્યેઽક્ષિણિ ઉદેતીહ ભગવા-

ન્નતેશ્વાધારાણાં શ્રવણવચનૈર્ગોપિતધિયઃ ॥ ૨.૨૦॥

ભેદાદિવ્યપદેશતોઽસ્તિ ભગવાનન્યો ભવેત્કિન્તતઃ
આકાશાદિશરીરલિઙ્ગનિયમાદ્વ્યાપ્યં હિ સર્વં તતઃ ।
તજ્જ્યોતિઃ પરમં મહેશ્વરમુમાકાન્તાખ્યશાન્તં મહો
વેદાન્તેષુ નિતાન્તવાક્યકલને છન્દોઽભિધાનાદપિ ॥ ૨.૨૧॥

ભૂતાદિવ્યપદેશતોઽપિ ભગવત્યસ્મિન્મહેશે ધ્રુવં
યસ્માદ્ભૂતવરાણિ જાયત ઇતિ શ્રુત્યાઽસ્ય લેશાંશતઃ ।
વિશ્વં વિશ્વપતેરભૂત્તદુભયં પ્રામાણ્યતો દર્શના-
ત્પ્રાણસ્યાનુગમાત્સ એવ ભગવાન્નાન્યઃ પથા વિદ્યતે ॥ ૨.૨૨॥

ન વક્તુશ્ચાત્મા વૈ સ ખલુ શિવભૂમાદિવિહિતઃ
તથૈવાયુર્દેહે અરનિવહવચ્ચક્રગમહો ।
અદૃશ્યો હ્યાત્મા વૈ સ હિ સુદૃશતઃ શાસ્ત્રનિવહૈઃ
શિવો દેવો વામો મુનિરપિ ચ સાર્વાત્મ્યમભજત્ ॥ ૨.૨૩॥

પ્રસિદ્ધિઃ સર્વત્ર શ્રુતિષુ વિધિવાક્યૈર્ભગવતો
મહાભૂતૈર્જાતં જગદિતિ ચ તજ્જાદિવચનૈઃ ।
અતોઽણીયાઞ્જ્યાયાનપિ દ્વિવિધભેદવ્યપગતા
વિવક્ષા નોઽસ્તીતિ પ્રથયતિ ગુણૈરેવ હિ શિવઃ ॥ ૨.૨૪॥

સમ્ભોગપ્રાપ્તિરેવ પ્રકટજગતઃ કારણતયા
સદા વ્યોમૈવેત્થં ભવતિ હૃદયે સર્વજગતામ્ ।
અતોઽત્તા વૈ શર્વશ્ચરમચરભૂતં જગદિદં
મહામૃત્યુર્દેશો ભવતિ શિખરન્નાદ ઇતિ ચ ॥ ૨.૨૫॥

પ્રકરણવચનેન વેદજાતે ભગવતિ ભવનાશને મહેશે ।
પ્રવિશતિ શિવ એવ ભોગભોક્તૃનિયમનદર્શનતો હિ વાક્યજાતમ્ ॥ ૨.૨૬॥

વિશેષણૈઃ શઙ્કરમેવ નિત્યં દ્વિધા વદત્યેવમુપાધિયોગાત્ ।
અતોઽન્તરા વાક્યપદૈઃ સમર્થિતઃ સ્થાનાદિયોગૈર્ભગવાનુમાપતિઃ ॥ ૨.૨૭॥

સુખાભિધાનાત્સુખમેવ શમ્ભુઃ કં બ્રહ્મ ખં બ્રહ્મ ઇતિ શ્રુતીરિતઃ ।
શ્રુતોપવાક્યોપનિષત્પ્રચોદિતઃ ગતિં પ્રપદ્યેત બુધોઽપિ વિદ્યયા ॥ ૨.૨૮॥

અનવસ્થિતિતોઽપિ નેતરો ભગવાનેવ સ ચક્ષુષિ પ્રબુધ્યેત્ ।
ભયભીતાઃ ખલુ યસ્ય સોમસૂર્યાનલવાય્વમ્બુજસમ્ભવા ભ્રમન્તિ ॥ ૨.૨૯॥

અન્તર્યામિતયૈવ લોકમખિલં જાનાત્યુમાયાઃ પતિઃ ।
ભૂતેષ્વન્તરગોઽપિ ભૂતનિવહા નો જાનતે શઙ્કરમ્ ॥ ૨.૩૦॥

ન તત્સ્મૃત્યા ધર્મૈરભિલષણતો ભેદવિધુરં
ન શારીરં ભેદે (ભેદ) ભવતિ અગજાનાયકવરે ।
અદૃશ્યત્વાદ્ધર્મૈર્ન ખલુ ભગવાનન્યદિતિ ચ
પરાદાદિત્યં ચામતિરપિ ચ ભેદપ્રકલને ॥ ૨.૩૧॥

ભેદાદેશ્ચ વિશેષણં પરશિવે રૂપં ન નામ પ્રભા ।
ભાવો વા ભવતિ પ્રભાવિરહિતં બ્રહ્માત્મના ચાહ તત્ ॥ ૨.૩૨॥

સ્મૃતં માનં શમ્ભૌ ભગવતિ ચ તત્સાધનતયા-
પ્યતો દૈવં ભૂતં ન ભવતિ ચ સાક્ષાત્પરશિવે ।
અભિવ્યક્તી ચાન્યઃ સ્મૃતિમપિ તથાઽન્યોઽપિ મનુતે
તથા સમ્પત્તિર્વૈ ભુવિ ભવતિ કિં શમ્ભુકલને ॥ ૨.૩૩॥

યં મુક્તિવ્યપદેશતઃ શ્રુતિશિખાશાખાશતૈઃ કલ્પિતે
ભિદ્યેદ્ગ્રન્થિરપિ પ્રકીર્ણવચનાત્સાક્ષ્યેવ બાહ્યાન્તરા ।
શબ્દો બ્રહ્મતયૈવ ન પ્રભવતે પ્રાણપ્રભેદેન ચ
તચ્ચાપ્યુત્ક્રમણસ્થિતિશ્ચ વિલયે
ભુઙ્ક્તેઽપ્યસૌ (ભુઙ્ક્ત્યેઽપ્યસૌ) શઙ્કરઃ ॥ ૨.૩૪॥

તં ભૂમા સમ્પ્રસાદાચ્છિવમજરમાત્માનમધુના
શ◌ૃણોતીક્ષેદ્વાપિ ક્ષણમપિ તથાન્યં ન મનુતે ।
તથા ધર્માપત્તિર્ભવતિ પરમાકાશજનિતં
પ્રશસ્તં વ્યાવૃત્તં દહરમપિ દધ્યાદ્યપદિશત્ ॥ ૨.૩૫॥

અલિઙ્ગં લિઙ્ગસ્થં વદતિ વિધિવાક્યૈઃ શ્રુતિરિયં
ધૃતેરાકાશાખ્યં મહિમનિ પ્રસિદ્ધેર્વિમૃશતા ।
અતો મર્શાન્નાયં ભવતિ ભવભાવાત્મકતયા
શિવાવિર્ભાવો વા ભવતિ ચ નિરૂપે ગતધિયામ્ ॥ ૨.૩૬॥

પરામર્શે ચાન્યદ્ભવતિ દહરં કિં શ્રુતિવચો
નિરુક્તં ચાલ્પં યત્ત્વનુકૃતિ તદીયેઽક્ષ્ણિ મહસા ।
વિભાતીદં શશ્વત્પ્રમતિવરશબ્દૈઃ શ્રુતિભવૈઃ ॥ ૨.૩૭॥

યો વ્યાપકોઽપિ ભગવાન્પુરુષોઽન્તરાત્મા ।

વાલાગ્રમાત્રહૃદયે કિમુ સન્નિવિષ્ટઃ ॥ ૨.૩૮॥

પ્રત્યક્ષાનુભવપ્રમાણપરમં વાક્યં કિલૈકાર્થદં
    માનેનાપિ ચ સમ્ભવાભ્રમપરો વર્ણં તથૈવાહ હિ ।
શબ્દઞ્ચાપિ તથૈવ નિત્યમપિ તત્સામ્યાનુપત્તિક્રિયા
    મધ્વાદિષ્વનધીકૃતોઽપિ પુરુષો જ્યોતિષ્યભાવો (જ્યોતિષ્ટ્રભાવો)
        ભવેત્ ॥ ૨.૩૯॥

ભાવઞ્ચાપિ શુગસ્ય તચ્છ્રવણતો જાત્યન્તરાસમ્ભવા-
    ત્સંસ્કારાધિકૃતોઽપિ શઙ્કરપદં યે વક્તુકામા (યો વક્તુકામો) મનાક્ ।
જ્યોતિર્દર્શનતઃ પ્રસાદપરમાદસ્માચ્છરીરાત્પર-
    ઞ્જ્યોતિશ્ચાભિનિવિશ્ય વ્યોમ પરમાનન્દમ્પરં વિન્દતિ ॥ ૨.૪૦॥

સ્મૃતીનાં વાદોઽત્ર શ્રુતિવિભવદોષાન્ચવચસા
    સ એવાત્મા દોષૈર્વિગતમતિકાયઃ પરશિવઃ ।
સ વિશ્વં વિશ્વાત્મા ભવતિ સ હિ વિશ્વાધિકતયા
    સમસ્તેષુ પ્રોતો ભવતિ સ હિ કાર્યેષુ કરણમ્ ॥ ૨.૪૧॥

પ્રધાનાનાન્તેષામ્ભવતિ ઇતરેષામનુપમો-
    ઽપ્યલબ્ધોઽપ્યાત્માયં શ્રુતિશિરસિ ચોક્તોઽણુરહિતઃ ।
સ દૃશ્યોઽચિન્ત્યાત્મા ભવતિ વરકાર્યેષુ કરણ-
    મસદ્વા સદ્વા સોઽપ્યસદિતિ ન દૃષ્ટાન્તવશગમ્ ॥ ૨.૪૨॥

અસઙ્ગો લક્ષણ્યઃ સ ભવતિ હિ પઞ્ચસ્વપિ મુધા
    અભીમાનોદ્દેશાદનુગતિરથાક્ષાદિરહિતઃ ।
સ્વપક્ષાદૌ દોષાશ્રુતિરપિ ન ઈષ્ટે પરમતં
    ત્વનિર્મોક્ષો ભૂયાદનુમિતિકુતર્કૈર્ન હિ ભવેત્ ॥ ૨.૪૩॥

ભોક્ત્રાપત્તેરપિ વિષયતો લોકવેદાર્થવાદો
    નૈનં શાસ્તિ પ્રભુમતિપરં વાચિ
        વારમ્ભણેભ્યઃ (વા વિચારમ્ભણેભ્યઃ) ।
ભોક્તા ભોગવિલક્ષણો હિ ભગવાન્ ભાવોઽપિ લબ્ધો ભવે-
    ત્સત્ત્વાચ્ચાપિ પરસ્ય કાર્યવિવશં સદ્વાક્યવાદાન્વયાત્ ॥ ૨.૪૪॥

યુક્તેઃ શબ્દાન્તરાચ્ચાસદિતિ ન હિ કાર્યં ચ કરણં
    પ્રમાણૈર્યુક્ત્યા વા ન ભવતિ વિશેષેણ મનસા ।
પરઃ પ્રાણોદ્દેશાદ્ધિતકરણદોષાભિધધિયા

તથાશ્માદ્યા દિવ્યા ??? દ્યોતન્તિ દેવા દિવિ ॥ ૨.૪૫॥

પ્રસક્તિર્વા કૃત્સ્ના શ્રુતિવરબલાદાત્મનિ ચિરં
સ્વપક્ષે દોષાણાં પ્રભવતિ ચ સર્વાદિસુદૃશા ।
વિકારાણાં ભેદો ન ભવતિ વિયોજ્યો ગુણધિયાં
અતો લોકે લીલાપરવિષમનૈર્ઘૃણ્યવિધુરમ્ ॥ ૨.૪૬॥

સ કર્મારમ્ભાદ્વા ઉપલભતિ યદ્યેતિ ચ પરં
સર્વૈર્ધર્મપદૈરયુક્તવચનાપત્તેઃ પ્રવૃત્તેર્ભવેત્ ।
ભૂતાનાં ગતિશોપયુજ્યપયસિ ક્ષારં યથા નોપયુ-
કવસ્થાનં નૈવ પ્રભવતિ તૃણેષૂદ્યતમતે-
સ્તથાભાવાત્પુંસિ પ્રકટયતિ કાર્યં ચ કરણમ્ ॥ ૨.૪૭॥

અઙ્ગિત્વાનુપપત્તિતોઽપ્યનુમિતો શક્તિજ્ઞહીનં જગ-
ત્પ્રતિષિદ્ધે સિદ્ધે પ્રસભમિતિ મૌનં હિ શરણમ્ ।
મહદ્દીર્ઘં હસ્વં ઉભયમપિ કર્મૈવ કરણે
તથા સામ્યે સ્થિત્યા પ્રભવતિ સ્વભાવાચ્ચ નિયતમ્ ॥ ૨.૪૮॥

ન સ્થાનતોઽપિ શ્રુતિલિઙ્ગસમન્વયેન
પ્રકાશવૈયર્થ્યમતો હિ માત્રા ।
સૂર્યોપમા પ્રભવતિત્વતથા ઉદત્વા- (સૂર્યોપમા પ્રભતિ ચત્વતથામ્બુદત્વા)
ત્તદ્દર્શનાચ્ચ નિયતં પ્રતિબિમ્બરૂપમ્ ॥ ૨.૪૯॥

તદવ્યક્તં ન તતો લિઙ્ગમેતત્તથોભયવ્યપદેશાચ્ચ તેજઃ ।
પ્રતિષેધાચ્ચ પરમઃ સેતુરીશઃ સામાન્યતઃ સ્થાનવિશેષબુદ્ધ્યા ॥ ૨.૫૦॥

વિશેષતશ્ચોપપત્તેસ્તથાન્યદતઃ ફલઞ્ચોપપદ્યેત યસ્માત્ ।
મહેશ્વરાચ્છ્રુતિભિશ્ચોદિતં યદ્ધર્મં પરે ચેશ્વરં ચેતિ ચાન્યે ।
ન કર્મવચ્ચેશ્વરે ભેદધીર્નઃ ॥ ૨.૫૧॥

ભેદાન્ન ચેતિ પરતઃ પરમાર્થદૃષ્ટ્યા સ્વાધ્યાયભેદાદુપસંહારભેદઃ ।
અથાન્યથાત્વં વચસોઽસૌ વરીયાન્સંજ્ઞાતશ્ચેદ્વ્યાપ્તિરેવ પ્રમાણમ્ ॥ ૨.૫૨॥

સર્વત્રાભેદાદનયોસ્તથાન્યત્પ્રાધાન્યમાનન્દમયઃ શિરસ્ત્વમ્ ।
તથેતરે ત્વર્થસામાન્યયોગાત્પ્રયોજનાભાવતયાઽપ્યયાય તે ॥ ૨.૫૩॥

શબ્દાત્તથા હ્યાત્મગૃહીતિરુત્તરાત્તથાન્વયાદિતરાખ્યાનપૂર્વમ્ ।
અશબ્દત્વાદેવમેતત્સમાનમેવઞ્ચ સંવિદ્વચનાવિશેષાત્ ॥ ૨.૫૪॥

તદ્દર્શનાત્સમ્ભૃતઞ્ચૈવમેષોઽનામ્નાયાદ્વૈધભેદાત્પરેતિ ।
ગતેરર્થાદુપપન્નાર્થલોકે શબ્દાનુમાનૈઃ સગુણોઽવ્યયાત્મા ॥ ૨.૫૫॥

યથાધિકારં સ્થિતિરેવ ચાન્તરા (તથાત્મનઃ)
તત્રૈવ ભેદાદ્વિશિષન્હીતરવત્ ।
અન્યત્તથા સત્યકૃત્યા તથૈકે
કામાદિરત્રાયતનેષુ ચાદરાત્ ॥ ૨.૫૬॥

ઉપસ્થિતે તદ્વચનાત્તથાગ્નેઃ
સંલોપ એવાગ્નિભવઃ પ્રદાને ।
અતોઽન્યચિન્તાર્થભેદલિઙ્ગં બલીયઃ
ક્રિયા પરં ચાસમાનાચ્ચ દૃષ્ટેઃ ॥ ૨.૫૭॥

શ્રુતેર્બલાદનુબન્ધેમખે વૈ ભાવાપત્તિશ્ચાત્મનશ્ચૈક એવ ।
તદ્ભાવભાવદુપલબ્ધિરીશે સદ્ભાવભાવાદનુભાવતશ્ચ ॥ ૨.૫૮॥

અઙ્ગાવબદ્ધા હિ તથૈવ મન્ત્રતો ભૂમ્નઃ ક્રતોર્જાયતે દર્શનેન ॥ ૨.૫૯॥

રૂપાદેશ્ચ વિપર્યયેણ તુ દૃશા દોષોભયત્રાપ્યયં
અગ્રાહ્યાઃ સકલાનપેક્ષ્યકરણં પ્રાધાન્યવાદેન હિ ।
તત્પ્રાપ્તિઃ સમુદાયકેઽપિ ઇતરે પ્રત્યાયિકેનાપિ ચ-
દ્વિદ્યાઽવિદ્યા અસતિ બલતો ધુર્યમાર્યાભિશંસી ॥ ૨.૬૦॥

દોષોભયોરપિ તદા સ્વગમોઽભ્યુપેયા ।
સ્મૃત્યા સતો દૃશિ ઉદાસીનવદ્ભજેત ॥ ૨.૬૧॥

નાભાવાદુપલબ્ધિતોઽપિ ભગવદ્વૈધર્મ્યસ્વન્યાદિવ-
તદ્ભાવેનાપ્યુપલબ્ધિરીશિતુરહો સા વૈ ક્ષણં કલ્પ્યતે ।
સર્વાર્થાનુપપત્તિતોઽપિ ભગવત્યેકાદ્વિતીયે પુનઃ ।
કાત્સ્ન્ર્યેનાત્મનિ નો વિકારકલનં નિત્યં પતેર્ધર્મતઃ ॥ ૨.૬૨॥

સમ્બન્ધાનુપપત્તિતોઽપિ સમધિષ્ઠાનોપપત્તેરપિ
તચ્ચૈવાકરણં ચ ભોગવિધુરં ત્વં તત્ત્વસર્વજ્ઞતા ।
ઉત્પત્તેરપિ કર્તુરેવ કારણતયા વિજ્ઞાનભાવો યદિ ???
નિષેધપ્રતિપત્તિતોઽપિ મરુતશ્ચાકાશતઃ પ્રાણતઃ ॥ ૨.૬૩॥

અસ્તિત્વં તદપીતિ ગૌણપરતા વાક્યેષુ ભિન્ના ક્રિયા
કાર્યદ્રવ્યસમન્વયાયકરણં શબ્દાચ્ચ બ્રહ્મૈવ તત્ ।

શબ્દેભ્યોઽપ્યમતં શ્રુતં ભવતિ તજ્જ્ઞાનં પરં શામ્ભવં
યાવલ્લોકવિભાગકલ્પનવશાદ્ભૂતક્રમાત્સર્જતિ ॥ ૨.૬૪॥

તસ્યાસમ્ભવતો ભવેજ્જગદિદં તેજઃપ્રસૂતં શ્રુતિઃ ।
ચાપઃ ક્ષ્મા મરુદેવ ખાત્મકથયન્તલ્લિઙ્ગસંજ્ઞાનતઃ ॥ ૨.૬૫॥

વિપર્યયેણ ક્રમતોઽન્તરા હિ વિજ્ઞાનમાનક્રમતો વિશેષાત્ ।
ન ચાત્મનઃ કારણતાવિપર્યશ્ચરાચરવ્યાપકતો હિ ભાવૈઃ ॥ ૨.૬૬॥

નાત્મા શ્રુતો નિત્યતાશક્તિયોગાન્નાનેવ ભાસત્યવિકલ્પકો હિ ।
સંજ્ઞાન એવાત્ર (સન્તાન એવાત્ર) ગતાગતાનાં સ્વાત્માનં
ચોત્તરણેનાણુરેવ ॥ ૨.૬૭॥

સ્વશબ્દોન્માનાભ્યાં સુખયતિ સદાનન્દનતનું
વિરોધશ્ચાન્દ્રોપદ્રવ ઇવ સદાત્મા નિખિલગઃ ।
ગુણાદાલોકેષુ વ્યતિકરવતો ગન્ધવહતઃ
પરો દૃષ્ટો હ્યાત્મા વ્યપદિશતિ પ્રજ્ઞાનુભવતઃ ॥ ૨.૬૮॥

યાવચ્ચાત્મા નૈવા દૃશ્યેત દોષૈઃ
પુંસ્ત્વાદિવત્ત્વસતો વ્યક્તિયોગાત્ ।
મનોઽન્યત્રાયદિ કાર્યેષુ ગૌણં વિમુખઃ
કર્તા શાશ્વતો વિહરતિ ઉપાદાનવશતઃ ॥ ૨.૬૯॥

અસ્યાત્મવ્યપદેશતઃ શ્રુતિરિયં કર્તૃત્વવાદં વદ-
તુપાલબ્ધું શક્તેર્વિપરતિ સમાધ્યા (વિપર્યે સમાધ્યા) ક્ષુભિતયા ।
પરાત્તત્તુ શ્રુત્યાપ્યનુકૃતિ સુરત્વક્ષુભિતયા (સુયત્નક્ષુભિતયા)
પરો મન્ત્રો વર્ણૈર્ભગવતિ અનુજ્ઞાપરિહરૌ ।
તનોઃ સમ્બન્ધેન પ્રવિશતિ પરં જ્યોતિકલને ॥ ૨.૭૦॥

આસન્નતેવ્યતિકરં પરરૂપભેદે આભાસ એવ સુદૃશા નિયતો નિયમ્યાત્ ।
આકાશવત્સર્વગતોઽવ્યયાત્મા આસન્વિભેદાત્પ્રતિદેશભાવાત્ ॥ ૨.૭૧॥

તથા પ્રાણો ગૌણઃ પ્રકૃતિવિધિપૂર્વાર્થકલના-
દધસ્તોયે સૃત્યઃ પ્રથિતગતિશેષેણ કથિતઃ ।
હસ્તાદયસ્ત્વણવઃ પ્રાણવાયોઃ
ચક્ષુસ્તથા કરણત્વાન્ન દોષઃ ॥ ૨.૭૨॥

યઃ પઞ્ચવૃત્તિર્મનવચ્ચ દૃશ્યતે તથાણુતો જ્યોતિરસુશ્ચ ખાનિ ।

ભેદશ્રુતેર્લક્ષણવિપ્રયોગાદાત્માદિભેદે તુ વિશેષ વાદઃ ॥ ૨.૭૩॥

આત્મૈકત્વાત્પ્રાણગતેશ્ચ વહ્નેઃ તે જાગતીવાશ્રુતત્ત્વાન્ન ચેષ્ટા ।
ભોક્તુર્ન ચાત્મન્યવિદીકૃતા યે તે ધૂમમાર્ગેણ કિલ પ્રયાન્તિ ॥ ૨.૭૪॥

ચરણાદિતિ ચાન્યકલ્પનાં સ્મરન્તિ સમૈવ ગતિપ્રરોહાત્ ।
વ્યાપારવૈધુર્યસમૂહવિદ્યા તે કર્મણૈવેહ તૃતીયલબ્ધામ્ ॥ ૨.૭૫॥

તદ્દર્શનન્તદ્વદતોઽપ્યવિદ્યા સવ્યોપપત્તેરુત દૌવિશેષાત્ ।
ચિરન્તપઃ શુદ્ધિરતો વિશેષાત્તે સ્થાવરે ચાવિશેષાર્થવાદઃ ॥ ૨.૭૬॥

સન્ધ્યાંશસૃષ્ટ્યા કિલ નિર્મમે જગત્પુત્રેષુ માયામયતોઽવ્યયાત્મા ।
કૃત્સ્નં માયામયં તજ્જગદિદમસતો નામરૂપં તુ જાતમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્તિતોઽપિ પરમાનન્દમ્તિરોધાનકૃત્ ॥ ૨.૭૭॥

દેહયોગાદ્ગ્રસતે વર્ધતે યઃ તત્રૈવાન્યત્પશ્યતે સોઽથ બોધાત્ ।
સ શોશુચાનસ્મૃતિશબ્દબોધઃ ॥ ૨.૭૮॥

નાનાશબ્દાદિભેદાત્ફલવિવિધમહાકર્મવૈચિત્ર્યયોગા-
દીષ્ટેતાં ગુણધારણાં શ્રુતિહિતાં તદ્દર્શનોદ્બોધતઃ ।
તદ્દર્શનાત્સિદ્ધિત એવ સિદ્ધ્યતે આચારયોગાદૃતતચ્છ્રુતેશ્ચ ॥ ૨.૭૯॥

વાચા સમારમ્ભણતો નિયામતઃ તસ્યાધિકાપ્રાત્વકસ્યોપદેશાત્ ।
તુલ્યન્દૃશા સર્વતઃ સ્યાદ્વિભાગઃ અધ્યાપયાત્રાન્નવિશેષતસ્તુ તે ॥ ૨.૮૦॥

કામોપમર્દેન તદૂર્ધ્વરેતસા વિમર્શતો યાતિ સ્વતત્ત્વતોઽન્યઃ ।
અનુષ્ઠેયં ચાન્યત્શ્રુતિશિરસિ નિષ્ઠાભ્રમવશાત્ ।
વિધિસ્તુત્યા ભાવમ્પ્રવદતિ રથાગ્નેરાધાનમનુવદતિ
જ્ઞાનાઙ્ગમપિ ચ ॥ ૨.૮૧॥

પ્રાણાત્યયે વાપિ સમન્તથાન્નમબાધતઃ સ્મૃતિતઃ કામકારે ।
વિહિતાશ્રમકર્મતઃ સહૈવ કાર્યાત્તથોભયોર્લિઙ્ગભઙ્ગં
ચ દર્શયેત્ ॥ ૨.૮૨॥

તથાન્તરા ચાપિ સ્મૃતેર્વિશેષતઃ જ્યાયોઽપિ લિઙ્ગાભયભાવનાધિકા ।
સૈવાધિકારાદર્શનાત્તદુક્તમાચારતઃ સ્વામિન ઈજ્યવૃત્ત્યા ॥ ૨.૮૩॥

સ્મૃતે ઋત્વિક્સહકાર્યં ચ કૃત્સ્નમ્ ।
તન્મૌનવાચા વચનેન કુર્વન્તદૈહિકમ્તદવસ્થાધૃતેશ્ચ ॥ ૨.૮૪॥

આવૃત્ત્યાપ્યસકૃત્તથોપદિશતિ હ્યાત્મન્નુપાગચ્છતિ
    ગ્રાહં યાતિ ચ શાસ્ત્રતો પ્રતીકકલનાત્સા બ્રહ્મદૃષ્ટિર્પ્રભોઃ ।
આદિત્યાદિકૃતીષુ તથા સતીરપિ કર્માઙ્ગતાધ્યાનતઃ
    તસ્માચ્ચાસ્થિરતાં સ્મરન્તિ ચ પુનર્યત્રૈવ તત્ર શ્રુતા ॥ ૨.૮૫॥

આપ્રાયણાત્તત્ર દૃષ્ટં હિ યત્ર તત્રાગમાત્પૂર્વયોઽશ્લેષનાશૌ ।
તથેતરસ્યાપિ પતેદસંસૃતૌ અનારબ્ધાગ્નિહોત્રાદિકાર્યે ॥ ૨.૮૬॥

અતોઽન્યેષામુભયોર્યત્ર યોગાદ્વિદ્યાભોગેન વાઙ્મનસી દર્શનાચ્ચ ।
સર્વાણ્યનુમનસા પ્રાણ એવ સોઽધ્યક્ષેત ઉપદર્શેન કશ્ચિત્ ॥ ૨.૮૭॥

સમાનવૃત્ત્યા ક્રમતે ચાસુ વૃત્ત્યા સંસારતો વ્યપદેશોપપત્તેઃ ।
સૂક્ષ્મપ્રમાણોપમર્દોપલબ્ધસ્થિતિશ્ચ તથોપપત્તેરેષ
        ઊષ્મા રસૈકે ॥ ૨.૮૮॥

    અત્ર સ્મર્યનાનુપરતાવિધિવાક્યસિદ્ધેર્વૈયાસકિર્મુનિરેષોવ્યયાત્મા ।
અવિભાગો વચનાદ્ધાર્દ એવ રશ્મ્યનુસારી નિશિતો દક્ષિણાયને ।
    યોગિનઃ પ્રતિસૃતૈસ્તથાર્ચિરાદ્વાયુમદ્ઘટિતો વરુણેન ॥ ૨.૮૯॥

અતિવાહિકવિધેસ્તદલિઙ્ગાત્તદ્વદત્રોભયોરપિ સિદ્ધિઃ ।
તદ્વૈતેન ગતિરપ્યુપાવૃતો વિશેષસામીપ્યસકાર્યહેતૌ ॥ ૨.૯૦॥

સ્મૃતિસ્તથાઽન્યોઽપિ ચ દર્શનેન કાયે તથા પ્રતિપત્તિપ્રતીકઃ ।
વિશેષદૃષ્ટ્યા સમ્પદાવિર્ભવેન સ્વેનાંશત્વાન્મુક્તિવિજ્ઞાનતો હિ ॥ ૨.૯૧॥

આત્મપ્રકાશાદવિભાગેન દૃષ્ટઃ તદ્બ્રહ્મણોઽન્યદ્દ્યુતિતન્માત્રતોઽન્યઃ ।
ઉપન્યાસાદન્યસઙ્કલ્પભૂત્યા રથવાન્યોઽપ્યુથાહ ॥ ૨.૯૨॥

ભાવમન્યો ઉભયં ન સ્વભાવા
    ભાવે સમ્પત્તિરેવં (ભાવે સ્વાપ્યસમ્પત્તિરેવં) જગત્સ્યાત્ ।
પ્રત્યક્ષેણોપદેશાત્સ્થિતિરપિ
    જગતો (સ્થિતિરવિનૃષરાવર્તિ) વ્યક્તિભાવાદુપાસા
    ભેદાભાસસ્થિતિરવિકારાવર્તિરિતિ ચ ॥ ૨.૯૩॥

તથા દૃષ્ટેર્દ્રષ્ટુર્વિપરીતદૃષ્ટેઃ શ્રુતિવશા-
    ત્તથા બુદ્ધેર્બોદ્ધા ભવતિ અનુમાનેન હિ બુધઃ ।
ભોગે સામાન્યલિઙ્ગાચ્છિવભજનભવે માન્યમનસા
    અનાવૃત્તિઃ શબ્દો ભવતિ વિધિવાક્યેન નિયતમ્ ॥ ૨.૯૪॥

તવોક્તઃ સૂત્રાણાં વિધિરપિ ચ સામાન્યમુભય-
પ્રકૃષ્ટ શ્રુત્યૈવ પ્રભવતિ મહાનન્દસદને ॥ ૨.૯૫॥

સ્કન્દઃ -

ત્રિનેત્રવક્ત્રસુચરિત્રરૂપં મન્ત્રાર્થવાદામ્બુજમિત્રરૂપાઃ ।
પ્રહૃષ્ટરૂપા મુનયો વિતેનિરે મતાનુસારીણ્યથ સૂત્રિતાનિ ॥ ૨.૯૬॥

ન તાનિ બુદ્ધ્યુદ્ભવબોધદાનિ વિશ્વેશપાદામ્બુજભક્તિદાનિ ॥ ૨.૯૭॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે શિવેન ઋભું પ્રતિ
સૂત્રોપદેશો નામ દ્વિતીયોઽધ્યાયઃ ॥

## ૩. શિવઋભુસંવાદો નામ તૃતીયોઽધ્યાયઃ

સૂતઃ -
તતો મહેશાત્સંશ્રુત્ય સૂત્રાણિ ઋભુરેવ હિ ।
કૈલાસેશં મહાદેવં તુષ્ટાવ વિનયાઞ્જલિઃ ॥ ૩.૧॥

લબ્ધજ્ઞાનો મહાદેવાન્મુનિભ્યોઽકથયચ્ચ તત્ ।
તત્સ્તુતિં ચ શૃણુષ્વેતિ જગાદ ગિરિજાસુતઃ ॥ ૩.૨॥

જૈગીષવ્યં મહાત્માનં જિતષડ્વર્ગમુત્તમમ્ ।
સ્કન્દઃ -
સંસ્તુત્ય સામ્બમીશાનમૃભુર્જ્ઞાનમવિન્દત ।
શામ્ભવઃ સ મહાયોગી તુષ્ટાવાષ્ટતનું હરમ્ ॥ ૩.૩॥

ઋભુઃ -
ગન્ધદ્વિપવરવૃન્દત્વચિરુચિબન્ધોદ્યતપટ ગન્ધપ્રમુખ
મદાન્ધવ્રજદલિ હરિમુખનખરોદ્યત્સ્કન્ધોદ્યન્મુખ બન્ધક્ષુરનિભ
નિર્યદ્રસદસૃભિન્દન્નગધર વિન્ધ્યપ્રભશિવ મેધ્યપ્રભુવર ।
મેધ્યોત્તમશિવ ભેદ્યાખિલજગદુદ્યદ્ભવગત વેદ્યાગમશિવ
ગદ્યસ્તુતપદ પદ્યપ્રકટહૃદુદ્યદ્ભવગદ
વૈદ્યોત્તમ પાહિ શમ્ભો ॥ ૩.૪॥

ચણ્ડદ્વિપકર કાણ્ડપ્રભભુજ દણ્ડોદ્યતનગ
ખણ્ડત્રિપુર મહાણ્ડસ્ફુટદુડુપશિખણ્ડ ।
દ્યુતિવર ગણ્ડદ્વય કોદણ્ડાન્તક દણ્ડિતપાદ પાહિ શમ્ભો ॥ ૩.૫॥

કિઞ્ચિજ્જલલવ સિઞ્ચદ્વિજકુલ મુઞ્ચદ્વૃજિન કુલુઞ્ચદ્વિજપતિ
ચઞ્ચચ્છવિજટ કુઞ્ચત્પદનખ મુઞ્ચન્નતવર કરુણા પાહિ શમ્ભો ॥ ૩.૬॥

દેવ શઙ્કર હરમહેશ્વર પાપતસ્કર અમરમયસ્કર ।
શિવદશઙ્કર પુરમહેશ્વર ભવહરેશ્વર પાહિ શમ્ભો ॥ ૩.૭॥

અઙ્ગજભઙ્ગ તુરઙ્ગરથાઙ્ગ જલધિનિષઙ્ગ
ધૃતભુજઙ્ગાઙ્ગ દૃશિ સુપતઙ્ગ
કરસુકુરઙ્ગ જટધૃતગઙ્ગ યમિહૃદિસઙ્ગ
ભજશિવલિઙ્ગ ભવભયભઙ્ગ ॥ ૩.૮॥

શમ્બરકરશર દમ્બરવરચર ડમ્બરઘોષણ દુમ્બરફલજગ
નિકુરુમ્બભરહર બિમ્બિતહૃદિચિર લમ્બિતપદયુગ
લમ્બોદરજનકાન્તકહર શિવ બિન્દુવરાસન બિન્દુગહન
શરદિન્દુવદનવર કુન્દધવલ ગણવૃન્દવિનત ભવભયહર
પરવર કરુણાકર ફણિવરભૂષણ સ્મર હર ગરધર પરિપાહિ ॥ ૩.૯॥

રાસભવૃષભેભ શરભાનનગણગુણનન્દિતત્રિગુણપથાતિગ
શરવણભવનુત તરણિસ્થિત વરુણાલય કૃતપારણ મુનિશરણાચિત
પદપદ્મારુણ પિઙ્ગજટાધર કુરુ કરુણાં શઙ્કર શં કુરુ મે ॥ ૩.૧૦॥

જમ્ભપ્રહરણ કુમ્ભોદ્ભવનુત કુમ્ભપ્રમથ નિશુમ્ભદ્યુતિહર
ભિન્દદ્રણગણ ડિમ્ભાચિતસુર તારકહરસુત કુમ્ભ્યુદ્યતપદ
વિન્ધ્યસ્થિતદિતિમાન્ધપ્રહર મદાન્ધદ્વિપવર કૃત્તિપ્રવર
સુધાન્ધોનુતપદ બુદ્ધ્યાગમશિવ મેધ્યાતિથિવરદ
મમાવન્ધ્યં કુરુ દિવસં તવ પૂજનતઃ પરિપાહિ શમ્ભો ॥ ૩.૧૧॥

કુન્દસદૃશ મકરન્દનિભસુરવૃન્દવિનુત કુરુવિન્દમણિગણ
વૃન્દનિભાઙ્ઘ્રિજમન્દર વસદિન્દુમકુટ
શરદમ્બુજકૃશ ગરનિન્દનગલ સુન્દરગિરિતનયાકૃતિ
દેહવરાઙ્ગબિન્દુકલિત શિવલિઙ્ગગહન સુતસિન્દુરવરમુખ
બન્ધુરવરસિન્ધુનદીતટ લિઙ્ગનિવહવરદિગ્વસ પાહિ શમ્ભો ॥ ૩.૧૨॥

પન્નગાભરણ મારમારણ વિભૂતિભૂષણ શૈલજારમણ ।
આપદુદ્ધરણ યામિનીરમણશેખર સુખદ પાહિ શમ્ભો ॥ ૩.૧૩॥

દક્ષાધ્વરવરશિક્ષ પ્રભુવર ત્ર્યક્ષ પ્રબલમહોક્ષસ્થિત
સિતવક્ષસ્સ્થલકુલચક્ષુઃશ્રવસ વરાક્ષસ્રજ હર ।
વીક્ષાનિહતાધોક્ષજાત્મજ વરકક્ષાશ્રય પુરપક્ષવિદારણ
લીક્ષાયિતસુર ભિક્ષાશન હર પદ્માક્ષાર્ચનતુષ્ટ ભગાક્ષિહરાવ્યય
શઙ્કર મોક્ષપ્રદ પરિપાહિ મહેશ્વર ॥ ૩.૧૪॥

અક્ષયફલદ શુભાક્ષ હરાક્ષતતક્ષકકર
    ગરભક્ષ પરિસ્ફુરદક્ષ ક્ષિતિરથ સુરપક્ષાવ્યય ।
પુરહર ભવ હર હરિશર શિવ શિવ
    શઙ્કર કુરુ કુરુ કરુણાં શશિમૌલે ॥ ૩.૧૫॥

ભજામ્યગસુતાધવં પશુપતિં મહોક્ષધ્વજં
    વલક્ષભસિતોજ્જ્વલં પ્રકટદક્ષદાહાક્ષિકમ્ ।
ભગાક્ષિહરણં શિવં પ્રમથિતોરુદક્ષાધ્વરં
    પ્રપક્ષસુરતામુનિપ્રમથશિક્ષિતાધોક્ષજમ્ ॥ ૩.૧૬॥

શ્રીનાથાક્ષિસરોજરાજિતપદામ્ભોજૈકપૂજોત્સવૈર્નિત્યં
    માનસમેતદસ્તુ ભગવન્સદ્રાજમૌલે હર ।
ભૂષાભૂતભુજઙ્ગસઙ્ગત મહાભસ્માઙ્ગનેત્રોજ્વલજ્જ્વાલા-
    દગ્ધમનઙ્ગપતઙ્ગદૃગુમાકાન્તાવ ગઙ્ગાધર ॥ ૩.૧૭॥

સ્વાત્માનન્દપરાયણામ્બુજભવસ્તુત્યાઽધુના પાહિ માં (।)
    . . . ?? missing text ।
ગિરિજામુખસખ ષણ્મુખ પઞ્ચમુખોદ્યતદુર્મુખમુખહર
    આખુવહોન્મુખ લેખગણોન્મુખ શઙ્કર ખગગમપરિપૂજ્ય ॥ ૩.૧૮॥

કોટિજન્મવિપ્રકર્મશુદ્ધચિત્તવર્ત્મનાં
    શ્રૌતસિદ્ધશુદ્ધભસ્મદગ્ધસર્વવર્ષ્મણામ્ ।
રુદ્રભુક્તમેધ્યભુક્તિદગ્ધસર્વપાપ્મનાં
    રુદ્રસૂક્તિ ઉક્તિભક્તિભુક્તિમુક્તિદાયિકામ્ ।
પુરહર ઇષ્ટતુષ્ટિમુક્તિલાસ્યવાસના
    ભક્તિભાસકૈલાસમીશ આશુ લભ્યતે ॥ ૩.૧૯॥

સ્કન્દઃ -
તત્સ્તુત્યા તોષિતઃ શમ્ભુસ્તમાહ ઋભુમીશ્વરઃ ।
પ્રસન્નઃ કરુણામ્ભોધિરમ્ભોજસુતમોદનઃ ॥ ૩.૨૦॥

ઈશ્વરઃ -
વેદાન્તપાઠપઠનેન હઠાદિયોગૈઃ
    શ્રીનીલકણ્ઠપદભક્તિવિકુણ્ઠભાવાઃ ।
યે કર્મઠા યતિવરા હરિસૌરિગેહે
    સાલાવૃકૈર્વરકઠોરકુઠારઘાતૈઃ ॥ ૩.૨૧॥

ભિન્નોત્તમાઙ્ગહૃદયાશ્ચ ભુસુણ્ડિભિસ્તે ।
ભિક્ષાશના જરઠરાસભવદ્ભ્રમન્તિ ॥ ૩.૨૨॥

વિદ્યુચ્ચઞ્ચલજીવિતેઽપિ ન મનાગુત્પદ્યતે શામ્ભવી
    ભક્તિર્ભીમપદામ્બુજોત્તમપદે ભસ્મત્રિપુણ્ડ્રેઽપિ ચ ।
રુદ્રાક્ષામલરુદ્રસૂક્તિજપને નિષ્ઠા કનિષ્ઠાત્મનાં
    વિષ્ઠાવિષ્ટકુનિષ્ઠકષ્ટકુધિયાં દુષ્ટાત્મનાં સર્વદા ॥ ૩.૨૩॥

ભ્રષ્ટાનાં દુરદૃષ્ટતો જનિજરાનાશેન નષ્ટાત્મનાં
    જ્યેષ્ઠશ્રીશિપિવિષ્ટચારુચરણામ્ભોજાર્ચનાનાદરઃ ।
તેનાનિષ્ટપરમ્પરાસમુદયૈરષ્ટાકૃતેર્ન સ્મૃતિઃ
    વિષ્ઠાપૂરિતદુર્મુખેષુ નરકે ભ્રષ્ટે ચિરં સંસ્થિતિઃ ॥ ૩.૨૪॥

અજ્ઞાયત્તેષ્વભિજ્ઞાઃ સુરવરનિકરં સ્તોત્રશાસ્ત્રાદિતુષ્ટં
સત્રાશં મન્ત્રમાત્રૈર્વિધિવિહિતધિયા સામભાગૈર્યજન્તિ ।
શ્રાદ્ધે શ્રદ્ધાભરણહરણભ્રાન્તરૂપાન્પિતૃંસ્તે
તત્તચ્છ્રદ્ધાસમુદિતમનઃ સ્વાન્તરા શમ્ભુમીશમ્ ॥

નાભ્યર્ચન્તિ પ્રણતશરણં મોક્ષદં માં મહેશમ્ ॥ ૩.૨૫॥

આર્યાઃ શર્વસમર્ચનેન સતતં દૂર્વાદલૈઃ કોમલૈઃ
    બિલ્વાખર્વદલૈશ્ચ શઙ્કરમહાભાગં હૃદન્તઃ સદા ।
પર્વસ્વપ્યવિશેષિતેન મનસા ગર્વં વિહાયાદરાત્
    દુર્ગાણ્યાશુ તરન્તિ શઙ્કરકૃપાપીયૂષધારારસૈઃ ॥ ૩.૨૬॥

શ્રીચન્દ્રચૂડચરણામ્બુજ પૂજનેન કાલં નયન્તિ પશુપાશવિમુક્તિહેતોઃ ।
ભાવાઃ પરં ભસિતભાલલસત્ત્રિપુણ્ડ્ર-
    રુદ્રાક્ષકઙ્કણલસત્કરદણ્ડયુગ્માઃ ॥ ૩.૨૭॥

પઞ્ચાક્ષરપ્રણવસૂક્તધિયા વદન્તિ-
    નામાનિ શામ્ભવમનોહરદાનિ શમ્ભો ।

મુક્તિપ્રદાનિ સતતં શિવભક્તવર્યાઃ
    યે બિલ્વમૂલશિવલિઙ્ગસમર્ચનેન ॥ ૩.૨૮॥

કાલં નયેદ્વિમલકોમલબિલ્વપત્રૈઃ
    નો તસ્ય કાલજભયં ભવતાપપાપમ્ ।
સન્તાપભૂપજનિતં ભજતાં મહેશમ્ ॥ ૩.૨૯॥

શશ્વદ્વિશ્વેશપાદૌ યમશમનિયમૈર્ભૂતિરુદ્રાક્ષગાત્રો
વિશ્વત્રસ્તો ભુજઙ્ગાઙ્ગદવરગિરિજાનાયકે લબ્ધભક્તિઃ ।
મુગ્ધોઽપ્યધ્યાત્મવિદ્ યો ભવતિ ભવહરસ્યાર્ચયા પ્રાપ્તકામઃ ॥ ૩.૩૦॥

શબ્દૈરબ્દશતેઽપિ નૈવ સ લભેત્ જ્ઞાનં ન તર્કભ્રમૈઃ
    મીમાંસા દ્રયતઃ (હૃયતો) તથાદ્વયપદં કિં સાઙ્ખ્યસઙ્ખ્યા વદ ।
યોગાયાસપરમ્પરાદિવિહિતૈર્વેદાન્તકાન્તારકે
    શ્રામ્યન્ભક્તિવિવર્જિતેન મનસા શમ્ભોઃ પદે મુક્તયે ॥ ૩.૩૧॥

કિં ગઙ્ગયા વા મકરે પ્રયાગસ્નાનેન વા યોગમખક્રિયાદ્યૈઃ ।
યત્રાર્ચિતં લિઙ્ગવરં શિવસ્ય તત્રૈવ સર્વાર્થપરમ્પરા સ્યાત્ ॥ ૩.૩૨॥

શ્રીશૈલો હિમભૂધરોઽરુણગિરિર્વૃદ્ધાદ્રિગોપર્વતૌ
    શ્રીમદ્ધેમસભાવિહાર ભગવન્નૃત્તં ત્રિનેત્રો ગિરિઃ ।
કૈલાસોત્તરદક્ષિણૌ ચ ભગવાન્યત્રાર્ચને શઙ્કરો લિઙ્ગે
    સન્નિહિતો વસત્યનુદિનં શાઙ્ગસ્ય હૃત્પઙ્કજે ॥ ૩.૩૩॥

તત્રાવિમુક્તં શશિચૂડવાસમોઙ્કારકાલઞ્જર રુદ્રકોટિમ્ ।
ગઙ્ગાબુધેઃ સઙ્ગમમમ્બિકાપતિપ્રિયં તુ ગોકર્ણકસહ્યજાતટમ્ ॥ ૩.૩૪॥

યત્રાભ્યર્ણગતં મહેશકરુણાપૂર્ણં તુ તૂર્ણં હૃદા
    લિઙ્ગં પૂજિતમપ્યપાસ્તદુરિતં તીર્થાનિ ગઙ્ગાદયઃ ।
પુણ્યાશ્ચાશ્રમસઙ્ઘકા ગિરિવરક્ષેત્રાણિ શમ્ભોઃ પદં
    ભક્તિયુક્તભજનેન મહેશે શક્તિવજ્જગદિદં પરિભાતિ ॥ ૩.૩૫॥

કર્મન્દિવૃન્દા અપિ વેદમૌલિ-
    સિદ્ધાન્તવાક્યકલનેઽપિ ભવન્તિ મન્દાઃ ।
કામાદિબદ્ધહૃદયાઃ સિતભસ્મપુણ્ડ્ર-
    રુદ્રાક્ષ શઙ્કરસમર્ચનતો વિહીનાઃ ॥ ૩.૩૬॥

હીના ભવન્તિ બહુધાપ્યબુધા ભવન્તિ ।

મત્પ્રેમવાસભવનેષુ વિહીનવાસાઃ ॥ ૩.૩૭॥

અષ્ટમ્યામષ્ટમૂર્તિર્નિશિ શશિદિવસે સોમચૂડં તુ મુક્ત્યૈ
 ભૂતાયાં ભૂતનાથં ધૃતભસિતતનુર્વીતદોષે પ્રદોષે ।
ગવ્યૈઃ પઞ્ચામૃતાદ્યૈઃ ફલવરજરસૈર્બિલ્વપત્રૈશ્ચ લિઙ્ગે
 તુઙ્ગે શાઙ્ગેઽપ્યસઙ્ગો ભજતિ યતહૃદા નક્તભુક્ત્યૈકભક્તઃ ॥ ૩.૩૮॥

જ્ઞાનાનુત્પત્તયે તદ્ધરિવિધિસમતાબુદ્ધિરીશાનમૂર્તૌ
 ભસ્માક્ષાધૃતિરીશલિઙ્ગભજનાશૂન્યં તુ દુર્માનસમ્ ।
શમ્ભોસ્તીર્થમહત્સુતીર્થવરકે નિન્દાવરે શાઙ્કરે (દ્રોહેસ્તદર્થેષુ ચ)
 શ્રીમદ્રુદ્રજપાદ્યદ્રોહકરણાજ્જ્ઞાનં ન ચોત્પદ્યતે ॥ ૩.૩૯॥

ઈશોત્કર્ષધિયૈકલિઙ્ગનિયમાદભ્યર્ચનં ભસ્મધૃક્
 રુદ્રાક્ષામલ સારમન્ત્ર સુમહાપઞ્ચાક્ષરે જાપિનામ્ ।
ઈશસ્થાનનિવાસશામ્ભવકથા ભક્તિશ્ચ સઙ્કીર્તનં
 ભક્તસ્યાર્ચનતો ભવેત્સુમહાજ્ઞાનં પરં મુક્તિદમ્ ॥ ૩.૪૦॥

આદ્યન્તયોર્યઃ પ્રણવેન યુક્તં શ્રીરુદ્રમન્ત્રં
 પ્રજપત્યઘઘ્નં (પ્રજપદેઘઘ્નમ્) ।
તસ્યાઙ્ઘ્રિરેણું શિરસા વહન્તિ બ્રહ્માદયઃ સ્વાઘનિવૃત્તિકામાઃ ॥ ૩.૪૧॥

અપૂર્વાથર્વોક્ત શ્રુતિશિરસિ વિજ્ઞાનમનઘં
 મહાખર્વાજ્ઞાનપ્રશમનકરં યો વિરચયેત્ ।
મુને હૃત્પર્વાણાં વિશસનકરં સમમનુભિર્વ્રતં
 શીર્ષણ્યં યો વિરચયતિ તસ્યેદમુદિતમ્ ॥ ૩.૪૨॥

ગુરૌ યસ્ય પ્રેમ શ્રુતિશિરસિ સૂત્રાર્થપદગં
 મયિ શ્રદ્ધા વૃદ્ધા ભવતિ કિલ તસ્યૈષ સુલભઃ ।
અનન્યો માર્ગોઽયમકથિતમિદમ્ત્વય્યપિ મુદા
 યદા ગોપ્યો મુગ્ધે સુવિહિતમુનિષ્વેવ દિશ વૈ ॥ ૩.૪૩॥

સ્કન્દઃ -

ઇતિ સ્તુત્વા શમ્ભોઃ પ્રમુદિતમનાસ્ત્વેષ સ ઋભુઃ
 મુનિર્નત્વા દેવન્નગમગપદીશસ્ય નિલયમ્ ।
યતો ગઙ્ગા તુઙ્ગા પ્રપતતિ હિમાદ્રેઃ શિખરતો
 મુનીન્દ્રેષ્વાહેદં તદપિ શ઼ૃણુ વિપ્રોત્તમ હૃદા ॥ ૩.૪૪॥

ઋભુઃ -

પતન્ત્વશનયો મુહુર્ગિરિવરૈઃ સમુદ્રોર્વરા

ભવત્વધરસમ્પ્લવા ગ્રહગણાઃ સુરા યાન્ત્વધઃ ।

ભવજ્જનિમ પૂજનાન્મમ મનો ન યાત્યન્યતઃ

શપામિ પ્રપદે પ્રભોસ્તવ સરોરુહાભે હર ॥ ૩.૪૫॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે શિવઋભુસંવાદો

નામ તૃતીયોઽધ્યાયઃ ॥

## ૪. ઋભુનિદાઘસંવાદો નામ ચતુર્થોઽધ્યાયઃ

સ્કન્દઃ -

હિમાદ્રિશિખરે તત્ર કેદારે સંસ્થિતં ઋભુમ્ ।

કેદારેશં પૂજયન્તં શામ્ભવં મુનિસત્તમમ્ ।

ભસ્મરુદ્રાક્ષસમ્પન્નં નિઃસ્પૃહં મુનયોઽબ્રુવન્ ॥ ૪.૧॥

મુનયઃ -

પદ્મોદ્ભવસુતશ્રેષ્ઠ ત્વયા કૈલાસપર્વતે ।

આરાધ્ય દેવમીશાનં તસ્માત્સૂત્રશ્રુતીરિતમ્ ॥ ૪.૨॥

જ્ઞાનં લબ્ધં મુનિશ્રેષ્ઠ ત્વં નો બ્રૂહિ વિમુક્તયે ।

યેન સંસારવારાશેઃ સમુત્તીર્ણા ભવામહે ॥ ૪.૩॥

સૂતઃ -

ઋભુર્મુનીનાં વચસા તુષ્ટઃ શિષ્ટાન્સમીક્ષ્ય તાન્ ।

અષ્ટમૂર્તિપદધ્યાનનિષ્ઠાંસ્તાનભ્યુવાચ હ ॥ ૪.૪॥

ઋભુઃ -

નાગોપ્યં ભવતામસ્તિ શામ્ભવેષુ મહાત્મસુ ।

ત્રિનેત્રપ્રેમસદનાન્યુષ્માન્પ્રેક્ષ્ય વદામિ તત્ ॥ ૪.૫॥

શાઙ્કરં સૂત્રવિજ્ઞાનં શ્રુતિશીર્ષમહોદયમ્ ।

શ‍ૃણુધ્વં બ્રહ્મવિચ્છ્રેષ્ઠાઃ શિવજ્ઞાનમહોદયમ્ ॥ ૪.૬॥

યેન તીર્ણાઃ સ્થ (તીર્ણાસ્થ) સંસારાચ્છિવભક્ત્યા જિતેન્દ્રિયાઃ ।

નમસ્કૃત્વા મહાદેવં વક્ષ્યે વિજ્ઞાનમૈશ્વરમ્ ॥ ૪.૭॥

ઋભુઃ -
વિશ્વસ્ય કારણમુમાપતિરેવ દેવો વિદ્યોતકો જડજગત્પ્રમદૈકહેતુઃ ।
ન તસ્ય કાર્યં કરણં મહેશિતુઃ સ એવ તત્કારણમીશ્વરો હરઃ ॥ ૪.૮॥

સૂતઃ સાયકસમ્ભવઃ સમુદિતાઃ સૂતાનનેભ્યો હયાઃ
નેત્રે તે રથિનો રથાઙ્ગયુગલી યુગ્યાન્તમૃગ્યો રથી ।
મૌવીમૂર્ધ્નિ રથઃ સ્થિતો રથવહશ્ચાપં શરવ્યં પુરઃ
યોદ્ધુદ્ભેશચરાઃ સ એવ નિખિલસ્થાણોરણુઃ પાતુ વઃ ॥ ૪.૯॥ (નઃ)
નિદાઘમથ સમ્બોધ્ય તતો ઋભુરુવાચ હ ।
અધ્યાત્મનિર્ણયં વક્ષ્યે નાસ્તિ કાલત્રયેષ્વપિ ॥ ૪.૧૦॥

શિવોપદિષ્ટં સઙ્ક્ષિપ્ય ગુહ્યાદ્ગુહ્યતરં સદા ।
અનાત્મેતિ પ્રસઙ્ગાત્મા (પ્રસઙ્ગાચ્ચ) અનાત્મેતિ મનોઽપિ વા ।
અનાત્મેતિ જગદ્વાપિ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૧॥

સર્વસઙ્કલ્પશૂન્યત્વાત્સર્વાકારવિવર્જનાત્ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૨॥

ચિત્તાભાવે ચિન્તનીયો દેહાભાવે જરા ચ ન ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૩॥

પાદાભાવાદ્ગતિર્નાસ્તિ હસ્તાભાવાત્ક્રિયા ચ ન ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૪॥

બ્રહ્માભાવાજ્જગન્નાસ્તિ તદભાવે હરિર્ન ચ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૫॥

મૃત્યુર્નાસ્તિ જરાભાવે લોકવેદદુરાધિકમ્ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૬॥

ધર્મો નાસ્તિ શુચિર્નાસ્તિ સત્યન્નાસ્તિ ભયન્ન ચ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૭॥

અક્ષરોચ્ચારણં નાસ્તિ અક્ષરત્યજડં મમ (અક્ષરં ન ચ મણ્ડલમ્) ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૮॥

ગુરુરિત્યપિ નાસ્ત્યેવ શિષ્યો નાસ્તીતિ તત્ત્વતઃ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૧૯॥

એકાભાવાન્ન દ્વિતીયન્ન દ્વિતીયાન્ન ચૈકતા ।
સત્યત્વમસ્તિ ચેત્કિઞ્ચિદસત્યત્વં ચ સમ્ભવેત્ ॥ ૪.૨૦॥

અસત્યત્વં યદિ ભવેત્સત્યત્વં ચ ઘટિષ્યતિ ।
શુભં યદ્યશુભં વિદ્ધિ અશુભં શુભમસ્તિ ચેત્ ॥ ૪.૨૧॥

ભયં યદ્યભયં વિદ્ધિ અભયાદ્ભયમાપતેત્ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૨૨॥

બદ્ધત્વમસ્તિ ચેન્મોક્ષો બન્ધાભાવે ન મોક્ષતા ।
મરણં યદિ ચેજ્જન્મ જન્માભાવે મૃતિર્ન ચ ॥ ૪.૨૩॥

ત્વમિત્યપિ ભવેચ્ચાહં ત્વં નો ચેદહમેવ ન ।
ઇદં યદિ તદેવાપિ તદભાવે ઇદં ન ચ ॥ ૪.૨૪॥

અસ્તિ ચેદિતિ તન્નાસ્તિ નાસ્તિ ચેદસ્તિ કિઞ્ચ ન ।
કાર્યં ચેત્કારણં કિઞ્ચિત્કાર્યાભાવે ન કારણમ્ ॥ ૪.૨૫॥

દ્વૈતં યદિ તદાઽદ્વૈતં દ્વૈતાભાવેઽદ્વયં ચ ન ।
દૃશ્યં યદિ દૃગપ્યસ્તિ દૃશ્યાભાવે દૃગેવ ન ॥ ૪.૨૬॥

અન્તર્યદિ બહિઃ સત્યમન્તાભાવે બહિર્ન ચ ।
પૂર્ણત્વમસ્તિ ચેત્કિઞ્ચિદપૂર્ણત્વં પ્રસજ્યતે ॥ ૪.૨૭॥

કિઞ્ચિદસ્તીતિ ચેચ્ચિત્તે સર્વં ભવતિ શીઘ્રતઃ ।
યત્કિઞ્ચિત્કિમપિ ક્વાપિ નાસ્તિ ચેન્ન પ્રસજ્યતિ ॥ ૪.૨૮॥

તસ્માદેતત્ક્વચિન્નાસ્તિ ત્વં નાહં વા ઇમે ઇદમ્ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૨૯॥

નાસ્તિ દૃષ્ટાન્તકં લોકે નાસ્તિ દાર્ષ્ટાન્તિકં ક્વચિત્ ।
કેવલં બ્રહ્મભાવત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪.૩૦॥

પરં બ્રહ્માહમસ્મીતિ સ્મરણસ્ય મનો ન હિ ।
બ્રહ્મમાત્રં જગદિદં બ્રહ્મમાત્રત્વમપ્ય હિ ॥ ૪.૩૧॥

ચિન્માત્રં કેવલં ચાહં નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ।
ઇત્યાત્મનિર્ણયં પ્રોક્તં (નિર્ણયઃ પ્રોક્તઃ) ભવતે સર્વસઙ્ગ્રહમ્ ॥ ૪.૩૨॥

સકૃચ્છ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૪.૩૩॥

નિદાઘઃ- (ઋભુઃ-)
ભગવન્ (નિદાઘ) કો ભવાન્ કો નુ વદ મે વદતાં વર ।
યચ્છ્રુત્વા તત્ક્ષણાન્મુચ્યેન્મહાસંસારસઙ્કટાત્ ॥ ૪.૩૪॥

ઋભુઃ-
અહમેવ પરં બ્રહ્મ અહમેવ પરં સુખમ્ ।
અહમેવાહમેવાહમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૩૫॥

અહં ચૈતન્યમેવાસ્મિ દિવ્યજ્ઞાનાત્મકો હ્યહમ્ ।
સર્વાક્ષરવિહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૩૬॥

અહમર્થવિહીનોઽસ્મિ ઇદમર્થવિવર્જિતઃ ।
સર્વાનર્થવિમુક્તોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૩૭॥

નિત્યશુદ્ધોઽસ્મિ બુદ્ધોઽસ્મિ નિત્યોઽસ્મ્યત્યન્તનિર્મલઃ ।
નિત્યાનદસ્વરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૩૮॥

નિત્યપૂર્ણસ્વરૂપોઽસ્મિ સચ્ચિદાનન્દમસ્મ્યહમ્ ।
કેવલાદ્વૈતરૂપોઽહમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૩૯॥

અનિર્દેશ્યસ્વરૂપોઽસ્મિ આદિહીનોઽસ્મ્યનન્તકઃ ।
અપ્રાકૃતસ્વરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૦॥

સ્વસ્વસઙ્કલ્પહીનોઽહં સર્વાવિદ્યાવિવર્જિતઃ ।
સર્વમસ્મિ તદેવાસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૧॥

સર્વનામાદિહીનોઽહં સર્વરૂપવિવર્જિતઃ ।
સર્વસઙ્ગવિહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૨॥

સર્વવાચાં વિધિશ્ચાસ્મિ સર્વવેદાવધિઃ પરઃ ।
સર્વકાલાવધિશ્ચાસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૩॥

સર્વરૂપાવધિશ્ચાહં સર્વનામાવધિઃ સુખમ્ ।
સર્વકલ્પાવધિશ્ચાસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૪॥

અહમેવ સુખં નાન્યદહમેવ ચિદવ્યયઃ ।
અહમેવાસ્મિ સર્વત્ર અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૫॥

કેવલં બ્રહ્મમાત્રાત્મા કેવલં શુદ્ધચિદ્ઘનઃ ।
કેવલાખણ્ડોસારોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૬॥

કેવલં જ્ઞાનરૂપોઽસ્મિ કેવલાકારરૂપવાન્ ।
કેવલાત્યન્તસારોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૭॥

સત્સ્વરૂપોઽસ્મિ કૈવલ્યસ્વરૂપોઽસ્મ્યહમેવ હિ ।
અર્થાનર્થવિહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૮॥

અપ્રમેયસ્વરૂપોઽસ્મિ અપ્રતર્ક્યસ્વરૂપવાન્ ।
અપ્રગૃહ્યસ્વરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૪૯॥

અરસસ્યુતરૂપોઽસ્મિ અનુતાપવિવર્જિતઃ ।
અનુસ્યૂતપ્રકાશોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૫૦॥

સર્વકર્મવિહીનોઽહં સર્વભેદવિવર્જિતઃ ।
સર્વસન્દેહહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૫૧॥

અહમ્ભાવવિહીનોઽસ્મિ વિહીનોઽસ્મીતિ મે ન ચ ।
સર્વદા બ્રહ્મરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૫૨॥

બ્રહ્મ બ્રહ્માદિહીનોઽસ્મિ કેશવત્વાદિ ન ક્વચિત્ ।
શઙ્કરાદિવિહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૪.૫૩॥

તૂષ્ણીમેવાવભાસોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ।
કિઞ્ચિન્નાસ્તિ પરો નાસ્તિ કિઞ્ચિદસ્મિ પરોઽસ્મિ ચ ॥ ૪.૫૪॥

ન શરીરપ્રકાશોઽસ્મિ જગદ્ભાસકરો ન ચ ।
ચિદ્ઘનોઽસ્મિ ચિદંશોઽસ્મિ સત્સ્વરૂપોઽસ્મિ સર્વદા ॥ ૪.૫૫॥

મુદા મુદિતરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ।
ન બાલોઽસ્મિ ન વૃદ્ધોઽસ્મિ ન યુવાઽસ્મિ પરાત્પરઃ ॥ ૪.૫૬॥

ન ચ નાનાસ્વરૂપોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ।
ઇમં સ્વાનુભવં પ્રોક્તં સર્વોપનિષદાં પરં રસમ્ ॥ ૪.૫૭॥

યો વા કો વા શૃણોતીદં બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૪.૫૮॥

ન સ્થૂલોઽપ્યનણુર્ન તેજમરુતામાકાશનીરક્ષ્મા
ભૂતાન્તર્ગતકોશકાશહૃદયાદ્યાકાશમાત્રાક્રમૈઃ ।
ઉદ્ગ્રન્થશ્રુતિશાસ્ત્રસૂત્રકરણૈઃ કિઞ્ચિજ્જ્ઞ સર્વજ્ઞતા
બુદ્ધ્યા મોહિતમાયયા શ્રુતિશતૈર્ભો જાનતે શઙ્કરમ્ ॥ ૪.૫૯॥

॥ ઇતિ શ્રી શિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદો

નામ ચતુર્થોઽધ્યાયઃ ॥

## ૫. શિવેન કુમારોપદેશવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ

નિદાઘઃ -
એવં સ્થિતે ઋભો કો વૈ બ્રહ્મભાવાય કલ્પતે ।
તન્મે વદ વિશેષેણ જ્ઞાનં શઙ્કરવાક્યજમ્ ॥ ૫.૧॥

ઋભુઃ -
ત્વમેવ બ્રહ્મ એવાસિ ત્વમેવ પરમો ગુરુઃ ।
ત્વમેવાકાશરૂપોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨॥

ત્વમેવ સર્વભાવોઽસિ ત્વમેવાર્થસ્ત્વમવ્યયઃ ।
ત્વં સર્વહીનસ્ત્વં સાક્ષી સાક્ષિહીનોઽસિ સર્વદા ॥ ૫.૩॥

કાલસ્ત્વં સર્વહીનસ્ત્વં સાક્ષિહીનોઽસિ સર્વદા ।
કાલહીનોઽસિ કાલોઽસિ સદા બ્રહ્માસિ ચિદ્ઘનઃ ।
સર્વતત્ત્વસ્વરૂપોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૪॥

સત્યોઽસિ સિદ્ધોઽસિ સનાતનોઽસિ મુક્તોઽસિ મોક્ષોઽસિ સદાઽમૃતોઽસિ ।
દેવોઽસિ શાન્તોઽસિ નિરામયોઽસિ બ્રહ્માસિ પૂર્ણોઽસિ પરાવરોઽસિ ॥ ૫.૫॥

સમોઽસિ સચ્ચાસિ સનાતનોઽસિ સત્યાદિવાક્યૈઃ પ્રતિપાદિતોઽસિ ।
સર્વાઙ્ગહીનોઽસિ સદાસ્થિતોઽસિ બ્રહ્માસિ
પૂર્ણોઽસિ પરાવરોઽસિ (પરાપરોઽસિ) ॥ ૫.૬॥

સર્વપ્રપઞ્ચભ્રમવર્જિતોઽસિ સર્વેષુ ભૂતેષુ સદોદિતોઽસિ ।
સર્વત્ર સઙ્કલ્પવિવર્જિતોઽસિ બ્રહ્માસિ પૂર્ણોઽસિ પરાવરોઽસિ ॥ ૫.૭॥

સર્વત્ર સન્તોષસુખાસનોઽસિ સર્વત્ર વિદ્વેષવિવર્જિતોઽસિ ।
સર્વત્ર કાર્યાદિવિવર્જિતોઽસિ બ્રહ્માસિ પૂર્ણોઽસિ પરાવરોઽસિ ॥ ૫.૮॥

ચિદાકારસ્વરૂપોઽસિ ચિન્માત્રોઽસિ નિરઙ્કુશઃ ।
આત્મન્યેવાવસ્થિતોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૯॥

આનન્દોઽસિ પરોઽસિ ત્વં સર્વશૂન્યોઽસિ નિર્ગુણઃ ।
એક એવાદ્વિતીયોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૦॥

ચિદ્ઘનાનન્દરૂપોઽસિ ચિદાનન્દોઽસિ સર્વદા ।

પરિપૂર્ણસ્વરૂપોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૧॥

તદસિ ત્વમસિ જ્ઞોઽસિ સોઽસિ જાનાસિ વીક્ષ્યસિ ।
ચિદસિ બ્રહ્મભૂતોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૨॥

અમૃતોઽસિ વિભુશ્ચાસિ દેવોઽસિ ત્વં મહાનસિ ।
ચઞ્ચલોષ્ઠકલઙ્કોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૩॥

સર્વોઽસિ સર્વહીનોઽસિ શાન્તોઽસિ પરમો હ્યસિ ।
કારણં ત્વં પ્રશાન્તોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૪॥

સત્તામાત્રસ્વરૂપોઽસિ સત્તાસામાન્યકો હ્યસિ ।
નિત્યશુદ્ધસ્વરૂપોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૫॥

ઈષણ્માત્રવિહીનોઽસિ અણુમાત્રવિવર્જિતઃ ।
અસ્તિત્વવર્જિતોઽસિ ત્વં નાસ્તિત્વાદિવિવર્જિતઃ ॥ ૫.૧૬॥

યોઽસિ સોઽસિ મહાન્તોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૭॥

લક્ષ્યલક્ષણહીનોઽસિ ચિન્માત્રોઽસિ નિરામયઃ ।
અખણ્ડૈકરસો નિત્યં ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૮॥

સર્વાધારસ્વરૂપોઽસિ સર્વતેજઃ સ્વરૂપકઃ ।
સર્વાર્થભેદહીનોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૧૯॥

બ્રહ્મૈવ ભેદશૂન્યોઽસિ વિપ્લુત્યાદિવિવર્જિતઃ ।
શિવોઽસિ ભેદહીનોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૦॥

પ્રજ્ઞાનવાક્યહીનોઽસિ સ્વસ્વરૂપં પ્રપશ્યસિ ।
સ્વસ્વરૂપસ્થિતોઽસિ ત્વં ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૧॥

સ્વસ્વરૂપાવશેષોઽસિ સ્વસ્વરૂપો મતો હ્યસિ ।
સ્વાનન્દસિન્ધુમગ્નોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૨॥

સ્વાત્મરાજ્યે ત્વમેવાસિ સ્વયમાત્માનમો (સ્વયમત્મતમો) હ્યસિ ।
સ્વયં પૂર્ણસ્વરૂપોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૩॥

સ્વસ્મિન્સુખે સ્વયઞ્ચાસિ સ્વસ્માત્કિઞ્ચિન્ન પશ્યસિ ।
સ્વાત્મન્યાકાશવદ્ભાસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૪॥

સ્વસ્વરૂપાન્ન ચલસિ સ્વસ્વરૂપાન્ન પશ્યસિ ।

સ્વસ્વરૂપામૃતોઽસિ ત્વં ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૫॥

સ્વસ્વરૂપેણ ભાસિ ત્વં સ્વસ્વરૂપેણ જૃમ્ભસિ ।
સ્વસ્વરૂપાદનન્યોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૬॥

સ્વયં સ્વયં સદાઽસિ ત્વં સ્વયં સર્વત્ર પશ્યસિ ।
સ્વસ્મિન્સ્વયં સ્વયં ભુઙ્ક્ષે ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫.૨૭॥

સૂતઃ -
તદા નિધાઘવચસા તુષ્ટો ઋભુરુવાચ તમ્ ।
શિવપ્રેમરસે પાત્રં તં વીક્ષ્યાબ્જજનન્દનઃ ॥ ૫.૨૮॥

ઋભુઃ -
કૈલાસે શઙ્કરઃ પુત્રં કદાચિદુપદિષ્ટવાન્ ।
તદેવ તે પ્રવક્ષ્યામિ સાવધાનમનાઃ શ‍ૃણુ ॥ ૫.૨૯॥

અયં પ્રપઞ્ચો નાસ્ત્યેવ નોત્પન્નો ન સ્વતઃ ક્વચિત્ ।
ચિત્રપ્રપઞ્ચ ઇત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૦॥

ન પ્રપઞ્ચો ન ચિત્તાદિ નાહઙ્કારો ન જીવકઃ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૧॥

માયકાર્યાદિકં નાસ્તિ માયાકાર્યભયન્નહિ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૨॥

કર્તા નાસ્તિ ક્રિયા નાસ્તિ કરણં નાસ્તિ પુત્રક ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૩॥

એકં નાસ્તિ દ્વયં નાસ્તિ મન્ત્રતન્ત્રાદિકઞ્ચ ન ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૪॥

શ્રવણં મનનં નાસ્તિ નિદિધ્યાસનવિભ્રમઃ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૫॥

સમાધિદ્વિવિધં નાસ્તિ માતૃમાનાદિ નાસ્તિ હિ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૬॥

અજ્ઞાનં ચાપિ નાસ્ત્યેવ અવિવેકકથા ન ચ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૭॥

અનુબન્ધચતુષ્કઞ્ચ સમ્બન્ધત્રયમેવ ન ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૮॥

ભૂતં ભવિષ્યન્ન ક્વાપિ વર્તમાનં ન વૈ ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૯॥

ગઙ્ગા ગયા તથા સેતુવ્રતં વા નાન્યદસ્તિ હિ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૦॥

ન ભૂમિર્ન જલં વહ્નિર્ન વાયુર્ન ચ ખં ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૧॥

નૈવ દેવા ન દિક્પાલા ન પિતા ન ગુરુઃ ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૨॥

ન દૂરં નાન્તિકં નાન્તં ન મધ્યં ન ક્વચિત્ સ્થિતિઃ ।
નાદ્વૈતદ્વૈતસત્યત્વમસત્યં વા ઇદં ન ચ ॥ ૫.૪૩॥

ન મોક્ષોઽસ્તિ ન બન્ધોઽસ્તિ ન વાર્તાવસરોઽસ્તિ હિ ।
ક્વચિદ્વા કિઞ્ચિદેવં વા સદસદ્વા સુખાનિ ચ ॥ ૫.૪૪॥

દ્વન્દ્વં વા તીર્થધર્માદિ આત્માનાત્મેતિ ન ક્વચિત્ ।
ન વૃદ્ધિર્નોદયો મૃત્યુર્ન ગમાગમવિભ્રમઃ ॥ ૫.૪૫॥

ઇહ નાસ્તિ પરં નાસ્તિ ન ગુરુર્ન ચ શિષ્યકઃ ।
સદસન્નાસ્તિ ભૂર્નાસ્તિ કાર્યં નાસ્તિ કૃતં ચ ન ॥ ૫.૪૬॥

જાતિર્નાસ્તિ ગતિર્નાસ્તિ વર્ણો નાસ્તિ ન લૌકિકમ્ ।
શમાદિષટ્કં નાસ્ત્યેવ નિયમો વા યમોઽપિ વા ॥ ૫.૪૭॥

સર્વં મિથ્યેતિ નાસ્ત્યેવ બ્રહ્મ ઇત્યેવ નાસ્તિ હિ ।
ચિદિત્યેવ હિ નાસ્ત્યેવ ચિદહં ભાષણં ન હિ ॥ ૫.૪૮॥

અહમિત્યેવ નાસ્ત્યેવ નિત્યોઽસ્મીતિ ચ ન ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વથા ॥ ૫.૪૯॥

વાચા યદુચ્યતે કિઞ્ચિન્મનસા મનુતે ચ યત્ ।
બુદ્ધ્યા નિશ્ચીયતે યચ્ચ ચિત્તેન જ્ઞાયતે હિ યત્ ॥ ૫.૫૦॥

યોગેન યુજ્યતે યચ્ચ ઇન્દ્રિયાદ્યૈશ્ચ યત્કૃતમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્તિઞ્ચ સ્વપ્નં વા ન તુરીયકમ્ ॥ ૫.૫૧॥

સર્વં નાસ્તીતિ વિજ્ઞેયં યદુપાધિવિનિશ્ચિતમ્ ।
સ્નાનાચ્છુદ્ધિર્ન હિ ક્વાપિ ધ્યાનાચ્શુદ્ધિર્ન હિ ક્વચિત્ ॥ ૫.૫૨॥

ગુણત્રયં નાસ્તિ કિઞ્ચિદ્ગુણત્રયમથાપિ વા ।
એકદ્વિત્વપદં નાસ્તિ ન બહુભ્રમવિભ્રમઃ ॥ ૫.૫૩॥

ભ્રાન્ત્યભ્રાન્તિ ચ નાસ્ત્યેવ કિઞ્ચિન્નાસ્તીતિ નિશ્ચિનુ ।
કેવલં બ્રહ્મમાત્રત્વાન્ન કિઞ્ચિદવશિષ્યતે ॥ ૫.૫૪॥

ઇદં શૃણોતિ યઃ સમ્યક્સ બ્રહ્મ ભવતિ સ્વયમ્ ॥ ૫.૫૫॥

- -

ઈશ્વરઃ -

વારાશ્યમ્બુનિ બુદ્બુદા ઇવ ઘનાનન્દામ્બુધાવપ્યુમા-
કાન્તેઽનન્તજગદ્ગતં સુરનરં જાતં ચ તિર્યઙ્ મુહુઃ ।
ભૂતં ચાપિ ભવિષ્યતિ પ્રતિભવં માયામયં ચોર્મિજં
સમ્યઙ્ મામનુપશ્યતામનુભવૈર્નાસ્ત્યેવ તેષાં ભવઃ ॥ ૫.૫૬॥

હરં વિજ્ઞાતારં નિખિલતનુકાર્યેષુ કરણં
ન જાનન્તે મોહાદ્યમિતકરણા અપ્યતિતરામ્ ।
ઉમાનાથાકારં હૃદયદહરાન્તર્ગતસરા-
પયોજાતે ભાસ્વદ્ભવભુજગનાશાણ્ડજવરમ્ ॥ ૫.૫૭॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
શિવેન કુમારોપદેશવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥

## ૬. પ્રપઞ્ચસ્ય સચ્ચિન્મયત્વકથનં નામ ષષ્ઠોઽધ્યાયઃ

ઈશ્વરઃ -

વ્રતાનિ મિથ્યા ભુવનાનિ મિથ્યા
ભાવાદિ મિથ્યા ભવનાનિ મિથ્યા ।
ભયં ચ મિથ્યા ભરણાદિ મિથ્યા
ભુક્તં ચ મિથ્યા બહુબન્ધમિથ્યા ॥ ૬.૧॥

વેદાશ્ચ મિથ્યા વચનાનિ મિથ્યા
વાક્યાનિ મિથ્યા વિવિધાનિ મિથ્યા ।
વિત્તાનિ (વિજ્ઞાન) મિથ્યા વિયદાદિ મિથ્યા

વિધુશ્ચ મિથ્યા વિષયાદિ મિથ્યા ॥ ૬.૨॥

ગુરુશ્ચ મિથ્યા ગુણદોષમિથ્યા
ગુહ્યં ચ મિથ્યા ગણના ચ મિથ્યા ।
ગતિશ્ચ મિથ્યા ગમનં ચ મિથ્યા
સર્વં ચ મિથ્યા ગદિતં ચ મિથ્યા ॥ ૬.૩॥

વેદશાસ્ત્રપુરાણં ચ કાર્યં કારણમીશ્વરઃ ।
લોકો ભૂતં જનં ચૈવ સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૪॥

બન્ધો મોક્ષઃ સુખં દુઃખં ધ્યાનં ચિત્તં સુરાસુરાઃ ।
ગૌણં મુખ્યં પરં ચાન્યત્સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૫॥

વાચા વદતિ યત્કિઞ્ચિત્સર્વં મિથ્યા ન સંશયઃ ।
સઙ્કલ્પાત્કલ્પ્યતે યદ્યન્મનસા ચિન્ત્યતે ચ યત્ ॥ ૬.૬॥

બુદ્ધ્યા નિશ્ચીયતે કિઞ્ચિચ્ચિત્તેન નીયતે ક્વચિત્ ।
પ્રપઞ્ચે પઞ્ચતે યદ્યત્સર્વં મિથ્યેતિ નિશ્ચયઃ ॥ ૬.૭॥

શ્રોત્રેણ શ્રૂયતે યદ્યન્નેત્રેણ ચ નિરીક્ષ્યતે ।
નેત્રં શ્રોત્રં ગાત્રમેવ સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૮॥

ઇદમિત્યેવ નિર્દિષ્ટમિદમિત્યેવ કલ્પિતમ્ ।
યદ્યદ્વસ્તુ પરિજ્ઞાતં સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૯॥

કોઽહં કિન્તદિદં સોઽહં અન્યો વાચયતે નહિ ।
યદ્યત્સમ્ભાવ્યતે લોકે સર્વં મિથ્યેતિ નિશ્ચયઃ ॥ ૬.૧૦॥

સર્વાભ્યાસ્યં સર્વગોપ્યં સર્વકારણવિભ્રમઃ ।
સર્વભૂતેતિ વાર્તા ચ મિથ્યેતિ ચ વિનિશ્ચયઃ ॥ ૬.૧૧॥

સર્વભેદપ્રભેદો વા સર્વસઙ્કલ્પવિભ્રમઃ ।
સર્વદોષપ્રભેદશ્ચ સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૧૨॥

રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મસૃષ્ટેસ્તુ કારણમ્ ।
સંહારે શિવ ઇત્યેવં સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૧૩॥

સ્નાનં જપસ્તપો હોમઃ સ્વાધ્યાયો દેવપૂજનમ્ ।
મન્ત્રો ગોત્રં ચ સત્સઙ્ગઃ સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૧૪॥

સર્વં મિથ્યા જગન્મિથ્યા ભૂતં ભવ્યં ભવત્તથા ।

નાસ્તિ નાસ્તિ વિભાવેન સર્વં મિથ્યા ન સંશયઃ ॥ ૬.૧૫॥

ચિત્તભેદો જગદ્ભેદઃ અવિદ્યાયાશ્ચ સમ્ભવઃ ।
અનેકકોટિબ્રહ્માણ્ડાઃ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૧૬॥

લોકત્રયેષુ સદ્ભાવો ગુણદોષાદિજૃમ્ભણમ્ ।
સર્વદેશિકવાર્તોક્તિઃ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૧૭॥

ઉત્કૃષ્ટં ચ નિકૃષ્ટં ચ ઉત્તમં મધ્યમં ચ તત્ ।
ૐકારં ચાપ્યકારઞ્ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૧૮॥

યદ્યજ્જગતિ દૃશ્યેત યદ્યજ્જગતિ વીક્ષ્યતે ।
યદ્યજ્જગતિ વર્તેત સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૧૯॥

યેન કેનાક્ષરેણોક્તં યેન કેનાપિ સઙ્ગતમ્ ।
યેન કેનાપિ નીતં તત્સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૨૦॥

યેન કેનાપિ ગદિતં યેન કેનાપિ મોદિતમ્ ।
યેન કેનાપિ ચ પ્રોક્તં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૨૧॥

યેન કેનાપિ યદ્દત્તં યેન કેનાપિ યત્કૃતમ્ ।
યત્ર કુત્ર જલસ્નાનં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૬.૨૨॥

યત્ર યત્ર શુભં કર્મ યત્ર યત્ર ચ દુષ્કૃતમ્ ।
યદ્યત્કરોષિ સત્યેન સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૬.૨૩॥

ઇદં સર્વમહં સર્વં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
યત્કિઞ્ચિત્પ્રતિભાતં ચ સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૬.૨૪॥

ઋભુઃ -
પુનર્વક્ષ્યે રહસ્યાનાં રહસ્યં પરમાદ્ભુતમ્ ।
શઙ્કરેણ કુમારાય પ્રોક્તં કૈલાસ પર્વતે ॥ ૬.૨૫॥

તન્માત્રં સર્વચિન્માત્રમખણ્ડૈકરસં સદા ।
એકવર્જિતચિન્માત્રં સર્વં ચિન્મયમેવ હિ ॥ ૬.૨૬॥

ઇદં ચ સર્વં ચિન્માત્રં સર્વં ચિન્મયમેવ હિ ।
આત્માભાસં ચ ચિન્માત્રં સર્વં
ચિન્મયમેવ હિ (ચિન્માત્રાન્નાસ્તિ કિઞ્ચન) ॥ ૬.૨૭॥

સર્વલોકં ચ ચિન્માત્રં સર્વં ચિન્મયમેવ હિ ।

ત્વત્તા મત્તા ચ ચિન્માત્રં ચિન્માત્રાન્નાસ્તિ કિઞ્ચન ॥ ૬.૨૮॥

આકાશો ભૂર્જલં વાયુરગ્નિર્બ્રહ્મા હરિઃ શિવઃ ।
યત્કિઞ્ચિદન્યત્કિઞ્ચિચ્ચ સર્વં ચિન્મયમેવ હિ ॥ ૬.૨૯॥

અખણ્ડૈકરસં સર્વં યદ્યચ્ચિન્માત્રમેવ હિ ।
ભૂતં ભવ્યં ચ ચિન્માત્રં સર્વં ચિન્મયમેવ હિ ॥ ૬.૩૦॥

દ્રવ્યં કાલશ્ચ ચિન્માત્રં જ્ઞાનં ચિન્મયમેવ ચ ।
જ્ઞેયં જ્ઞાનં ચ ચિન્માત્રં સર્વં ચિન્મયમેવ હિ ॥ ૬.૩૧॥

સમ્ભાષણં ચ ચિન્માત્રં વાક્ચ ચિન્માત્રમેવ હિ ।
અસચ્ચ સચ્ચ ચિન્માત્રં સર્વં ચિન્મયમેવ હિ ॥ ૬.૩૨॥

આદિરન્તં ચ ચિન્માત્રં અસ્તિ ચેચ્ચિન્મયં સદા ।
બ્રહ્મા યદ્યપિ ચિન્માત્રં વિષ્ણુશ્ચિન્માત્રમેવ હિ ॥ ૬.૩૩॥

રુદ્રોઽપિ દેવાશ્ચિન્માત્રં અસ્તિ નરતિર્યક્સુરાસુરમ્ ।
ગુરુશિષ્યાદિ સન્માત્રં જ્ઞાનં ચિન્માત્રમેવ હિ ॥ ૬.૩૪॥

દૃગ્દૃશ્યં ચાપિ ચિન્માત્રં જ્ઞાતા જ્ઞેયં ધ્રુવાધ્રુવમ્ ।
સર્વાશ્ચર્યં ચ ચિન્માત્રં દેહં ચિન્માત્રમેવ હિ ॥ ૬.૩૫॥

લિઙ્ગં ચાપિ ચ ચિન્માત્રં કારણં કાર્યમેવ ચ ।
મૂર્તામૂર્તં ચ ચિન્માત્રં પાપપુણ્યમથાપિ ચ ॥ ૬.૩૬॥

દ્વૈતાદ્વૈતં ચ ચિન્માત્રં વેદવેદાન્તમેવ ચ ।
દિશોઽપિ વિદિશશ્ચૈવ ચિન્માત્રં તસ્ય પાલકાઃ ॥ ૬.૩૭॥

ચિન્માત્રં વ્યવહારાદિ ભૂતં ભવ્યં ભવત્તથા ।
ચિન્માત્રં નામરૂપં ચ ભૂતાનિ ભુવનાનિ ચ ॥ ૬.૩૮॥

ચિન્માત્રં પ્રાણ એવેહ ચિન્માત્રં સર્વમિન્દ્રિયમ્ ।
ચિન્માત્રં પઞ્ચકોશાદિ ચિન્માત્રાનન્દમુચ્યતે ॥ ૬.૩૯॥

નિત્યાનિત્યં ચ ચિન્માત્રં સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રં નાસ્તિ નિત્યં ચ ચિન્માત્રં નાસ્તિ સત્યકમ્ ॥ ૬.૪૦॥

ચિન્માત્રમપિ વૈરાગ્યં ચિન્માત્રકમિદં કિલ ।
આધારાદિ હિ ચિન્માત્રં આધેયં ચ મુનીશ્વર ॥ ૬.૪૧॥

યચ્ચ યાવચ્ચ ચિન્માત્રં યચ્ચ યાવચ્ચ દૃશ્યતે ।
યચ્ચ યાવચ્ચ દૂરસ્થં સર્વં ચિન્માત્રમેવ હિ ॥ ૬.૪૨॥

યચ્ચ યાવચ્ચ ભૂતાનિ યચ્ચ યાવચ્ચ વક્ષ્યતે ।
યચ્ચ યાવચ્ચ વેદોક્તં સર્વં ચિન્માત્રમેવ હિ ॥ ૬.૪૩॥

ચિન્માત્રં નાસ્તિ બન્ધં ચ ચિન્માત્રં નાસ્તિ મોક્ષકમ્ ।
ચિન્માત્રમેવ સન્માત્રં સત્યં સત્યં શિવં સ્પૃશે ॥ ૬.૪૪॥

સર્વં વેદત્રયપ્રોક્તં સર્વં ચિન્માત્રમેવ હિ ।

- -

(ઋભુ)ઃ -
શિવપ્રોક્તં કુમારાય તદેતત્કથિતં ત્વયિ ।
યઃ શૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૬.૪૫॥

સૂતઃ -
ઈશાવાસ્યાદિમન્ત્રૈર્વરગગનતનોઃ ક્ષેત્રવાસાર્થવાદૈઃ
તલ્લિઙ્ગાગારમધ્યસ્થિતસુમહદીશાન લિઙ્ગેષુ પૂજા ।
અક્લેદ્યે ચાભિષેકો ??? ??? ??? દિગ્વાસસે વાસદાનં
નો ગન્ધઘ્રાણહીને રૂપદૃશ્યાદ્વિહીને ગન્ધપુષ્પાર્પણાનિ ॥ ૬.૪૬॥

સ્વભાસે દીપદાનં ??? સર્વભક્ષે મહેશે
નૈવેદ્યં નિત્યતૃપ્તે સકલભુવનગે પ્રક્રમો વા નમસ્યા ।
કુર્યાં કેનાપિ ભાવૈર્મમ નિગમશિરોભાવ એવ પ્રમાણમ્ ॥ ૬.૪૭॥

અવિચ્છિન્નૈશ્છિન્નૈઃ પરિકરવરૈઃ પૂજનધિયા
ભજન્ત્યજ્ઞાસ્તદ્જ્ઞાઃ (તદજ્ઞાઃ) વિધિવિહિતબુદ્ધ્યાગતધિયઃ ।
તથાપીશં ભાવૈર્ભજતિ ભજતામાત્મપદવીં
દદાતીશો વિશ્વં ભ્રમયતિ ગતજ્ઞાંશ્ચ કુરુતે ॥ ૬.૪૮॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
પ્રપઞ્ચસ્ય સચ્ચિન્મયત્વકથનં નામ ષષ્ઠોઽધ્યાયઃ ॥

## ૭. સ્વાત્મનિરૂપણં નામ સપ્તમોઽધ્યાયઃ

ઋભુઃ -
અત્યદ્ભુતં પ્રવક્ષ્યામિ સર્વલોકેષુ દુર્લભમ્ ।

વેદશાસ્ત્રમહાસારં દુર્લભં દુર્લભં સદા ॥ ૭.૧॥

અખણ્ડૈકરસો મન્ત્રમખણ્ડૈકરસં ફલમ્ ।
અખણ્ડૈકરસો જીવ અખણ્ડૈકરસા ક્રિયા ॥ ૭.૨॥

અખણ્ડૈકરસા ભૂમિરખણ્ડૈકરસં જલમ્ ।
અખણ્ડૈકરસો ગન્ધ અખણ્ડૈકરસં વિયત્ ॥ ૭.૩॥

અખણ્ડૈકરસં શાસ્ત્રં અખણ્ડૈકરસં શ્રુતિઃ ।
અખણ્ડૈકરસં બ્રહ્મ અખણ્ડૈકરસં વ્રતમ્ ॥ ૭.૪॥

અખણ્ડૈકરસો વિષ્ણુરખણ્ડૈકરસઃ શિવઃ ।
અખણ્ડૈકરસો બ્રહ્મા અખણ્ડૈકરસાઃ સુરાઃ ॥ ૭.૫॥

અખણ્ડૈકરસં સર્વમખણ્ડૈકરસઃ સ્વયમ્ ।
અખણ્ડૈકરસશ્ચાત્મા અખણ્ડૈકરસો ગુરુઃ ॥ ૭.૬॥

અખણ્ડૈકરસં વાચ્યમખણ્ડૈકરસં મહઃ ।
અખણ્ડૈકરસં દેહ અખણ્ડૈકરસં મનઃ ॥ ૭.૭॥

અખણ્ડૈકરસં ચિત્તં અખણ્ડૈકરસં સુખમ્ ।
અખણ્ડૈકરસા વિદ્યા અખણ્ડૈકરસોઽવ્યયઃ ॥ ૭.૮॥

અખણ્ડૈકરસં નિત્યમખણ્ડૈકરસઃ પરઃ ।
અખણ્ડૈકરસાત્કિઞ્ચિદખણ્ડૈકરસાદહમ્ ॥ ૭.૯॥

અખણ્ડૈકરસં વાસ્તિ અખણ્ડૈકરસં ન હિ ।
અખણ્ડૈકરસાદન્યતખણ્ડૈકરસાત્પરઃ ॥ ૭.૧૦॥

અખણ્ડૈકરસાત્સ્થૂલં અખણ્ડૈકરસં જનઃ ।
અખણ્ડૈકરસં સૂક્ષ્મમખણ્ડૈકરસં દ્વયમ્ ॥ ૭.૧૧॥

અખણ્ડૈકરસં નાસ્તિ અખણ્ડૈકરસં બલમ્ ।
અખણ્ડૈકરસાદ્વિષ્ણુરખણ્ડૈકરસાદણુઃ ॥ ૭.૧૨॥

અખણ્ડૈકરસં નાસ્તિ અખણ્ડૈકરસાદ્ભવાન્ ।
અખણ્ડૈકરસો હ્યેવ અખણ્ડૈકરસાદિતમ્ ॥ ૭.૧૩॥

અખણ્ડિતરસાજ્જ્ઞાનં અખણ્ડિતરસાત્સ્થિતમ્ ।
અખણ્ડૈકરસા લીલા (લીના) અખણ્ડૈકરસઃ પિતા ॥ ૭.૧૪॥

અખણ્ડૈકરસા ભક્તા અખણ્ડૈકરસઃ પતિઃ ।
અખણ્ડૈકરસા માતા અખણ્ડૈકરસો વિરાટ્ ॥ ૭.૧૫॥

અખણ્ડૈકરસં ગાત્રં અખણ્ડૈકરસં શિરઃ ।
અખણ્ડૈકરસં ઘ્રાણં અખણ્ડૈકરસં બહિઃ ॥ ૭.૧૬॥

અખણ્ડૈકરસં પૂર્ણમખણ્ડૈકરસામૃતમ્ ।
અખણ્ડૈકરસં શ્રોત્રમખણ્ડૈકરસં ગૃહમ્ ॥ ૭.૧૭॥

અખણ્ડૈકરસં ગોપ્યમખણ્ડૈકરસઃ શિવઃ ।
અખણ્ડૈકરસં નામ અખણ્ડૈકરસો રવિઃ ॥ ૭.૧૮॥

અખણ્ડૈકરસઃ સોમઃ અખણ્ડૈકરસો ગુરુઃ ।
અખણ્ડૈકરસઃ સાક્ષી અખણ્ડૈકરસઃ સુહૃત્ ॥ ૭.૧૯॥

અખણ્ડૈકરસો બન્ધુરખણ્ડૈકરસોઽસ્મ્યહમ્ ।
અખણ્ડૈકરસો રાજા અખણ્ડૈકરસં પુરમ્ ॥ ૭.૨૦॥

અખણ્ડૈકરસૈશ્વર્યં અખણ્ડૈકરસં પ્રભુઃ ।
અખણ્ડૈકરસો મન્ત્ર અખણ્ડૈકરસો જપઃ ॥ ૭.૨૧॥

અખણ્ડૈકરસં ધ્યાનમખણ્ડૈકરસં પદમ્ ।
અખણ્ડૈકરસં ગ્રાહ્યમખણ્ડૈકરસં મહાન્ ॥ ૭.૨૨॥

અખણ્ડૈકરસં જ્યોતિરખણ્ડૈકરસં પરમ્ ।
અખણ્ડૈકરસં ભોજ્યમખણ્ડૈકરસં હવિઃ ॥ ૭.૨૩॥

અખણ્ડૈકરસો હોમઃ અખણ્ડૈકરસો જયઃ ।
અખણ્ડૈકરસઃ સ્વર્ગઃ અખણ્ડૈકરસઃ સ્વયમ્ ॥ ૭.૨૪॥

અખણ્ડૈકરસાકારાદન્યન્નાસ્તિ નહિ ક્વચિત્ ।
શ‍ૃણુ ભૂયો મહાશ્ચર્યં નિત્યાનુભવસમ્પદમ્ ॥ ૭.૨૫॥

દુર્લભં દુર્લભં લોકે સર્વલોકેષુ દુર્લભમ્ ।
અહમસ્મિ પરં ચાસ્મિ પ્રભાસ્મિ પ્રભવોઽસ્મ્યહમ્ ॥ ૭.૨૬॥

સર્વરૂપગુરુશ્ચાસ્મિ સર્વરૂપોઽસ્મિ સોઽસ્મ્યહમ્ ।
અહમેવાસ્મિ શુદ્ધોઽસ્મિ ઋદ્ધોઽસ્મિ પરમોઽસ્મ્યહમ્ ॥ ૭.૨૭॥

અહમસ્મિ સદા જ્ઞોઽસ્મિ સત્યોઽસ્મિ વિમલોઽસ્મ્યહમ્ ।
વિજ્ઞાનોઽસ્મિ વિશેષોઽસ્મિ સામ્યોઽસ્મિ સકલોઽસ્મ્યહમ્ ॥ ૭.૨૮॥

શુદ્ધોઽસ્મિ શોકહીનોઽસ્મિ ચૈતન્યોઽસ્મિ સમોઽસ્મ્યહમ્ ।
માનાવમાનહીનોઽસ્મિ નિર્ગુણોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૭.૨૯॥

દ્વૈતાદ્વૈતવિહીનોઽસ્મિ દ્વન્દ્વહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
ભાવાભાવવિહીનોઽસ્મિ ભાષાહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૦॥

શૂન્યાશૂન્યપ્રભાવોઽસ્મિ શોભનોઽસ્મિ મનોઽસ્મ્યહં (મહોઽસ્મ્યહં) ।
તુલ્યાતુલ્યવિહીનોઽસ્મિ તુચ્છભાવોઽસ્મિ નાસ્મ્યહમ્ ॥ ૭.૩૧॥

સદા સર્વવિહીનોઽસ્મિ સાત્ત્વિકોઽસ્મિ સદાસ્મ્યહમ્ ।
એકસઙ્ખ્યાવિહીનોઽસ્મિ દ્વિસઙ્ખ્યા નાસ્તિ નાસ્મ્યહમ્ ॥ ૭.૩૨॥

સદસદ્ભેદહીનોઽસ્મિ સઙ્કલ્પરહિતોઽસ્મ્યહમ્ ।
નાનાત્મભેદહીનોઽસ્મિ યત્કિઞ્ચિન્નાસ્તિ સોઽસ્મ્યહમ્ ॥ ૭.૩૩॥

નાહમસ્મિ ન ચાન્યોઽસ્મિ દેહાદિરહિતોઽસ્મ્યહમ્ ।
આશ્રયાશ્રયહીનોઽસ્મિ આધારરહિતોઽસ્મ્યહમ્ ॥ ૭.૩૪॥

બન્ધમોક્ષાદિહીનોઽસ્મિ શુદ્ધબ્રહ્માદિ સોઽસ્મ્યહમ્ ।
ચિત્તાદિસર્વહીનોઽસ્મિ પરમોઽસ્મિ પરોઽસ્મ્યહમ્ ॥ ૭.૩૫॥

સદા વિચારરૂપોઽસ્મિ નિર્વિચારોઽસ્મિ સોઽસ્મ્યહમ્ ।
આકારાદિસ્વરૂપોઽસ્મિ ઉકારોઽસ્મિ મુદોઽસ્મ્યહમ્ ॥ ૭.૩૬॥

ધ્યાનાધ્યાનવિહીનોઽસ્મિ ધ્યેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
પૂર્ણાત્પૂર્ણોઽસ્મિ પૂર્ણોઽસ્મિ સર્વપૂર્ણોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૭॥

સર્વાતીતસ્વરૂપોઽસ્મિ પરં બ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ।
લક્ષ્યલક્ષણહીનોઽસ્મિ લયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૮॥

માતૃમાનવિહીનોઽસ્મિ મેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
અગત્સર્વં ચ દ્રષ્ટાસ્મિ નેત્રાદિરહિતોઽસ્મ્યહમ્ ॥ ૭.૩૯॥

પ્રવૃદ્ધોઽસ્મિ પ્રબુદ્ધોઽસ્મિ પ્રસન્નોઽસ્મિ પરોઽસ્મ્યહમ્ ।
સર્વેન્દ્રિયવિહીનોઽસ્મિ સર્વકર્મહિતોઽસ્મ્યહમ્ ॥ ૭.૪૦॥

સર્વવેદાન્તતૃપ્તોઽસ્મિ સર્વદા સુલભોઽસ્મ્યહમ્ ।
મુદા મુદિતશૂન્યોઽસ્મિ સર્વમૌનફલોઽસ્મ્યહમ્ ॥ ૭.૪૧॥

નિત્યચિન્માત્રરૂપોઽસ્મિ સદસચ્ચિન્મયોઽસ્મ્યહમ્ ।

યત્કિઞ્ચિદપિ હીનોઽસ્મિ સ્વલ્પમપ્યતિ નાહિતમ્ ॥ ૭.૪૨॥

હૃદયગ્રન્થિહીનોઽસ્મિ હૃદયાદ્વ્યાપકોઽસ્મ્યહમ્ ।
ષડ્વિકારવિહીનોઽસ્મિ ષટ્કોશરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૩॥

અરિષડ્વર્ગમુક્તોઽસ્મિ અન્તરાદન્તરોઽસ્મ્યહમ્ ।
દેશકાલવિહીનોઽસ્મિ દિગમ્બરમુખોઽસ્મ્યહમ્ ॥ ૭.૪૪॥

નાસ્તિ હાસ્તિ વિમુક્તોઽસ્મિ નકારરહિતોઽસ્મ્યહમ્ ।
સર્વચિન્માત્રરૂપોઽસ્મિ સચ્ચિદાનન્દમસ્મ્યહમ્ ॥ ૭.૪૫॥

અખણ્ડાકારરૂપોઽસ્મિ અખણ્ડાકારમસ્મ્યહમ્ ।
પ્રપઞ્ચચિત્તરૂપોઽસ્મિ પ્રપઞ્ચરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૬॥

સર્વપ્રકારરૂપોઽસ્મિ સદ્ભાવાવર્જિતોઽસ્મ્યહમ્ ।
કાલત્રયવિહીનોઽસ્મિ કામાદિરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૭॥

કાયકાયિવિમુક્તોઽસ્મિ નિર્ગુણપ્રભવોઽસ્મ્યહમ્ ।
મુક્તિહીનોઽસ્મિ મુક્તોઽસ્મિ મોક્ષહીનોઽસ્મ્યહં સદા ॥ ૭.૪૮॥

સત્યાસત્યવિહીનોઽસ્મિ સદા સન્માત્રમસ્મ્યહમ્ ।
ગન્તવ્યદેશહીનોઽસ્મિ ગમનારહિતોઽસ્મ્યહમ્ ॥ ૭.૪૯॥

સર્વદા સ્મરરૂપોઽસ્મિ શાન્તોઽસ્મિ સુહિતોઽસ્મ્યહમ્ ।
એવં સ્વાનુભવં પ્રોક્તં એતત્પ્રકરણં મહત્ ॥ ૭.૫૦॥

યઃ શ્ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
પિણ્ડાણ્ડસમ્ભવજગદ્ધતખણ્ડનોદ્યદ્વેતણ્ડશુણ્ડનિભપીવરબાહુદણ્ડ ।
બ્રહ્મોરુમુણ્ડકલિતાણ્ડજવાહબાણ કોદણ્ડભૂધરધરં
ભજતામખણ્ડમ્ ॥ ૭.૫૧॥

વિશ્વાત્મન્યદ્વિતીયે ભગવતિ ગિરિજાનાયકે કાશરૂપે
નીરૂપે વિશ્વરૂપે ગતદુરિતધિયઃ પ્રાપ્નુવન્ત્યાત્મભાવમ્ ।
અન્યે ભેદધિયઃ શ્રુતિપ્રકથિતૈર્વર્ણાશ્રમોત્થશ્રમૈઃ
તાન્તાઃ શાન્તિવિવર્જિતા વિષયિણો દુઃખં ભજન્ત્યન્વહમ્ ॥ ૭.૫૨॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સ્વાત્મનિરૂપણં નામ સપ્તમોઽધ્યાયઃ ॥

# ૮. પ્રપઞ્ચશૂન્યત્વ-સર્વનાસ્તિત્વનિરુપણં નામ અષ્ટમોઽધ્યાયઃ

ઋભુઃ -

વક્ષ્યે પ્રપઞ્ચશૂન્યત્વં શશશ◌ૃઙ્ગેણ સમ્મિતમ્ ।
દુર્લભં સર્વલોકેષુ સાવધાનમનાઃ શ◌ૃણુ ॥ ૮.૧॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યઃ શ◌ૃણોતિ ચ પશ્યતિ ।
દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૮.૨॥

ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ।
અહઙ્કારશ્ચ તેજશ્ચ સર્વં શશવિષાણવત્ ॥ ૮.૩॥

નાશ જન્મ ચ સત્યં ચ લોકં ભુવનમણ્ડલમ્ ।
પુણ્યં પાપં જયો મોહઃ સર્વં શશવિષાણવત્ ॥ ૮.૪॥

કામક્રોધૌ લોભમોહૌ મદમોહૌ રતિર્ધૃતિઃ ।
ગુરુશિષ્યોપદેશાદિ સર્વં શશવિષાણવત્ ॥ ૮.૫॥

અહં ત્વં જગદિત્યાદિ આદિરન્તિમમધ્યમમ્ ।
ભૂતં ભવ્યં વર્તમાનં સર્વં શશવિષાણવત્ ॥ ૮.૬॥

સ્થૂલદેહં સૂક્ષ્મદેહં કારણં કાર્યમપ્યયમ્ ।
દૃશ્યં ચ દર્શનં કિઞ્ચિત્સર્વં શશવિષાણવત્ ॥ ૮.૭॥

ભોક્તા ભોજ્યં ભોગરૂપં લક્ષ્યલક્ષણમદ્વયમ્ ।
શમો વિચારઃ સન્તોષઃ સર્વં શશવિષાણવત્ ॥ ૮.૮॥

યમં ચ નિયમં ચૈવ પ્રાણાયામાદિભાષણમ્ ।
ગમનં ચલનં ચિત્તં સર્વં શશવિષાણવત્ ॥ ૮.૯॥

શ્રોત્રં નેત્રં ગાત્રગોત્રં ગુહ્યં જાડ્યં હરિઃ શિવઃ ।
આદિરન્તો મુમુક્ષા ચ સર્વં શશવિષાણવત્ ॥ ૮.૧૦॥

જ્ઞાનેન્દ્રિયં ચ તન્માત્રં કર્મેન્દ્રિયગણં ચ યત્ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ સર્વં શશવિષાણવત્ ॥ ૮.૧૧॥

ચતુર્વિંશતિતત્ત્વં ચ સાધનાનાં ચતુષ્ટયમ્ ।
સજાતીયં વિજાતીયં સર્વં શશવિષાણવત્ ॥ ૮.૧૨॥

સર્વલોકં સર્વભૂતં સર્વધર્મં સતત્વકમ્ ।
સર્વાવિદ્યા સર્વવિદ્યા સર્વં શશવિષાણવત્ ॥ ૮.૧૩॥

સર્વવર્ણઃ સર્વજાતિઃ સર્વક્ષેત્રં ચ તીર્થકમ્ ।
સર્વવેદં સર્વશાસ્ત્રં સર્વં શશવિષાણવત્ ॥ ૮.૧૪॥

સર્વબન્ધં સર્વમોક્ષં સર્વવિજ્ઞાનમીશ્વરઃ ।
સર્વકાલં (સર્વવાક્યં) સર્વબોધ (સર્વબોધ્યં)
સર્વં શશવિષાણવત્ ॥ ૮.૧૫॥

સર્વાસ્તિત્વં સર્વકર્મ સર્વસઙ્ગયુતિર્મહાન્ ।
સર્વદ્વૈતમસદ્ભાવં (સર્વદ્વૈતસ્ય સદ્ભાવં)
સર્વં શશવિષાણવત્ ॥ ૮.૧૬॥

સર્વવેદાન્તસિદ્ધાન્તઃ સર્વશાસ્ત્રાર્થનિર્ણયઃ ।
સર્વજીવત્વસદ્ભાવં સર્વં શશવિષાણવત્ ॥ ૮.૧૭॥

યદ્યત્સંવેદ્યતે કિઞ્ચિદ્યદ્યજ્જગતિ દૃશ્યતે ।
યદ્યચ્છૃણોતિ ગુરુણા સર્વં શશવિષાણવત્ ॥ ૮.૧૮॥

યદ્યદ્ધ્યાયતિ ચિત્તે ચ યદ્યત્સઙ્કલ્પ્યતે ક્વચિત્ ।
બુદ્ધ્યા નિશ્ચીયતે યચ્ચ સર્વં શશવિષાણવત્ ॥ ૮.૧૯॥

યદ્યદ્વાચા વ્યાકરોતિ યદ્વાચા ચાર્થભાષણમ્ ।
યદ્યત્સર્વેન્દ્રિયૈર્ભાવ્યં સર્વં શશવિષાણવત્ ॥ ૮.૨૦॥

યદ્યત્સન્ત્યજ્યતે વસ્તુ યચ્છૃણોતિ ચ પશ્યતિ ।
સ્વકીયમન્યદીયં ચ સર્વં શશવિષાણવત્ ॥ ૮.૨૧॥

સત્યત્વેન ચ યદ્ભાતિ વસ્તુત્વેન રસેન ચ ।
યદ્યત્સઙ્કલ્પ્યતે ચિત્તે સર્વં શશવિષાણવત્ ॥ ૮.૨૨॥

યદ્યદાત્મેતિ નિર્ણીતં યદ્યન્નિત્યમિતં વચઃ ।
યદ્યદ્વિચાર્યતે ચિત્તે સર્વં શશવિષાણવત્ ॥ ૮.૨૩॥

શિવઃ સંહરતે નિત્યં વિષ્ણુઃ પાતિ જગત્ત્રયમ્ ।
(શિવો રક્ષતિ માં નિત્યં)
સ્રષ્ટા સૃજતિ લોકાન્વૈ સર્વં શશવિષાણવત્ ॥ ૮.૨૪॥

જીવ ઇત્યપિ યદ્યસ્તિ ભાષયત્યપિ ભાષણમ્ ।
સંસાર ઇતિ યા વાર્તા સર્વં શશવિષાણવત્ ॥ ૮.૨૫॥

યદ્યદસ્તિ પુરાણેષુ યદ્યદ્વેદેષુ નિર્ણયઃ ।
સર્વોપનિષદાં ભાવં સર્વં શશવિષાણવત્ ॥ ૮.૨૬॥

શશશ‍ૃઙ્ગવદેવેદમુક્તં પ્રકરણં તવ ।
યઃ શ‍ૃણોતિ રહસ્યં વૈ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૮.૨૭॥

ભૂયઃ શ‍ૃણુ નિદાઘ ત્વં સર્વં બ્રહ્મેતિ નિશ્ચયમ્ ।
સુદુર્લભમિદં નૃણાં દેવાનામપિ સત્તમ ॥ ૮.૨૮॥

ઇદમિત્યપિ યદ્રૂપમહમિત્યપિ યત્પુનઃ ।
દૃશ્યતે યત્તદેવેદં સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૨૯॥

દેહોઽયમિતિ સઙ્કલ્પસ્તદેવ ભયમુચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૦॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદન્તઃકરણં સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૧॥

દેહોઽહમિતિ સઙ્કલ્પઃ સ હિ સંસાર ઉચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૨॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદ્બન્ધનમિહોચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૩॥

દેહોઽહમિતિ યજ્જ્ઞાનં તદેવ નરકં સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૪॥

દેહોઽહમિતિ સઙ્કલ્પો જગત્સર્વમિતીર્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૫॥

દેહોઽહમિતિ સઙ્કલ્પો હૃદયગ્રન્થિરીરિતઃ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૬॥

દેહત્રયેઽપિ ભાવં યત્તદ્દેહજ્ઞાનમુચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૭॥

દેહોઽહમિતિ યદ્ભાવં સદસદ્ભાવમેવ ચ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૮॥

દેહોઽહમિતિ સઙ્કલ્પં (સઙ્કલ્પઃ) તત્પ્રપઞ્ચમિહોચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૩૯॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદેવાજ્ઞાનમુચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૦॥

દેહોઽહમિતિ યા બુદ્ધિર્મલિના વાસનોચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૧॥

દેહોઽહમિતિ યા બુદ્ધિઃ સત્યં જીવઃ સ એવ સઃ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૨॥

દેહોઽહમિતિ સઙ્કલ્પો મહાનરકમીરિતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૩॥

દેહોઽહમિતિ યા બુદ્ધિર્મન એવેતિ નિશ્ચિતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૪॥

દેહોઽહમિતિ યા બુદ્ધિઃ પરિચ્છિન્નમિતીર્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૫॥

દેહોઽહમિતિ યજ્જ્ઞાનં સર્વં શોક ઇતીરિતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૬॥

દેહોઽહમિતિ યજ્જ્ઞાનં સંસ્પર્શમિતિ કથ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૭॥

દેહોઽહમિતિ યા બુદ્ધિસ્તદેવ મરણં સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૮॥

દેહોઽહમિતિ યા બુદ્ધિસ્તદેવાશોભનં સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૪૯॥

દેહોઽહમિતિ યા બુદ્ધિર્મહાપાપમિતિ સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૫૦॥

દેહોઽહમિતિ યા બુદ્ધિઃ તુષ્ટા સૈવ હિ ચોચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૫૧॥

દેહોઽહમિતિ સઙ્કલ્પઃ સર્વદોષમિતિ સ્મૃતમ્ ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૫૨॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદેવ મલમુચ્યતે ।

કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૫૩॥

દેહોઽહમિતિ સઙ્કલ્પો મહત્સંશયમુચ્યતે ।
કાલત્રયેઽપિ તન્નાસ્તિ સર્વં બ્રહ્મેતિ કેવલમ્ ॥ ૮.૫૪॥

યત્કિઞ્ચિત્સ્મરણં દુઃખં યત્કિઞ્ચિત્સ્મરણં જગત્ ।
યત્કિઞ્ચિત્સ્મરણં કામો યત્કિઞ્ચિત્સ્મરણં મલમ્ ॥ ૮.૫૫॥

યત્કિઞ્ચિત્સ્મરણં પાપં યત્કિઞ્ચિત્સ્મરણં મનઃ ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં મહારોગેતિ કથ્યતે ॥ ૮.૫૬॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં મહામોહેતિ કથ્યતે ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં તાપત્રયમુદાહૃતમ્ ॥ ૮.૫૭॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં કામક્રોધં ચ કથ્યતે ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં સમ્બન્ધો નેતરત્ક્વચિત્ ॥ ૮.૫૮॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં સર્વદુઃખેતિ નેતરત્ ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં જગત્સત્યત્વવિભ્રમમ્ ॥ ૮.૫૯॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં મહાદોષં ચ નેતરત્ ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં કાલત્રયમુદીરિતમ્ ॥ ૮.૬૦॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં નાનારૂપમુદીરિતમ્ ।
યત્ર યત્ર ચ સઙ્કલ્પં તત્ર તત્ર મહજ્જગત્ ॥ ૮.૬૧॥

યત્ર યત્ર ચ સઙ્કલ્પં તદેવાસત્યમેવ હિ ।
યત્કિઞ્ચિદપિ સઙ્કલ્પં તજ્જગન્નાસ્તિ સંશયઃ ॥ ૮.૬૨॥

યત્કિઞ્ચિદપિ સઙ્કલ્પં તત્સર્વં નેતિ નિશ્ચયઃ ।
મન એવ જગત્સર્વં મન એવ મહારિપુઃ ॥ ૮.૬૩॥

મન એવ હિ સંસારો મન એવ જગત્ત્રયમ્ ।
મન એવ મહાદુઃખં મન એવ જરાદિકમ્ ॥ ૮.૬૪॥

મન એવ હિ કાલં ચ મન એવ મલં સદા ।
મન એવ હિ સઙ્કલ્પો મન એવ હિ જીવકઃ ॥ ૮.૬૫॥

મન એવાશુચિર્નિત્યં મન એવેન્દ્રજાલકમ્ ।
મન એવ સદા મિથ્યા મનો વન્ધ્યાકુમારવત્ ॥ ૮.૬૬॥

મન એવ સદા નાસ્તિ મન એવ જડં સદા ।
મન એવ હિ ચિત્તં ચ મનોઽહઙ્કારમેવ ચ ॥ ૮.૬૭॥

મન એવ મહદ્બન્ધં મનોઽન્તઃકરણં ક્વચિત્ ।
મન એવ હિ ભૂમિશ્ચ મન એવ હિ તોયકમ્ ॥ ૮.૬૮॥

મન એવ હિ તેજશ્ચ મન એવ મરુન્મહાન્ ।
મન એવ હિ ચાકાશો મન એવ હિ શબ્દકઃ ॥ ૮.૬૯॥

મન એવ સ્પર્શરૂપં મન એવ હિ રૂપકમ્ ।
મન એવ રસાકારં મનો ગન્ધઃ પ્રકીર્તિતઃ ॥ ૮.૭૦॥

અન્નકોશં મનોરૂપં પ્રાણકોશં મનોમયમ્ ।
મનોકોશં મનોરૂપં વિજ્ઞાનં ચ મનોમયઃ ॥ ૮.૭૧॥

મન એવાનન્દકોશં મનો જાગ્રદવસ્થિતમ્ ।
મન એવ હિ સ્વપ્નઞ્ચ મન એવ સુષુપ્તિકમ્ ॥ ૮.૭૨॥

મન એવ હિ દેવાદિ મન એવ યમાદયઃ ।
મન એવ હિ યત્કિઞ્ચિન્મન એવ મનોમયઃ ॥ ૮.૭૩॥

મનોમયમિદં વિશ્વં મનોમયમિદં પુરમ્ ।
મનોમયમિદં ભૂતં મનોમયમિદં દ્વયમ્ ॥ ૮.૭૪॥

મનોમયમિયં જાતિર્મનોમયમયં ગુણઃ ।
મનોમયમિદં દૃશ્યં મનોમયમિદં જડમ્ ॥ ૮.૭૫॥

મનોમયમિદં યદ્યન્મનો જીવ ઇતિ સ્થિતમ્ ।
સઙ્કલ્પમાત્રમજ્ઞાનં ભેદઃ સઙ્કલ્પ એવ હિ ॥ ૮.૭૬॥

સઙ્કલ્પમાત્રં વિજ્ઞાનં દ્વન્દ્વં સઙ્કલ્પ એવ હિ ।
સઙ્કલ્પમાત્રકાલં ચ દેશં સઙ્કલ્પમેવ હિ ॥ ૮.૭૭॥

સઙ્કલ્પમાત્રો દેહશ્ચ પ્રાણઃ સઙ્કલ્પમાત્રકઃ ।
સઙ્કલ્પમાત્રં મનનં સઙ્કલ્પં શ્રવણં સદા ॥ ૮.૭૮॥

સઙ્કલ્પમાત્રં નરકં સઙ્કલ્પં સ્વર્ગ ઇત્યપિ ।
સઙ્કલ્પમેવ ચિન્માત્રં સઙ્કલ્પં ચાત્મચિન્તનમ્ ॥ ૮.૭૯॥

સઙ્કલ્પં વા મનાક્તત્ત્વં બ્રહ્મસઙ્કલ્પમેવ હિ ।
સઙ્કલ્પ એવ યત્કિઞ્ચિત્તન્નાસ્ત્યેવ કદાચન ॥ ૮.૮૦॥

નાસ્તિ નાસ્ત્યેવ સઙ્કલ્પં નાસ્તિ નાસ્તિ જગત્રયમ્ ।
નાસ્તિ નાસ્તિ ગુરુર્નાસ્તિ નાસ્તિ શિષ્યોઽપિ વસ્તુતઃ ॥ ૮.૮૧॥

નાસ્તિ નાસ્તિ શરીરં ચ નાસ્તિ નાસ્તિ મનઃ ક્વચિત્ ।
નાસ્તિ નાસ્ત્યેવ કિઞ્ચિદ્વા નાસ્તિ નાસ્ત્યખિલં જગત્ ॥ ૮.૮૨॥

નાસ્તિ નાસ્ત્યેવ ભૂતં વા સર્વં નાસ્તિ ન સંશયઃ ।
“” સર્વં નાસ્તિ “” પ્રકરણં મયોક્તં ચ નિદાઘ તે ।
યઃ શ‍ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૮.૮૩॥

વેદાન્તૈરપિ ચન્દ્રશેખરપદામ્ભોજાનુરાગાદરા-
દારોદારકુમારદારનિકરૈઃ પ્રાણૈર્વનૈરુજ્ઝિતઃ ।
ત્યાગાદ્યો મનસા સકૃત્શિવપદધ્યાનેન યત્પ્રાપ્યતે
તન્નૈવાપ્યતિ શબ્દતર્કનિવહૈઃ શાન્તં મનસ્તદ્ભવેત્ ॥ ૮.૮૪॥

અશેષદૃશ્યોજ્ઝિતદૃઙ્મયાનાં સઙ્કલ્પવર્જેન સદાસ્થિતાનામ્ ।
ન જાગ્રતઃ સ્વપ્નસુષુપ્તિભાવો ન જીવનં નો મરણં ચ ચિત્રમ્ ॥ ૮.૮૫॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
પ્રપઞ્ચશૂન્યત્વ-સર્વનાસ્તિત્વનિરૂપણં નામ અષ્ટમોઽધ્યાયઃ ॥

## ૯. અહમ્બ્રહ્માસ્મિપ્રકરણનિરૂપણં નામ નવમોઽધ્યાયઃ

નિદાઘઃ-
કુત્ર વા ભવતા સ્નાનં ક્રિયતે નિતરાં ગુરો ।
સ્નાનમન્ત્રં સ્નાનકાલં તર્પણં ચ વદસ્વ મે ॥ ૯.૧॥

ઋભુઃ -
આત્મસ્નાનં મહાસ્નાનં નિત્યસ્નાનં ન ચાન્યતઃ ।
ઇદમેવ મહાસ્નાનં અહં બ્રહ્માસ્મિ નિશ્ચયઃ ॥ ૯.૨॥

પરબ્રહ્મસ્વરૂપોઽહં પરમાનન્દમસ્મ્યહમ્ ।
ઇદમેવ મહાસ્નાનં અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૯.૩॥

કેવલં જ્ઞાનરૂપોઽહં કેવલં પરમોઽસ્મ્યહમ્ ।
કેવલં શાન્તરૂપોઽહં કેવલં નિર્મલોઽસ્મ્યહમ્ ॥ ૯.૪॥

કેવલં નિત્યરૂપોઽહં કેવલં શાશ્વતોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૫॥

કેવલં સર્વરૂપોઽહં અહન્ત્યક્તોઽહમસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૬॥

સર્વહીનસ્વરૂપોઽહં ચિદાકાશોઽહમસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૭॥

કેવલં તુર્યરૂપોઽસ્મિ તુર્યાતીતોઽસ્મિ કેવલમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૮॥

સદા ચૈતન્યરૂપોઽસ્મિ સચ્ચિદાનન્દમસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૯॥

કેવલાકારરૂપોઽસ્મિ શુદ્ધરૂપોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૦॥

કેવલં જ્ઞાનશુદ્ધોઽસ્મિ કેવલોઽસ્મિ પ્રિયોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૧॥

કેવલં નિર્વિકલ્પોઽસ્મિ સ્વસ્વરૂપોઽહમસ્મિ હ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૨॥

સદા સત્સઙ્ગરૂપોઽસ્મિ સર્વદા પરમોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૩॥

સદા હ્યેકસ્વરૂપોઽસ્મિ સદાઽનન્યોઽસ્મ્યહં સુખમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૪॥

અપરિચ્છિન્નરૂપોઽહં અનન્તાનન્દમસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૫॥

સત્યાનન્દસ્વરૂપોઽહં ચિત્પરાનન્દમસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૬॥

અનન્તાનન્દરૂપોઽહમવાઙ્માનસગોચરઃ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૭॥

બ્રહ્માનદસ્વરૂપોઽહં સત્યાનન્દોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૮॥

આત્મમાત્રસ્વરૂપોઽસ્મિ આત્માનન્દમયોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૧૯॥

આત્મપ્રકાશરૂપોઽસ્મિ આત્મજ્યોતિરસોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૦॥

આદિમધ્યાન્તહીનોઽસ્મિ આકાશસદૃશોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૧॥

નિત્યસત્તાસ્વરૂપોઽસ્મિ નિત્યમુક્તોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૨॥

નિત્યસમ્પૂર્ણરૂપોઽસ્મિ નિત્યં નિર્મનસોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૩॥

નિત્યસત્તાસ્વરૂપોઽસ્મિ નિત્યમુક્તોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૪॥

નિત્યશબ્દસ્વરૂપોઽસ્મિ સર્વાતીતોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૫॥

રૂપાતીતસ્વરૂપોઽસ્મિ વ્યોમરૂપોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૬॥

ભૂતાનન્દસ્વરૂપોઽસ્મિ ભાષાનન્દોઽસ્મ્યહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૭॥

સર્વાધિષ્ઠાનરૂપોઽસ્મિ સર્વદા ચિદ્ઘનોઽસ્મ્યહમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૮॥

દેહભાવવિહીનોઽહં ચિત્તહીનોઽહમેવ હિ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૨૯॥

દેહવૃત્તિવિહીનોઽહં મન્ત્રૈવાહમહં સદા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૦॥

સર્વદૃશ્યવિહીનોઽસ્મિ દૃશ્યરૂપોઽહમેવ હિ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૧॥

સર્વદા પૂર્ણરૂપોઽસ્મિ નિત્યતૃપ્તોઽસ્મ્યહં સદા ।

ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૨॥

ઇદં બ્રહ્મૈવ સર્વસ્ય અહં ચૈતન્યમેવ હિ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૩॥

અહમેવાહમેવાસ્મિ નાન્યત્કિઞ્ચિચ્ચ વિદ્યતે ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૪॥

અહમેવ મહાનાત્મા અહમેવ પરાયણમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૫॥

અહમેવ મહાશૂન્યમિત્યેવં મન્ત્રમુત્તમમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૬॥

અહમેવાન્યવદ્ભામિ અહમેવ શરીરવત્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૭॥

અહં ચ શિષ્યવદ્ભામિ અહં લોકત્રયાદિવત્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૮॥

અહં કાલત્રયાતીતઃ અહં વેદૈરુપાસિતઃ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૩૯॥

અહં શાસ્ત્રેષુ નિર્ણીત અહં ચિત્તે વ્યવસ્થિતઃ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૪૦॥

મત્ત્યક્તં નાસ્તિ કિઞ્ચિદ્વા મત્ત્યક્તં પૃથિવી ચ યા ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૪૧॥

મયાતિરિક્તં તોયં વા ઇત્યેવં મન્ત્રમુત્તમમ્ ।
ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯.૪૨॥

અહં બ્રહ્માસ્મિ શુદ્ધોઽસ્મિ નિત્યશુદ્ધોઽસ્મ્યહં સદા ।
નિર્ગુણોઽસ્મિ નિરીહોઽસ્મિ ઇત્યેવં મન્ત્રમુત્તમમ્ ॥ ૯.૪૩॥

હરિબ્રહ્માદિરૂપોઽસ્મિ એતદ્ભેદોઽપિ નાસ્મ્યહમ્ ।
કેવલં બ્રહ્મમાત્રોઽસ્મિ કેવલોઽસ્મ્યજયોઽસ્મ્યહમ્ ॥ ૯.૪૪॥

સ્વયમેવ સ્વયમ્ભાસ્યં સ્વયમેવ હિ નાન્યતઃ ।
સ્વયમેવાત્મનિ સ્વસ્થઃ ઇત્યેવં મન્ત્રમુત્તમમ્ ॥ ૯.૪૫॥

સ્વયમેવ સ્વયં ભુઙ્ક્ષ્વ સ્વયમેવ સ્વયં રમે ।
સ્વયમેવ સ્વયઞ્જ્યોતિઃ સ્વયમેવ સ્વયં રમે ॥ ૯.૪૬॥

સ્વસ્યાત્મનિ સ્વયં રંસ્યે સ્વાત્મન્યેવાવલોકયે ।
સ્વાત્મન્યેવ સુખેનાસિ (સ્મ)ઇત્યેવં મન્ત્રમુત્તમમ્ ॥ ૯.૪૭॥

સ્વચૈતન્યે સ્વયં સ્થાસ્યે સ્વાત્મરાજ્યે સુખં રમે ।
સ્વાત્મસિંહાસને તિષ્ઠે ઇત્યેવં મન્ત્રમુત્તમમ્ ॥ ૯.૪૮॥

સ્વાત્મમન્ત્રં સદા પશ્યન્સ્વાત્મજ્ઞાનં સદાઽભ્યસન્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સ્વાત્મપાપં વિનાશયેત્ ॥ ૯.૪૯॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રો દ્વૈતદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો ભેદદુઃખં વિનાશયેત્ ॥ ૯.૫૦॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રશ્ચિન્તારોગં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો બુદ્ધિવ્યાધિં વિનાશયેત્ ॥ ૯.૫૧॥

અહં બ્રહ્માસ્મ્યહં મન્ત્ર આધિવ્યાધિં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સર્વલોકં વિનાશયેત્ ॥ ૯.૫૨॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ કામદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ ક્રોધદોષં વિનાશયેત્ ॥ ૯.૫૩॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રશ્ચિન્તાદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સઙ્કલ્પં ચ વિનાશયેત્ ॥ ૯.૫૪॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ ઇદં દુઃખં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અવિવેકમલં દહેત્ ॥ ૯.૫૫॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અજ્ઞાનધ્વંસમાચરેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ કોટિદોષં વિનાશયેત્ ॥ ૯.૫૬॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ સર્વતન્ત્રં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો દેહદોષં વિનાશયેત્ ॥ ૯.૫૭॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ દૃષ્ટાદૃષ્ટં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્ર આત્મજ્ઞાનપ્રકાશકમ્ ॥ ૯.૫૮॥

અહં બ્રહ્માસ્મ્યહં મન્ત્ર આત્મલોકજયપ્રદમ્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્ર અસત્યાદિ વિનાશકમ્ ॥ ૯.૫૯॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અન્યત્સર્વં વિનાશયેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્ર અપ્રતર્ક્યસુખપ્રદમ્ ॥ ૯.૬૦॥

અહં બ્રહ્માસ્મ્યહં મન્ત્રઃ અનાત્મજ્ઞાનમાહરેત્ ।
અહં બ્રહ્માસ્મ્યહં મન્ત્રો જ્ઞાનાનન્દં પ્રયચ્છતિ ॥ ૯.૬૧॥

સપ્તકોટિમહામન્ત્રા જન્મકોટિશતપ્રદાઃ ।
સર્વમન્ત્રાન્સમુત્સૃજ્ય જપમેનં સમભ્યસેત્ ॥ ૯.૬૨॥

સદ્યો મોક્ષમવાપ્નોતિ નાત્ર સન્દેહમસ્તિ મે ।
મન્ત્રપ્રકરણે પ્રોક્તં રહસ્યં વેદકોટિષુ ॥ ૯.૬૩॥

યઃ શ ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
નિત્યાનન્દમયઃ સ એવ પરમાનન્દોદયઃ શાશ્વતો
    યસ્માન્નાન્યદતોઽન્યદાર્તમખિલં તજ્જં જગત્સર્વદઃ ।
યો વાચા મનસા તથેન્દ્રિયગણૈર્દેહોઽપિ વેદ્યો ન ચેદચ્છેદ્યો
    ભવવૈદ્ય ઈશ ઇતિ યા સા ધીઃ પરં મુક્તયે ॥ ૯.૬૪॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    અહમ્બ્રહ્માસ્મિપ્રકરણનિરૂપણં નામ નવમોઽધ્યાયઃ ॥

## ૧૦. બ્રહ્મતર્પણાત્મહોમાખ્ય પ્રકરણદ્વયવર્ણનં નામ દશમોઽધ્યાયઃ

ઋભુઃ -
નિત્યતર્પણમાચક્ષ્યે નિદાઘ શ ૃણુ મે વચઃ ।
વેદશાસ્ત્રેષુ સર્વેષુ અત્યન્તં દુર્લભં નૃણામ્ ॥ ૧૦.૧॥

સદા પ્રપઞ્ચં નાસ્ત્યેવ ઇદમિત્યપિ નાસ્તિ હિ ।
બ્રહ્મમાત્રં સદાપૂર્ણં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨॥

સરૂપમાત્રં બ્રહ્મૈવ સચ્ચિદાનન્દમપ્યહમ્ ।
આનન્દઘન એવાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૩॥

સર્વદા સર્વશૂન્યોઽહં સદાત્માનન્દવાનહમ્ ।
નિત્યાનિત્યસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૪॥

અહમેવ ચિદાકાશ આત્માકાશોઽસ્મિ નિત્યદા ।

આત્મનાઽઽત્મનિ તૃપ્તોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૫॥

એકત્વસઙ્ખ્યાહીનોઽસ્મિ અરૂપોઽસ્મ્યહમદ્વયઃ ।
નિત્યશુદ્ધસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૬॥

આકાશાદપિ સૂક્ષ્મોઽહં અત્યન્તાભાવકોઽસ્મ્યહમ્ ।
સર્વપ્રકાશરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૭॥

પરબ્રહ્મસ્વરૂપોઽહં પરાવરસુખોઽસ્મ્યહમ્ ।
સત્રામાત્રસ્વરૂપોઽહં દૃગ્દૃશ્યાદિવિવર્જિતઃ ॥ ૧૦.૮॥

યત્કિઞ્ચિદપ્યહં નાસ્તિ તૂષ્ણીં તૂષ્ણીમિહાસ્મ્યહમ્ ।
શુદ્ધમોક્ષસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૯॥

સર્વાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દમહં સદા ।
વિજ્ઞાનમાત્રરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૦॥

બ્રહ્મમાત્રમિદં સર્વં નાસ્તિ નાન્યત્ર તે શપે ।
તદેવાહં ન સન્દેહઃ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૧॥

ત્વમિત્યેતત્તદિત્યેતન્નાસ્તિ નાસ્તીહ કિઞ્ચન ।
શુદ્ધચૈતન્યમાત્રોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૨॥

અત્યન્તાભાવરૂપોઽહમહમેવ પરાત્પરઃ ।
અહમેવ સુખં નાન્યદિત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૩॥

ઇદં હેમમયં કિઞ્ચિન્નાસ્તિ નાસ્ત્યેવ તે શપે ।
નિર્ગુણાનન્દરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૪॥

સાક્ષિવસ્તુવિહીનત્વાત્ સાક્ષિત્વં નાસ્તિ મે સદા ।
કેવલં બ્રહ્મભાવત્વાદિત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૫॥

અહમેવાવિશેષોઽહમહમેવ હિ નામકમ્ ।
અહમેવ વિમોહં વૈ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૬॥

ઇન્દ્રિયાભાવરૂપોઽહં સર્વાભાવસ્વરૂપકમ્ ।
બન્ધમુક્તિવિહીનોઽસ્મિ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૭॥

સર્વાનન્દસ્વરૂપોઽહં સર્વાનન્દઘનોઽસ્મ્યહમ્ ।
નિત્યચૈતન્યમાત્રોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૮॥

વાચામગોચરશ્ચાહં વાઙ્મનો નાસ્તિ કિઞ્ચન ।
ચિદાનન્દમયશ્ચાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૯॥

સર્વત્ર પૂર્ણરૂપોઽહં સર્વત્ર સુખમસ્મ્યહમ્ ।
સર્વત્રાચિન્ત્યરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૦॥

સર્વત્ર તૃપ્તિરૂપોઽહં સર્વાનન્દમયોઽસ્મ્યહમ્ ।
સર્વશૂન્યસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૧॥

સર્વદા મત્સ્વરૂપોઽહં પરમાનન્દવાનહમ્ ।
એક એવાહમેવાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૨॥

મુક્તોઽહં મોક્ષરૂપોઽહં સર્વમૌનપરોઽસ્મ્યહમ્ ।
સર્વનિર્વાણરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૩॥

સર્વદા સત્સ્વરૂપોઽહં સર્વદા તુર્યવાનહમ્ ।
તુર્યાતીતસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૪॥

સત્યવિજ્ઞાનમાત્રોઽહં સન્માત્રાનન્દવાનહમ્ ।
નિર્વિકલ્પસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૫॥

સર્વદા હ્યજરૂપોઽહં નિરીહોઽહં નિરઞ્જનઃ ।
બ્રહ્મવિજ્ઞાનરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૬॥

બ્રહ્મતર્પણમેવોક્તં એતત્પ્રકરણં મયા ।
યઃ શ‍ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૦.૨૭॥

નિત્યહોમં પ્રવક્ષ્યામિ સર્વવેદેષુ દુર્લભમ્ ।
સર્વશાસ્ત્રાર્થમદ્વૈતં સાવધાનમનાઃ શ‍ૃણુ ॥ ૧૦.૨૮॥

અહં બ્રહ્માસ્મિ શુદ્ધોઽસ્મિ નિત્યોઽસ્મિ પ્રભુરસ્મ્યહમ્ ।
ૐકારાર્થસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૨૯॥

પરમાત્મસ્વરૂપોઽસ્મિ પરાનન્દપરોઽસ્મ્યહમ્ ।
ચિદાનન્દસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૦॥

નિત્યાનન્દસ્વરૂપોઽસ્મિ નિષ્કલઙ્કમયો હ્યહમ્ ।
ચિદાકારસ્વરૂપોઽહં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૧॥

ન હિ કિઞ્ચિત્સ્વરૂપોઽસ્મિ નાહમસ્મિ ન સોઽસ્મ્યહમ્ ।
નિર્વ્યાપારસ્વરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૨॥

નિરંશોઽસ્મિ નિરાભાસો ન મનો નેન્દ્રિયોઽસ્મ્યહમ્ ।
ન બુદ્ધિર્ન વિકલ્પોઽહં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૩ ॥

ન દેહાદિસ્વારૂપોઽસ્મિ ત્રયાદિપરિવર્જિતઃ ।
ન જાગ્રત્સ્વપ્નરૂપોઽસ્મિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૪ ॥

શ્રવણં મનનં નાસ્તિ નિદિધ્યાસનમેવ હિ ।
સ્વગતં ચ ન મે કિઞ્ચિદેવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૫ ॥

અસત્યં હિ મનઃસત્તા અસત્યં બુદ્ધિરૂપકમ્ ।
અહઙ્કારમસદ્વિદ્ધિ કાલત્રયમસત્ સદા ॥ ૧૦.૩૬ ॥

ગુણત્રયમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૭ ॥

શ્રુતં સર્વમસદ્વિદ્ધિ વેદં સર્વમસત્સદા ।
સર્વતત્ત્વમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૮ ॥

નાનારૂપમસદ્વિદ્ધિ નાનાવર્ણમસત્સદા ।
નાનાજાતિમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૩૯ ॥

શાસ્ત્રજ્ઞાનમસદ્વિદ્ધિ વેદજ્ઞાનં તપોઽપ્યસત્ ।
સર્વતીર્થમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૦ ॥

ગુરુશિષ્યમસદ્વિદ્ધિ ગુરોર્મન્ત્રમસત્તતઃ ।
યદ્દૃશ્યં તદસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૧ ॥

સર્વાન્ભોગાનસદ્વિદ્ધિ યચ્ચિન્ત્યં તદસત્સદા ।
યદ્દૃશ્યં તદસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૨ ॥

સર્વેન્દ્રિયમસદ્વિદ્ધિ સર્વમન્ત્રમસત્ત્વિતિ ।
સર્વપ્રાણાનસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૩ ॥

જીવં દેહમસદ્વિદ્ધિ પરે બ્રહ્મણિ નૈવ હિ ।
મયિ સર્વમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૪ ॥

દૃષ્ટં શ્રુતમસદ્વિદ્ધિ ઓતં પ્રોતમસન્મયિ ।
કાર્યાકાર્યમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૫ ॥

દૃષ્ટપ્રાપ્તિમસદ્વિદ્ધિ સન્તોષમસદેવ હિ ।
સર્વકર્માણ્યસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૬ ॥

સર્વાસર્વમસદ્વિદ્ધિ પૂર્ણાપૂર્ણમસત્પરે ।
સુખં દુઃખમસદ્વિદ્ધિ એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૪૭॥

યથાધર્મમસદ્વિદ્ધિ પુણ્યાપુણ્યમસત્સદા ।
લાભાલાભમસદ્વિદ્ધિ સદા (દાનં) દેહમસત્સદા ॥ ૧૦.૪૮॥

સદા જયમસદ્વિદ્ધિ સદા ગર્વમસત્સદા ।
મનોમયમસદ્વિદ્ધિ સંશયં નિશ્ચયં તથા ॥ ૧૦.૪૯॥

શબ્દં સર્વમસદ્વિદ્ધિ સ્પર્શં સર્વમસત્સદા ।
રૂપં સર્વમસદ્વિદ્ધિ રસં સર્વમસત્સદા ॥ ૧૦.૫૦॥

ગન્ધં સર્વમસદ્વિદ્ધિ જ્ઞાનં સર્વમસત્સદા ।
ભૂતં ભવ્યમસદ્વિદ્ધિ અસત્પ્રકૃતિરુચ્યતે ॥ ૧૦.૫૧॥

અસદેવ સદા સર્વમસદેવ ભવોદ્ભવમ્ ।
અસદેવ ગુણં સર્વં એવં હોમં સુદુર્લભમ્ ॥ ૧૦.૫૨॥

શશશૃઙ્ગવદેવ ત્વં શશશૃઙ્ગવદસ્મ્યહમ્ ।
શશશૃઙ્ગવદેવેદં શશશૃઙ્ગવદન્તરમ્ ॥ ૧૦.૫૩॥

ઇત્યેવમાત્મહોમાખ્યમુક્તં પ્રકરણં મયા ।
યઃ શૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૦.૫૪॥

સ્કન્દઃ -
યસ્મિન્સઞ્ચ વિચૈતિ વિશ્વમખિલં દ્યોતન્તિ સૂર્યેન્દવો
વિદ્યુદ્વહ્નિમરુદ્ગણાઃ સવરુણા ભીતા ભજન્તીશ્વરમ્ ।
ભૂતઞ્ચાપિ ભવત્યદૃશ્યમખિલં શમ્ભોઃ સુખાંશં જગત્
જાતં ચાપિ જનિષ્યતિ પ્રતિભવં દેવાસુરૈર્નિર્યપિ (દેવાસુરૈરીતિતં) ।
તન્નેહાસ્તિ ન કિઞ્ચિદત્ર ભગવદ્ધ્યાનાન્ન કિઞ્ચિત્પ્રિયમ્ ॥ ૧૦.૫૫॥

યઃ પ્રાણાપાનભેદૈર્મનનધિયા ધારણાપઞ્ચકાદ્યૈઃ
મધ્યે વિશ્વજનસ્ય સન્નપિ શિવો નો દૃશ્યતે સૂક્ષ્મયા ।
બુદ્ધ્યાદધ્યાતયાપિ શ્રુતિવચનશતૈર્દેશિકોક્ત્યૈકસૂક્ત્યા
યોગૈર્ભક્તિસમન્વિતૈઃ શિવતરો દૃશ્યો ન ચાન્યત્તથા ॥ ૧૦.૫૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
બ્રહ્મતર્પણાત્મહોમાખ્ય પ્રકરણદ્વયવર્ણનં નામ દશમોऽધ્યાયઃ ॥

# ૧૧. જીવન્મુક્તપ્રકરણં નામ એકાદશોऽધ્યાયઃ

ઋભુઃ -

બ્રહ્મજ્ઞાનં પ્રવક્ષ્યામિ જીવન્મુક્તસ્ય લક્ષણમ્ ।
આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧॥

અહં બ્રહ્મવદેવેદં (બ્રહ્મવદદેવ) મહમાત્મા ન સંશયઃ ।
ચૈતન્યાત્મેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨॥

ચિદાત્માહં પરાત્માહં નિર્ગુણોऽહં પરાત્પરઃ ।
ઇત્યેવં નિશ્ચયો યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩॥

દેહત્રયાતિરિક્તોऽહં બ્રહ્મ ચૈતન્યમસ્મ્યહમ્ ।
બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪॥

આનન્દઘનરૂપોऽસ્મિ પરાનન્દપરોऽસ્મ્યહમ્ ।
યશ્ચિદેવં પરાનન્દં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫॥

યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ।
પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬॥

યસ્ય કિઞ્ચિદહં નાસ્તિ ચિન્માત્રેણાવતિષ્ઠતે ।
પરાનન્દો મુદાનન્દઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૭॥

ચૈતન્યમાત્રં યસ્યાન્તશ્ચિન્માત્રૈકસ્વરૂપવાન્ ।
ન સ્મરત્યન્યકલનં (કલલં) સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૮॥

સર્વત્ર પરિપૂર્ણાત્મા સર્વત્ર કલનાત્મકઃ ।
સર્વત્ર નિત્યપૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૯॥

પરમાત્મપરા નિત્યં પરમાત્મેતિ નિશ્ચિતઃ ।
આનન્દાકૃતિરવ્યક્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૦॥

શુદ્ધકૈવલ્યજીવાત્મા સર્વસઙ્ગવિવર્જિતઃ ।
નિત્યાનન્દપ્રસન્નાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૧॥

એકરૂપઃ પ્રશાન્તાત્મા અન્યચિન્તાવિવર્જિતઃ ।
કિઞ્ચિદસ્તિત્વહીનો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૨॥

ન મે ચિત્તં ન મે બુદ્ધિર્નાહઙ્કારો ન ચેન્દ્રિયઃ ।
કેવલં બ્રહ્મમાત્રત્વાત્ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૩॥

ન મે દોષો ન મે દેહો ને મે પ્રાણો ન મે ક્વચિત્ ।
દૃઢનિશ્ચયવાન્યોઽન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૪॥

ન મે માયા ન મે કામો ન મે ક્રોધોઽપરોઽસ્મ્યહમ્ ।
ન મે કિઞ્ચિદિદં વાઽપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૫॥

ન મે દોષો ન મે લિઙ્ગં ન મે બન્ધઃ ક્વચિજ્જગત્ ।
યસ્તુ નિત્યં સદાનન્દઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૬॥

ન મે શ્રોત્રં ન મે નાસા ન મે ચક્ષુર્ન મે મનઃ ।
ન મે જિહ્વેતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૭॥

ન મે દેહો ન મે લિઙ્ગં ન મે કારણમેવ ચ ।
ન મે તુર્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૮॥

ઇદં સર્વં ન મે કિઞ્ચિદયં સર્વં ન મે ક્વચિત્ ।
બ્રહ્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૯॥

ન મે કિઞ્ચિન્ન મે કશ્ચિન્ન મે કશ્ચિત્ક્વચિજ્જગત્ ।
અહમેવેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૦॥

ન મે કાલો ન મે દેશો ન મે વસ્તુ ન મે સ્થિતિઃ ।
ન મે સ્નાનં ન મે પ્રાસઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૧॥

ન મે તીર્થં ન મે સેવા ન મે દેવો ન મે સ્થલમ્ ।
ન ક્વચિદ્ભેદહીનોઽયં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૨॥

ન મે બન્ધં ન મે જન્મ ન મે જ્ઞાનં ન મે પદમ્ ।
ન મે વાક્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૩॥

ન મે પુણ્યં ન મે પાપં ન મે કાયં ન મે શુભમ્ ।
ન મે દૃશ્યમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૪॥

ન મે શબ્દો ન મે સ્પર્શો ન મે રૂપં ન મે રસઃ ।
ન મે જીવ ઇતિ જ્ઞાત્વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૫॥

ન મે સર્વં ન મે કિઞ્ચિન્ન મે જીવં ન મે ક્વચિત્ ।
ન મે ભાવં ન મે વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૬॥

ન મે મોક્ષ્યે ન મે દ્વૈતં ન મે વેદો ન મે વિધિઃ ।
ન મે દૂરમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૭॥

ન મે ગુરુર્ન મે શિષ્યો ન મે બોધો ન મે પરઃ ।
ન મે શ્રેષ્ઠં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૮॥

ન મે બ્રહ્મા ન મે વિષ્ણુર્ન મે રુદ્રો ન મે રવિઃ ।
ન મે કર્મ ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૯॥

ન મે પૃથ્વી ન મે તોયં ન મે તેજો ન મે વિયત્ ।
ન મે કાર્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૦॥

ન મે વાર્તા ન મે વાક્યં ન મે ગોત્રં ન મે કુલમ્ ।
ન મે વિદ્યેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૧॥

ન મે નાદો ન મે શબ્દો ન મે લક્ષ્યં ન મે ભવઃ ।
ન મે ધ્યાનમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૨॥

ન મે શીતં ન મે ચોષ્ણં ન મે મોહો ન મે જપઃ ।
ન મે સન્ધ્યેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૩॥

ન મે જપો ન મે મન્ત્રો ન મે હોમો ન મે નિશા ।
ન મે સર્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૪॥

ન મે ભયં ન મે ચાન્નં ન મે તૃષ્ણા ન મે ક્ષુધા ।
ન મે ચાત્મેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૫॥

ન મે પૂર્વં ન મે પશ્ચાન્ન મે ચોર્ધ્વં ન મે દિશઃ ।
ન ચિત્તમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૬॥

ન મે વક્તવ્યમલ્પં વા ન મે શ્રોતવ્યમણ્વપિ ।
ન મે મન્તવ્યમીષદ્વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૭॥

ન મે ભોક્તવ્યમીષદ્વા ન મે ધ્યાતવ્યમણ્વપિ ।
ન મે સ્મર્તવ્યમેવાયં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૮॥

ન મે ભોગો ન મે રોગો ન મે યોગો ન મે લયઃ ।
ન મે સર્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૯॥

ન મેઽસ્તિત્વં ન મે જાતં ન મે વૃદ્ધં ન મે ક્ષયઃ ।

અધ્યારોપો ન મે સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૦॥

અધ્યારોપ્યં ન મે કિઞ્ચિદપવાદો ન મે ક્વચિત્ ।
ન મે કિઞ્ચિદહં યત્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૧॥

ન મે શુદ્ધિર્ન મે શુભ્રો ન મે ચૈકં ન મે બહુ ।
ન મે ભૂતં ન મે કાર્યં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૨॥

ન મે કોઽહં ન મે ચેદં ન મે નાન્યં ન મે સ્વયમ્ ।
ન મે કશ્ચિન્ન મે સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૩॥

ન મે માંસં ન મે રક્તં ન મે મેદો ન મે શકૃત્ ।
ન મે કૃપા ન મેઽસ્તીતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૪॥

ન મે સર્વં ન મે શુક્લં ન મે નીલં ન મે પૃથક્ ।
ન મે સ્વસ્થઃ સ્વયં યો વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૫॥

ન મે તાપં ન મે લોભો ન મે ગૌણં ન મે યશઃ ।
ને મે તત્ત્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૬॥

ન મે ભ્રાન્તિર્ન મે જ્ઞાનં ન મે ગુહ્યં ન મે કુલમ્ ।
ન મે કિઞ્ચિદિતિ ધ્યાયન્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૭॥

ન મે ત્યાજ્યં ન મે ગ્રાહ્યં ન મે હાસ્યં ન મે લયઃ ।
ન મે દૈવમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૮॥

ન મે વ્રતં ન મે ગ્લાનિઃ ન મે શોચ્યં ન મે સુખમ્ ।
ન મે ન્યૂનં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૯॥

ન મે જ્ઞાતા ન મે જ્ઞાનં ન મે જ્ઞેયં ન મે સ્વયમ્ ।
ન મે સર્વમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૦॥

ન મે તુભ્યં ન મે મહ્યં ન મે ત્વત્તો ન મે ત્વહમ્ ।
ન મે ગુરુર્ન મે યસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૧॥

ન મે જડં ન મે ચૈત્યં ન મે ગ્લાનં ન મે શુભમ્ ।
ન મે ન મેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૨॥

ન મે ગોત્રં ન મે સૂત્રં ન મે પાત્રં ન મે કૃપા ।
ન મે કિઞ્ચિદિતિ ધ્યાયી સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૩॥

ન મે ચાત્મા ન મે નાત્મા ન મે સ્વર્ગં ન મે ફલમ્ ।
ન મે દૂષ્યં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૪॥

ન મેઽભ્યાસો ન મે વિદ્યા ન મે શાન્તિર્ન મે દમઃ ।
ન મે પુરમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૫॥

ન મે શલ્યં ન મે શઙ્કા ન મે સુપ્તિર્ન મે મનઃ ।
ન મે વિકલ્પ ઇત્યાપ્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૬॥

ન મે જરા ન મે બાલ્યં ન મે યૌવનમણ્વપિ ।
ન મે મૃતિર્ન મે ધ્વાન્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૭॥

ન મે લોકં ન મે ભોગં ન મે સર્વમિતિ સ્મૃતઃ ।
ન મે મૌનમિતિ પ્રાપ્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૮॥

અહં બ્રહ્મ હ્યહં બ્રહ્મ હ્યહં બ્રહ્મેતિ નિશ્ચયઃ ।
ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૯॥

બ્રહ્મૈવાહં ચિદેવાહં પરૈવાહં ન સંશયઃ ।
સ્વયમેવ સ્વયં જ્યોતિઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૦॥

સ્વયમેવ સ્વયં પશ્યેત્સ્વયમેવ સ્વયં સ્થિતઃ ।
સ્વાત્મન્યેવ સ્વયં ભૂતઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૧॥

સ્વાત્માનન્દં સ્વયં ભુઙ્ક્ષ્વે સ્વાત્મરાજ્યે સ્વયં વસે ।
સ્વાત્મરાજ્યે સ્વયં પશ્યે સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૨॥

સ્વયમેવાહમેકાગ્રઃ સ્વયમેવ સ્વયં પ્રભુઃ ।
સ્વસ્વરૂપઃ સ્વયં પશ્યે સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૩॥

જીવન્મુક્તિપ્રકરણં સર્વવેદેષુ દુર્લભમ્ ।
યઃ શ ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૧.૬૪॥

યે વેદવાદવિધિકલ્પિતભેદબુદ્ધ્યા
    પુણ્યાભિસન્ધિતધિયા પરિકર્શયન્તઃ ।
દેહં સ્વકીયમતિદુઃખપરં પરાભિ-
    સ્તેષાં સુખાય ન તુ જાતુ તવેશ પાદાત્ ॥ ૧૧.૬૫॥

કઃ સન્તરેત ભવસાગરમેતદુદ્ય-
    ત્તરઙ્ગસદૃશં જનિમૃત્યુરૂપમ્ ।

ઈશાર્ચનાવિધિસુબોધિતભેદહીન-
    જ્ઞાનોડુપેન પ્રતરેદ્ભવભાવયુક્તઃ ॥ ૧૧.૬૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    જીવન્મુક્તપ્રકરણં નામ એકાદશોઽધ્યાયઃ ॥

## ૧૨. દેહમુક્તિપ્રકરણવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

ઋભુઃ -
દેહમુક્તિપ્રકરણં નિદાઘ શ૱ૃણુ દુર્લભમ્ ।
ત્યક્તાત્યક્તં ન સ્મરતિ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧॥

બ્રહ્મરૂપઃ પ્રશાન્તાત્મા નાન્યરૂપઃ સદા સુખી ।
સ્વસ્થરૂપો મહામૌની વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨॥

સર્વાત્મા સર્વભૂતાત્મા શાન્તાત્મા મુક્તિવર્જિતઃ ।
એકાત્મવર્જિતઃ સાક્ષી વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩॥

લક્ષ્યાત્મા લાલિતાત્માહં લીલાત્મા સ્વાત્મમાત્રકઃ ।
તૂષ્ણીમાત્મા સ્વભાવાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪॥

શુભ્રાત્મા સ્વયમાત્માહં સર્વાત્મા સ્વાત્મમાત્રકઃ ।
અજાત્મા ચામૃતાત્મા હિ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫॥

આનન્દાત્મા પ્રિયઃ સ્વાત્મા મોક્ષાત્મા કોઽપિ નિર્ણયઃ ।
ઇત્યેવમિતિ નિધ્યાયી વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૬॥

બ્રહ્મૈવાહં ચિદેવાહં એકં વાપિ ન ચિન્ત્યતે ।
ચિન્માત્રેણૈવ યસ્તિષ્ઠેદ્વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૭॥

નિશ્ચયં ચ પરિત્યજ્ય અહં બ્રહ્મેતિ નિશ્ચયઃ ।
આનન્દભૂરિદેહસ્તુ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૮॥

સર્વમસ્તીતિ નાસ્તીતિ નિશ્ચયં ત્યજ્ય તિષ્ઠતિ ।
અહં બ્રહ્માસ્મિ નાન્યોઽસ્મિ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૯॥

કિઞ્ચિત્ક્વચિત્કદાચિચ્ચ આત્માનં ન સ્મરત્યસૌ ।
સ્વસ્વભાવેન યસ્તિષ્ઠેદ્વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૦॥

અહમાત્મા પરો હ્યાત્મા ચિદાત્માહં ન ચિન્ત્યતે ।

સ્થાસ્યામીત્યપિ યો યુક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૧॥

તૂષ્ણીમેવ સ્થિતસ્તૂષ્ણીં સર્વં તૂષ્ણીં ન કિઞ્ચન ।
અહમર્થપરિત્યક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૨॥

પરમાત્મા ગુણાતીતઃ સર્વાત્માપિ ન સમ્મતઃ ।
સર્વભાવાન્મહાત્મા યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૩॥

કાલભેદં દેશભેદં વસ્તુભેદં સ્વભેદકમ્ ।
કિઞ્ચિદ્ભેદં ન યસ્યાસ્તિ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૪॥

અહં ત્વં તદિદં સોઽયં કિઞ્ચિદ્વાપિ ન વિદ્યતે ।
અત્યન્તસુખમાત્રોઽહં વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૫॥

નિર્ગુણાત્મા નિરાત્મા હિ નિત્યાત્મા નિત્યનિર્ણયઃ ।
શૂન્યાત્મા સૂક્ષ્મરૂપો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૬॥

વિશ્વાત્મા વિશ્વહીનાત્મા કાલાત્મા કાલહેતુકઃ ।
દેવાત્મા દેવહીનો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૭॥

માત્રાત્મા મેયહીનાત્મા મૂઢાત્માઽનાત્મવર્જિતઃ ।
કેવલાત્મા પરાત્મા ચ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૮॥

સર્વત્ર જડહીનાત્મા સર્વેષામન્તરાત્મકઃ ।
સર્વેષામિતિ યસ્તૂક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૧૯॥

સર્વસઙ્કલ્પહીનેતિ સચ્ચિદાનન્દમાત્રકઃ ।
સ્થાસ્યામીતિ ન યસ્યાન્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૦॥

સર્વં નાસ્તિ તદસ્તીતિ ચિન્માત્રોઽસ્તીતિ સર્વદા ।
પ્રબુદ્ધો નાસ્તિ યસ્યાન્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૧॥

કેવલં પરમાત્મા યઃ કેવલં જ્ઞાનવિગ્રહઃ ।
સત્તામાત્રસ્વરૂપો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૨॥

જીવેશ્વરેતિ ચૈત્યેતિ વેદશાસ્ત્રે ત્વહં ત્વિતિ ।
બ્રહ્મૈવેતિ ન યસ્યાન્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૩॥

બ્રહ્મૈવ સર્વમેવાહં નાન્યત્કિઞ્ચિજ્જગદ્ભવેત્ ।
ઇત્યેવં નિશ્ચયો ભાવઃ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૪॥

ઇદં ચૈતન્યમેવેતિ અહં ચૈતન્યમેવ હિ ।
ઇતિ નિશ્ચયશૂન્યો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૫॥

ચૈતન્યમાત્રઃ સંસિદ્ધઃ સ્વાત્મારામઃ સુખાસનઃ ।
સુખમાત્રાન્તરઙ્ગો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૬॥

અપરિચ્છિન્નરૂપાત્મા અણોરણુવિનિર્મલઃ ।
તુર્યાતીતઃ પરાનન્દો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૭॥

નામાપિ નાસ્તિ સર્વાત્મા ન રૂપો ન ચ નાસ્તિકઃ ।
પરબ્રહ્મસ્વરૂપાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૮॥

તુર્યાતીતઃ સ્વતોઽતીતઃ અતોઽતીતઃ સ સન્મયઃ ।
અશુભાશુભશાન્તાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૨૯॥

બન્ધમુક્તિપ્રશાન્તાત્મા સર્વાત્મા ચાન્તરાત્મકઃ ।
પ્રપઞ્ચાત્મા પરો હ્યાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૦॥

સર્વત્ર પરિપૂર્ણાત્મા સર્વદા ચ પરાત્પરઃ ।
અન્તરાત્મા હ્યનન્તાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૧॥

અબોધબોધહીનાત્મા અજડો જડવર્જિતઃ ।
અતત્ત્વાતત્ત્વસર્વાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૨॥

અસમાધિસમાધ્યન્તઃ અલક્ષ્યાલક્ષ્યવર્જિતઃ ।
અભૂતો ભૂત એવાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૩॥

ચિન્મયાત્મા ચિદાકાશશ્ચિદાનન્દશ્ચિદમ્બરઃ ।
ચિન્માત્રરૂપ એવાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૪॥

સચ્ચિદાનન્દરૂપાત્મા સચ્ચિદાનન્દવિગ્રહઃ ।
સચ્ચિદાનન્દપૂર્ણાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૫॥

સદા બ્રહ્મમયો નિત્યં સદા સ્વાત્મનિ નિષ્ઠિતઃ ।
સદાઽખણ્ડૈકરૂપાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૬॥

પ્રજ્ઞાનઘન એવાત્મા પ્રજ્ઞાનઘનવિગ્રહઃ ।
નિત્યજ્ઞાનપરાનન્દો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૭॥

યસ્ય દેહઃ ક્વચિન્નાસ્તિ યસ્ય કિઞ્ચિત્સ્મૃતિશ્ચ ન ।
સદાત્મા હ્યાત્મનિ સ્વસ્થો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૮॥

યસ્ય નિર્વાસનં ચિત્તં યસ્ય બ્રહ્માત્મના સ્થિતિઃ ।
યોગાત્મા યોગયુક્તાત્મા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૩૯ ॥

ચૈતન્યમાત્ર એવેતિ ત્યક્તં સર્વમતિર્ન હિ ।
ગુણાગુણવિકારાન્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૦ ॥

કાલદેશાદિ નાસ્ત્યન્તો ન ગ્રાહ્યો નાસ્મૃતિઃ પરઃ ।
નિશ્ચયં ચ પરિત્યક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૧ ॥

ભૂમાનન્દાપરાનન્દો ભોગાનન્દવિવર્જિતઃ ।
સાક્ષી ચ સાક્ષિહીનશ્ચ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૨ ॥

સોઽપિ કોઽપિ ન સો કોઽપિ કિઞ્ચિત્કિઞ્ચિન્ન કિઞ્ચન ।
આત્માનાત્મા ચિદાત્મા ચ ચિદચિચ્ચાહમેવ ચ ॥ ૧૨.૪૩ ॥

યસ્ય પ્રપઞ્ચશ્ચાનાત્મા બ્રહ્માકારમપીહ ન ।
સ્વસ્વરૂપઃ સ્વયઞ્જ્યોતિર્વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૪ ॥

વાચામગોચરાનન્દઃ સર્વેન્દ્રિયવિવર્જિતઃ ।
અતીતાતીતભાવો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૫ ॥

ચિત્તવૃત્તેરતીતો યશ્ચિત્તવૃત્તિર્ન ભાસકઃ ।
સર્વવૃત્તિવિહીનો યો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૬ ॥

તસ્મિન્કાલે વિદેહો યો દેહસ્મરણવર્જિતઃ ।
ન સ્થૂલો ન કૃશો વાપિ વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૭ ॥

ઈષણ્માત્રસ્થિતો યો વૈ સદા સર્વવિવર્જિતઃ ।
બ્રહ્મમાત્રેણ યસ્તિષ્ઠેદ્વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૮ ॥

પરં બ્રહ્મ પરાનન્દઃ પરમાત્મા પરાત્પરઃ ।
પરૈરદૃષ્ટબાહ્યાન્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૪૯ ॥

શુદ્ધવેદાન્તસારોઽયં શુદ્ધસત્ત્વાત્મનિ સ્થિતઃ ।
તદ્ભેદમપિ યસ્ત્યક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૦ ॥

બ્રહ્મામૃતરસાસ્વાદો બ્રહ્મામૃતરસાયનમ્ ।
બ્રહ્મામૃતરસે મગ્નો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૧ ॥

બ્રહ્મામૃતરસાધારો બ્રહ્મામૃતરસઃ સ્વયમ્ ।

બ્રહ્મામૃતરસે તૃપ્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૨॥

બ્રહ્માનન્દપરાનન્દો બ્રહ્માનન્દરસપ્રભઃ ।
બ્રહ્માનન્દપરઞ્જ્યોતિર્વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૩॥

બ્રહ્માનન્દરસાનન્દો બ્રહ્મામૃતનિરન્તરમ્ ।
બ્રહ્માનન્દઃ સદાનન્દો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૪॥

બ્રહ્માનન્દાનુભાવો યો બ્રહ્મામૃતશિવાર્ચનમ્ ।
બ્રહ્માનન્દરસપ્રીતો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૫॥

બ્રહ્માનન્દરસોદ્વાહો બ્રહ્મામૃતકુટુમ્બકઃ ।
બ્રહ્માનન્દજનૈર્યુક્તો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૬॥

બ્રહ્મામૃતવરે વાસો બ્રહ્માનન્દાલયે સ્થિતઃ ।
બ્રહ્મામૃતજપો યસ્ય વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૭॥

બ્રહ્માનન્દશરીરાન્તો બ્રહ્માનન્દેન્દ્રિયઃ ક્વચિત્ ।
બ્રહ્મામૃતમયી વિદ્યા વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૮॥

બ્રહ્માનદમદોન્મત્તો બ્રહ્મામૃતરસમ્ભરઃ ।
બ્રહ્માત્મનિ સદા સ્વસ્થો વિદેહાન્મુક્ત એવ સઃ ॥ ૧૨.૫૯॥

દેહમુક્તિપ્રકરણં સર્વવેદેષુ દુર્લભમ્ ।
મયોક્તં તે મહાયોગિન્વિદેહઃ શ્રવણાદ્ભવેત્ ॥ ૧૨.૬૦॥

સ્કન્દઃ -
અનાથ નાથ તે પદં ભજામ્યુમાસનાથ સન્નિશીથનાથ
મૌલિસંસ્ફુટલ્લલાટસઙ્ગજસ્ફુલિઙ્ગદગ્ધમન્મથં
પ્રમથનાથ પાહિ મામ્ ॥ ૧૨.૬૧॥

વિભૂતિભૂષગાત્ર તે ત્રિનેત્રમિત્રતામિયાત્
મનઃસરોરુહં ક્ષણં તથેક્ષણેન મે સદા ।
પ્રબન્ધસંસૃતિભ્રમદ્ભ્રમજ્જનૌઘસન્તતૌ
ન વેદ વેદમૌલિરપ્યપાસ્તદુઃખસન્તતિમ્ ॥ ૧૨.૬૨॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
દેહમુક્તિપ્રકરણવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥

## ૧૩. સર્વમાત્મપ્રકરણં નામ ત્રયોદશોઽધ્યાયઃ

ઋભુઃ -

શ‍ृણુષ્વ દુર્લભં લોકે સારાત્સારતરં પરમ્ ।
આત્મરૂપમિદં સર્વમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧॥

સર્વમાત્માસ્તિ પરમા પરમાત્મા પરાત્મકઃ ।
નિત્યાનન્દસ્વરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨॥

પૂર્ણરૂપો મહાનાત્મા પૂતાત્મા શાશ્વતાત્મકઃ ।
નિર્વિકારસ્વરૂપાત્મા નિર્મલાત્મા નિરાત્મકઃ ॥ ૧૩.૩॥

શાન્તાશાન્તસ્વરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ।
જીવાત્મા પરમાત્મા હિ ચિત્તાચિત્તાત્મચિન્મયઃ ।
એકાત્મા એકરૂપાત્મા નૈકાત્માત્મવિવર્જિતઃ ॥ ૧૩.૪॥

મુક્તામુક્તસ્વરૂપાત્મા મુક્તામુક્તવિવર્જિતઃ ।
મોક્ષરૂપસ્વરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫॥

દ્વૈતાદ્વૈતસ્વરૂપાત્મા દ્વૈતાદ્વૈતવિવર્જિતઃ ।
સર્વવર્જિતસર્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૬॥

મુદામુદસ્વરૂપાત્મા મોક્ષાત્મા દેવતાત્મકઃ ।
સઙ્કલ્પહીનસારાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૭॥

નિષ્કલાત્મા નિર્મલાત્મા બુદ્ધ્યાત્મા પુરુષાત્મકઃ ।
આનન્દાત્મા હ્યજાત્મા ચ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૮॥

અગણ્યાત્મા ગણાત્મા ચ અમૃતાત્મામૃતાન્તરઃ ।
ભૂતભવ્યભવિષ્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૯॥

અખિલાત્માઽનુમન્યાત્મા (માનાત્મા) માનાત્મા ભાવભાવનઃ ।
તુર્યરૂપપ્રસન્નાત્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૦॥

નિત્યં પ્રત્યક્ષરૂપાત્મા નિત્યપ્રત્યક્ષનિર્ણયઃ ।
અન્યહીનસ્વભાવાત્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૧॥

અસદ્ધીનસ્વભાવાત્મા અન્યહીનઃ સ્વયં પ્રભુઃ ।
વિદ્યાવિદ્યાન્યશુદ્ધાત્મા માનામાનવિહીનકઃ ॥ ૧૩.૧૨॥

નિત્યાનિત્યવિહીનાત્મા ઇહામુત્રફલાન્તરઃ ।

શમાદિષટ્કશૂન્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૩॥

મુમુક્ષુત્વં ચ હીનાત્મા શબ્દાત્મા દમનાત્મકઃ ।
નિત્યોપરતરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૪॥

સર્વકાલતિતિક્ષાત્મા સમાધાનાત્મનિ સ્થિતઃ ।
શુદ્ધાત્મા સ્વાત્મનિ સ્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૫॥

અન્નકોશવિહીનાત્મા પ્રાણકોશવિવર્જિતઃ ।
મનઃકોશવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૬॥

વિજ્ઞાનકોશહીનાત્મા આનન્દાદિવિવર્જિતઃ ।
પઞ્ચકોશવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૭॥

નિર્વિકલ્પસ્વરૂપાત્મા સવિકલ્પવિવર્જિતઃ ।
શબ્દાનુવિદ્ધહીનાત્મા (શબ્દાનુવિધ્યહીનાત્મા)
હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૮॥

સ્થૂલદેહવિહીનાત્મા સૂક્ષ્મદેહવિવર્જિતઃ ।
કારણાદિવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૯॥

દૃશ્યાનુવિદ્ધશૂન્યાત્મા હ્યાદિમધ્યાન્તવર્જિતઃ ।
શાન્તા સમાધિશૂન્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૦॥

પ્રજ્ઞાનવાક્યહીનાત્મા અહં બ્રહ્માસ્મિવર્જિતઃ ।
તત્ત્વમસ્યાદિવાક્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૧॥

અયમાત્મેત્યભાવાત્મા સર્વાત્મા વાક્યવર્જિતઃ ।
ઓઙ્કારાત્મા ગુણાત્મા ચ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૨॥

જાગ્રદ્ધીનસ્વરૂપાત્મા સ્વપ્નાવસ્થાવિવર્જિતઃ ।
આનન્દરૂપપૂર્ણાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૩॥

ભૂતાત્મા ચ ભવિષ્યાત્મા હ્યક્ષરાત્મા ચિદાત્મકઃ ।
અનાદિમધ્યરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૪॥

સર્વસઙ્કલ્પહીનાત્મા સ્વચ્છચિન્માત્રમક્ષયઃ ।
જ્ઞાતૃજ્ઞેયાદિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૫॥

એકાત્મા એકહીનાત્મા દ્વૈતાદ્વૈતવિવર્જિતઃ ।
સ્વયમાત્મા સ્વભાવાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૬॥

તુર્યાત્મા નિત્યમાત્મા ચ યત્કિઞ્ચિદિદમાત્મકઃ ।
ભાનાત્મા (માનાત્મા) માનહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૭ ॥

વાચાવધિરનેકાત્મા વાચ્યાનન્દાત્મનન્દકઃ ।
સર્વહીનાત્મસર્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૮ ॥

આત્માનમેવ વીક્ષસ્વ આત્માનં ભાવય સ્વકમ્ ।
સ્વસ્વાત્માનં સ્વયં ભુઙ્ક્ષ્વ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૯ ॥

સ્વાત્માનમેવ સન્તુષ્ય આત્માનં સ્વયમેવ હિ ।
સ્વસ્વાત્માનં સ્વયં પશ્યેત્સ્વમાત્માનં સ્વયં શ્રુતમ્ ॥ ૧૩.૩૦ ॥

સ્વમાત્મનિ સ્વયં તૃપ્તઃ સ્વમાત્માનં સ્વયમ્ભરઃ ।
સ્વમાત્માનં સ્વયં ભસ્મ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૧ ॥

સ્વમાત્માનં સ્વયં મોદં સ્વમાત્માનં સ્વયં પ્રિયમ્ ।
સ્વમાત્માનમેવ મન્તવ્યં હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૨ ॥

આત્માનમેવ શ્રોતવ્યં આત્માનં શ્રવણં ભવ ।
આત્માનં કામયેન્નિત્યમાત્માનં નિત્યમર્ચય ॥ ૧૩.૩૩ ॥

આત્માનં શ્લાઘયેન્નિત્યમાત્માનં પરિપાલય ।
આત્માનં કામયેન્નિત્યમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૪ ॥

આત્મૈવેયમિયં ભૂમિઃ આત્મૈવેદમિદં જલમ્ ।
આત્મૈવેદમિદં જ્યોતિરાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૫ ॥

આત્મૈવાયમયં વાયુરાત્મૈવેદમિદં વિયત્ ।
આત્મૈવાયમહઙ્કારઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૬ ॥

આત્મૈવેદમિદં ચિત્તં આત્મૈવેદમિદં મનઃ ।
આત્મૈવેયમિયં બુદ્ધિરાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૭ ॥

આત્મૈવાયમયં દેહઃ આત્મૈવાયમયં ગુણઃ ।
આત્મૈવેદમિદં તત્ત્વમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૮ ॥

આત્મૈવાયમયં મન્ત્રઃ આત્મૈવાયમયં જપઃ ।
આત્મૈવાયમયં લોકઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૯ ॥

આત્મૈવાયમયં શબ્દઃ આત્મૈવાયમયં રસઃ ।

આત્મૈવાયમયં સ્પર્શઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૦॥

આત્મૈવાયમયં ગન્ધઃ આત્મૈવાયમયં શમઃ ।
આત્મૈવેદમિદં દુઃખં આત્મૈવેદમિદં સુખમ્ ॥ ૧૩.૪૧॥

આત્મીયમેવેદં જગતાત્મીયઃ સ્વપ્ન એવ હિ ।
સુષુપ્તં ચાપ્યથાત્મીયં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૨॥

આત્મૈવ કાર્યમાત્મૈવ પ્રાયો હ્યાત્મૈવમદ્વયમ્ ।
આત્મીયમેવમદ્વૈતં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૩॥

આત્મીયમેવાયં કોઽપિ આત્મૈવેદમિદં ક્વચિત્ ।
આત્મૈવાયમયં લોકઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૪॥

આત્મૈવેદમિદં દૃશ્યં આત્મૈવાયમયં જનઃ ।
આત્મૈવેદમિદં સર્વં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૫॥

આત્મૈવાયમયં શમ્ભુઃ આત્મૈવેદમિદં જગત્ ।
આત્મૈવાયમયં બ્રહ્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૬॥

આત્મૈવાયમયં સૂર્ય આત્મૈવેદમિદં જડમ્ ।
આત્મૈવેદમિદં ધ્યાનમાત્મૈવેદમિદં ફલમ્ ॥ ૧૩.૪૭॥

આત્મૈવાયમયં યોગઃ સર્વમાત્મમયં જગત્ ।
સર્વમાત્મમયં ભૂતં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૮॥

સર્વમાત્મમયં ભાવિ સર્વમાત્મમયં ગુરુઃ ।
સર્વમાત્મમયં શિષ્ય આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૯॥

સર્વમાત્મમયં દેવઃ સર્વમાત્મમયં ફલમ્ ।
સર્વમાત્મમયં લક્ષ્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૦॥

સર્વમાત્મમયં તીર્થં સર્વમાત્મમયં સ્વયમ્ ।
સર્વમાત્મમયં મોક્ષં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૧॥

સર્વમાત્મમયં કામં સર્વમાત્મમયં ક્રિયા ।
સર્વમાત્મમયં ક્રોધઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૨॥

સર્વમાત્મમયં વિદ્યા સર્વમાત્મમયં દિશઃ ।
સર્વમાત્મમયં લોભઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૩॥

સર્વમાત્મમયં મોહઃ સર્વમાત્મમયં ભયમ્ ।
સર્વમાત્મમયં ચિન્તા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૪॥

સર્વમાત્મમયં ધૈર્યં સર્વમાત્મમયં ધ્રુવમ્ ।
સર્વમાત્મમયં સત્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૫॥

સર્વમાત્મમયં બોધં સર્વમાત્મમયં દૃઢમ્ ।
સર્વમાત્મમયં મેયં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૬॥

સર્વમાત્મમયં ગુહ્યં સર્વમાત્મમયં શુભમ્ ।
સર્વમાત્મમયં શુદ્ધં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૭॥

સર્વમાત્મમયં સર્વં સત્યમાત્મા સદાત્મકઃ ।
પૂર્ણમાત્મા ક્ષયં ચાત્મા પરમાત્મા પરાત્પરઃ ॥ ૧૩.૫૮॥

ઇતોઽપ્યાત્મા તતોઽપ્યાત્મા હ્યાત્મૈવાત્મા તતસ્તતઃ ।
સર્વમાત્મમયં સત્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૯॥

સર્વમાત્મસ્વરૂપં હિ દૃશ્યાદૃશ્યં ચરાચરમ્ ।
સર્વમાત્મમયં શ્રુત્વા મુક્તિમાપ્નોતિ માનવઃ ॥ ૧૩.૬૦॥

સ્વતન્ત્રશક્તિર્ભગવાનુમાધવો વિચિત્રકાયાત્મકજાગ્રતસ્ય ।
સુકારણં કાર્યપરમ્પરાભિઃ સ એવ માયાવિતતોઽવ્યયાત્મા ॥ ૧૩.૬૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સર્વમાત્મપ્રકરણં નામ ત્રયોદશોઽધ્યાયઃ ॥

## ૧૪. આત્માનન્દપ્રકરણવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ

ઋભુઃ -
શ ૃણુષ્વ સર્વં બ્રહ્મૈવ સત્યં સત્યં શિવં શપે ।
નિશ્ચયેનાત્મયોગીન્દ્ર અન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૧૪.૧॥

અણુમાત્રમસદ્રૂપં (અણુમાત્રં સ્વરૂપં) અણુમાત્રમિદં ધ્રુવમ્ ।
અણુમાત્રશરીરં ચ અન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૧૪.૨॥

સર્વમાત્મૈવ શુદ્ધાત્મા સર્વં ચિન્માત્રમદ્વયમ્ ।
નિત્યનિર્મલશુદ્ધાત્મા અન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૧૪.૩॥

અણુમાત્રે વિચિન્ત્યાત્મા સર્વં ન હ્યણુમાત્રકમ્ ।

અણુમાત્રમસઙ્કલ્પો અન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૧૪.૪॥

ચૈતન્યમાત્રં સઙ્કલ્પં ચૈતન્યં પરમં પદમ્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૫॥

ચૈતન્યમાત્રમોઙ્કારઃ ચૈતન્યં સકલં સ્વયમ્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૬॥

આનન્દશ્ચાહમેવાસ્મિ અહમેવ ચિદવ્યયઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૭॥

અહમેવ હિ ગુપ્તાત્મા અહમેવ નિરન્તરમ્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૮॥

અહમેવ પરં બ્રહ્મ અહમેવ ગુરોર્ગુરુઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૯॥

અહમેવાખિલાધાર અહમેવ સુખાત્સુખમ્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૦॥

અહમેવ પરં જ્યોતિરહમેવાખિલાત્મકઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૧॥

અહમેવ હિ તૃપ્તાત્મા અહમેવ હિ નિર્ગુણઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૨॥

અહમેવ હિ પૂર્ણાત્મા અહમેવ પુરાતનઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૩॥

અહમેવ હિ શાન્તાત્મા અહમેવ હિ શાશ્વતઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૪॥

અહમેવ હિ સર્વત્ર અહમેવ હિ સુસ્થિરઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૫॥

અહમેવ હિ જીવાત્મા અહમેવ પરાત્પરઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૬॥

અહમેવ હિ વાક્યાર્થો અહમેવ હિ શઙ્કરઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૭॥

અહમેવ હિ દુર્લક્ષ્ય અહમેવ પ્રકાશકઃ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૧૮॥

અહમેવાહમેવાહં અહમેવ સ્વયં સ્વયમ્ ।
અહમેવ પરાનન્દોઽહમેવ હિ ચિન્મયઃ ॥ ૧૪.૧૯॥

અહમેવ હિ શુદ્ધાત્મા અહમેવ હિ સન્મયઃ ।
અહમેવ હિ શૂન્યાત્મા અહમેવ હિ સર્વગઃ ॥ ૧૪.૨૦॥

અહમેવ હિ વેદાન્તઃ અહમેવ હિ ચિત્પરઃ ॥ ૧૪.૨૧॥

અહમેવ હિ ચિન્માત્રં અહમેવ હિ ચિન્મયઃ ।
અન્યન્ન (અહં ન) કિઞ્ચિચ્ચિદ્રૂપાદહં બાહ્યવિવર્જિતઃ ॥ ૧૪.૨૨॥

અહં ન કિઞ્ચિદ્બ્રહ્માત્મા અહં નાન્યદહં પરમ્ ।
નિત્યશુદ્ધવિમુક્તોઽહં નિત્યતૃપ્તો નિરઞ્જનઃ ॥ ૧૪.૨૩॥

આનન્દં પરમાનન્દમન્યત્કિઞ્ચિન્ન કિઞ્ચન ।
નાસ્તિ કિઞ્ચિન્નાસ્તિ કિઞ્ચિન્નાસ્તિ કિઞ્ચિત્પરાત્પરાત્ ॥ ૧૪.૨૪॥

આત્મૈવેદં જગત્સર્વમાત્મૈવેદં મનોભવમ્ ।
આત્મૈવેદં સુખં સર્વં આત્મૈવેદમિદં જગત્ ॥ ૧૪.૨૫॥

બ્રહ્મૈવ સર્વં ચિન્માત્રં અહં બ્રહ્મૈવ કેવલમ્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૨૬॥

દૃશ્યં સર્વં પરં બ્રહ્મ દૃશ્યં નાસ્ત્યેવ સર્વદા ।
બ્રહ્મૈવ સર્વસઙ્કલ્પો બ્રહ્મૈવ ન પરં ક્વચિત્ ।
આનન્દં પરમં માનં ઇદં દૃશ્યં ન કિઞ્ચન ॥ ૧૪.૨૭॥

બ્રહ્મૈવ બ્રહ્મ ચિદ્રૂપં ચિદેવં ચિન્મયં જગત્ ।
અસદેવ જગત્સર્વં અસદેવ પ્રપઞ્ચકમ્ ॥ ૧૪.૨૮॥

અસદેવાહમેવાસ્મિ અસદેવ ત્વમેવ હિ ।
અસદેવ મનોવૃત્તિરસદેવ ગુણાગુણૌ ॥ ૧૪.૨૯॥

અસદેવ મહી સર્વા અસદેવ જલં સદા ।
અસદેવ જગત્ખાનિ અસદેવ ચ તેજકમ્ ॥ ૧૪.૩૦॥

અસદેવ સદા વાયુરસદેવેદમિત્યપિ ।
અહઙ્કારમસદ્બુદ્ધિર્બ્રહ્મૈવ જગતાં ગણઃ ॥ ૧૪.૩૧॥

અસદેવ સદા ચિત્તમાત્મૈવેદં ન સંશયઃ ।
અસદેવાસુરાઃ સર્વે અસદેવેદશ્વરાકૃતિઃ ॥ ૧૪.૩૨॥

અસદેવ સદા વિશ્વં અસદેવ સદા હરિઃ ।
અસદેવ સદા બ્રહ્મા તત્સૃષ્ટિરસદેવ હિ ॥ ૧૪.૩૩॥

અસદેવ મહાદેવઃ અસદેવ ગણેશ્વરઃ ।
અસદેવ સદા ચોમા અસત્સ્કન્દો ગણેશ્વરાઃ ॥ ૧૪.૩૪॥

અસદેવ સદા જીવ અસદેવ હિ દેહકમ્ ।
અસદેવ સદા વેદા અસદ્દેહાન્તમેવ ચ ॥ ૧૪.૩૫॥

ધર્મશાસ્ત્રં પુરાણં ચ અસત્યે સત્યવિભ્રમઃ ।
અસદેવ હિ સર્વં ચ અસદેવ પરમ્પરા ॥ ૧૪.૩૬॥

અસદેવેદમાદ્યન્તમસદેવ મુનીશ્વરાઃ ।
અસદેવ સદા લોકા લોક્યા અપ્યસદેવ હિ ॥ ૧૪.૩૭॥

અસદેવ સુખં દુઃખં અસદેવ જયાજયૌ ।
અસદેવ પરં બન્ધમસન્મુક્તિરપિ ધ્રુવમ્ ॥ ૧૪.૩૮॥

અસદેવ મૃતિર્જન્મ અસદેવ જડાજડમ્ ।
અસદેવ જગત્સર્વમસદેવાત્મભાવના ॥ ૧૪.૩૯॥

અસદેવ ચ રૂપાણિ અસદેવ પદં શુભમ્ ।
અસદેવ સદા ચાહમસદેવ ત્વમેવ હિ ॥ ૧૪.૪૦॥

અસદેવ હિ સર્વત્ર અસદેવ ચલાચલમ્ ।
અસચ્ચ સકલં ભૂતમસત્યં સકલં ફલમ્ ॥ ૧૪.૪૧॥

અસત્યમખિલં વિશ્વમસત્યમખિલો ગુણઃ ।
અસત્યમખિલં શેષમસત્યમખિલં જગત્ (દ્વયમ્) ॥ ૧૪.૪૨॥

અસત્યમખિલં પાપં અસત્યં શ્રવણત્રયમ્ ।
અસત્યં ચ સજાતીયવિજાતીયમસત્સદા ॥ ૧૪.૪૩॥

અસત્યમધિકારાશ્ચ અનિત્યા વિષયાઃ સદા ।
અસદેવ હિ દેવાદ્યા અસદેવ પ્રયોજનમ્ ॥ ૧૪.૪૪॥

અસદેવ શમં નિત્યં અસદેવ શમોઽનિશમ્ ।

અસદેવ સસન્દેહં (ચ સન્દેહં) અસદ્યુદ્ધં સુરાસુરમ્ ॥ ૧૪.૪૫॥

અસદેવેશભાવં ચાસદેવોપાસ્યમેવ હિ ।
અસચ્ચ કાલદેશાદિ અસત્ક્ષેત્રાદિભાવનમ્ ॥ ૧૪.૪૬॥

તજ્જન્યધર્માધર્મૌ ચ અસદેવ વિનિર્ણયઃ ।
અસચ્ચ સર્વકર્માણિ અસદસ્વપરભ્રમઃ ॥ ૧૪.૪૭॥

અસચ્ચ ચિત્તસદ્ભાવ અસચ્ચ સ્થૂલદેહકમ્ ।
અસચ્ચ લિઙ્ગદેહં ચ સત્યં સત્યં શિવં શપે ॥ ૧૪.૪૮॥

અસત્યં સ્વર્ગનરકં અસત્યં તદ્ભવં સુખમ્ ।
અસચ્ચ ગ્રાહકં સર્વં અસત્યં ગ્રાહ્યરૂપકમ્ ॥ ૧૪.૪૯॥

અસત્યં સત્યવદ્ભાવં (સત્યવદ્ભાનં) અસત્યં તે શિવે શપે ।
અસત્યં વર્તમાનાખ્યં અસત્યં ભૂતરૂપકમ્ ॥ ૧૪.૫૦॥

અસત્યં હિ ભવિષ્યાખ્યં સત્યં સત્યં શિવે શપે ।
અસત્પૂર્વમસન્મધ્યમસદન્તમિદં જગત્ ॥ ૧૪.૫૧॥

અસદેવ સદા પ્રાયં અસદેવ ન સંશયઃ ।
અસદેવ સદા જ્ઞાનમજ્ઞાનજ્ઞેયમેવ ચ ॥ ૧૪.૫૨॥

અસત્યં સર્વદા વિશ્વમસત્યં સર્વદા જડમ્ ।
અસત્યં સર્વદા દૃશ્યં ભાતિ તૌ રઙ્ગશ‍ૃઙ્ગવત્ ॥ ૧૪.૫૩॥

અસત્યં સર્વદા ભાવઃ અસત્યં કોશસમ્ભવમ્ ।
અસત્યં સકલં મન્ત્રં સત્યં સત્યં ન સંશયઃ ॥ ૧૪.૫૪॥

આત્મનોઽન્યજ્જગન્નાસ્તિ નાસ્ત્યનાત્મમિદં સદા ।
આત્મનોઽન્યન્મૃષૈવેદં સત્યં સત્યં ન સંશયઃ ॥ ૧૪.૫૫॥

આત્મનોઽન્યત્સુખં નાસ્તિ આત્મનોઽન્યન્ન કિઞ્ચન ।
આત્મનોઽન્યા ગતિર્નાસ્તિ સ્થિતમાત્મનિ સર્વદા ॥ ૧૪.૫૬॥

આત્મનોઽન્યન્ન હિ ક્વાપિ આત્મનોઽન્યત્તૃણં ન હિ ।
આત્મનોઽન્યન્ન કિઞ્ચિચ્ચ ક્વચિદપ્યાત્મનો ન હિ ॥ ૧૪.૫૭॥

આત્માનન્દપ્રકરણમેતત્તેઽભિહિતં મયા ।
યઃ શ‍ૃણોતિ સકૃદ્વિદ્વાન્બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૪.૫૮॥

સકૃચ્છ્રવણમાત્રેણ સદ્યોબન્ધવિમુક્તિદમ્ ।
એતદ્ગ્રન્થાર્થમાત્રં વૈ ગૃણન્ સર્વૈર્વિમુચ્યતે ॥ ૧૪.૫૯॥

સૂતઃ -
પૂર્ણં સત્યં મહેશં ભજ નિયતહૃદા યોઽન્તરાયૈર્વિહીનઃ
સો નિત્યો નિર્વિકલ્પો ભવતિ ભુવિ સદા બ્રહ્મભૂતો ઋતાત્મા (યતાત્મા) ।
વિચ્છિન્નગ્રન્થિરીશે શિવવિમલપદે વિદ્યતે ભાસતેઽન્તઃ
આરામોઽન્તર્ભવતિ નિયતં વિશ્વભૂતો મૃતશ્ચ ॥ ૧૪.૬૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
આત્માનન્દપ્રકરણવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥

## ૧૫. બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ

ઋભુઃ -
મહારહસ્યં વક્ષ્યામિ ગુહ્યાદ્ગુહ્યતરં પુનઃ ।
અત્યન્તદુર્લભં લોકે સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧॥

બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મમાત્રમસન્ન હિ ।
બ્રહ્મમાત્રં શ્રુતં સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨॥

બ્રહ્મમાત્રં મહાયન્ત્રં બ્રહ્મમાત્રં ક્રિયાફલમ્ ।
બ્રહ્મમાત્રં મહાવાક્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩॥

બ્રહ્મમાત્રં જગત્સર્વં બ્રહ્મમાત્રં જડાજડમ્ ।
બ્રહ્મમાત્રં પરં દેહં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪॥

બ્રહ્મમાત્રં ગુણં પ્રોક્તં બ્રહ્મમાત્રમહં મહત્ ।
બ્રહ્મમાત્રં પરં બ્રહ્મ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫॥

બ્રહ્મમાત્રમિદં વસ્તુ બ્રહ્મમાત્રં સ ચ પુમાન્ ।
બ્રહ્મમાત્રં ચ યત્કિઞ્ચિત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૬॥

બ્રહ્મમાત્રમનન્તાત્મા બ્રહ્મમાત્રં પરં સુખમ્ ।
બ્રહ્મમાત્રં પરં જ્ઞાનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૭॥

બ્રહ્મમાત્રં પરં પારં બ્રહ્મમાત્રં પુરત્રયમ્ ।
બ્રહ્મમાત્રમનેકત્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૮॥

બ્રહ્મૈવ કેવલં ગન્ધં બ્રહ્મૈવ પરમં પદમ્ ।
બ્રહ્મૈવ કેવલં ઘ્રાણં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૯॥

બ્રહ્મૈવ કેવલં સ્પર્શં શબ્દં બ્રહ્મૈવ કેવલમ્ ।
બ્રહ્મૈવ કેવલં રૂપં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૦॥

બ્રહ્મૈવ કેવલં લોકં રસો બ્રહ્મૈવ કેવલમ્ ।
બ્રહ્મૈવ કેવલં ચિત્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૧॥

તત્પદં ચ સદા બ્રહ્મ ત્વં પદં બ્રહ્મ એવ હિ ।
અસીત્યેવ પદં બ્રહ્મ બ્રહ્મૈક્યં કેવલં
સદા (સર્વં બ્રહ્મૈવ કેવલં) ॥ ૧૫.૧૨॥

બ્રહ્મૈવ કેવલં ગુહ્યં બ્રહ્મ બાહ્યં ચ કેવલમ્ ।
બ્રહ્મૈવ કેવલં નિત્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૩॥

બ્રહ્મૈવ તજ્જલાનીતિ જગદાદ્યન્તયોઃ સ્થિતિઃ ।
બ્રહ્મૈવ જગદાદ્યન્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૪॥

બ્રહ્મૈવ ચાસ્તિ નાસ્તીતિ બ્રહ્મૈવાહં ન સંશયઃ ।
બ્રહ્મૈવ સર્વં યત્કિઞ્ચિત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૫॥

બ્રહ્મૈવ જાગ્રત્સર્વં હિ બ્રહ્મમાત્રમહં પરમ્ ।
બ્રહ્મૈવ સત્યમસ્તિત્વં બ્રહ્મૈવ તુર્યમુચ્યતે ॥ ૧૫.૧૬॥

બ્રહ્મૈવ સત્તા બ્રહ્મૈવ બ્રહ્મૈવ ગુરુભાવનમ્ ।
બ્રહ્મૈવ શિષ્યસદ્ભાવં મોક્ષં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૭॥

પૂર્વાપરં ચ બ્રહ્મૈવ પૂર્ણં બ્રહ્મ સનાતનમ્ ।
બ્રહ્મૈવ કેવલં સાક્ષાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૮॥

બ્રહ્મ સચ્ચિત્સુખં બ્રહ્મ પૂર્ણં બ્રહ્મ સનાતનમ્ ।
બ્રહ્મૈવ કેવલં સાક્ષાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૧૯॥

બ્રહ્મૈવ કેવલં સચ્ચિત્સુખં બ્રહ્મૈવ કેવલમ્ ।
આનન્દં બ્રહ્મ સર્વત્ર પ્રિયરૂપમવસ્થિતમ્ ॥ ૧૫.૨૦॥

શુભવાસનયા જીવં શિવવદ્ભાતિ સર્વદા ।
પાપવાસનયા જીવો નરકં ભોજયવત્ (ભોક્તુમિચ્છતીતિ) સ્થિતમ્ ॥ ૧૫.૨૧॥

બ્રહ્મૈવેન્દ્રિયવદ્ભાનં બ્રહ્મૈવ વિષયાદિવત્ ।

બ્રહ્મૈવ વ્યવહારશ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૨॥

બ્રહ્મૈવ સર્વમાનન્દં બ્રહ્મૈવ જ્ઞાનવિગ્રહમ્ ।
બ્રહ્મૈવ માયાકાર્યાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૩॥

બ્રહ્મૈવ યજ્ઞસન્ધાનં બ્રહ્મૈવ હૃદયામ્બરમ્ ।
બ્રહ્મૈવ મોક્ષસારાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૪॥

બ્રહ્મૈવ શુદ્ધાશુદ્ધં ચ સર્વં બ્રહ્મૈવ કારણમ્ ।
બ્રહ્મૈવ કાર્યં ભૂલોકં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૫॥

બ્રહ્મૈવ નિત્યતૃપ્તાત્મા બ્રહ્મૈવ સકલં દિનમ્ ।
બ્રહ્મૈવ તૂષ્ણીં ભૂતાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૬॥

બ્રહ્મૈવ વેદસારાર્થઃ બ્રહ્મૈવ ધ્યાનગોચરમ્ ।
બ્રહ્મૈવ યોગયોગાખ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૨૭॥

નાનારૂપત્વાદ્બ્રહ્મ ઉપાધિત્વેન દૃશ્યતે ।
માયામાત્રમિતિ જ્ઞાત્વા વસ્તુતો નાસ્તિ તત્ત્વતઃ ॥ ૧૫.૨૮॥

બ્રહ્મૈવ લોકવદ્ભાતિ બ્રહ્મૈવ જનવત્તથા ।
બ્રહ્મૈવ રૂપવદ્ભાતિ વસ્તુતો નાસ્તિ કિઞ્ચન ॥ ૧૫.૨૯॥

બ્રહ્મૈવ દેવતાકારં બ્રહ્મૈવ મુનિમણ્ડલમ્ ।
બ્રહ્મૈવ ધ્યાનરૂપં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૦॥

બ્રહ્મૈવ જ્ઞાનવિજ્ઞાનં બ્રહ્મૈવ પરમેશ્વરઃ ।
બ્રહ્મૈવ શુદ્ધબુદ્ધાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૧॥

બ્રહ્મૈવ પરમાનદં બ્રહ્મૈવ વ્યાપકં મહત્ ।
બ્રહ્મૈવ પરમાર્થં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૨॥

બ્રહ્મૈવ યજ્ઞરૂપં ચ બ્રહ્મ હવ્યં ચ કેવલમ્ ।
બ્રહ્મૈવ જીવભૂતાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૩॥

બ્રહ્મૈવ સકલં લોકં બ્રહ્મૈવ ગુરુશિષ્યકમ્ ।
બ્રહ્મૈવ સર્વસિદ્ધિં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૪॥

બ્રહ્મૈવ સર્વમન્ત્રં ચ બ્રહ્મૈવ સકલં જપમ્ ।
બ્રહ્મૈવ સર્વકાર્યં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૫॥

બ્રહ્મૈવ સર્વશાન્તત્વં બ્રહ્મૈવ હૃદયાન્તરમ્ ।
બ્રહ્મૈવ સર્વકૈવલ્યં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૬॥

બ્રહ્મૈવાક્ષરભાવઞ્ચ બ્રહ્મૈવાક્ષરલક્ષણમ્ ।
બ્રહ્મૈવ બ્રહ્મરૂપઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૭॥

બ્રહ્મૈવ સત્યભવનં બ્રહ્મૈવાહં ન સંશયઃ ।
બ્રહ્મૈવ તત્પદાર્થઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૮॥

બ્રહ્મૈવાહમ્પદાર્થઞ્ચ બ્રહ્મૈવ પરમેશ્વરઃ ।
બ્રહ્મૈવ ત્વમ્પદાર્થઞ્ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૩૯॥

બ્રહ્મૈવ યદ્યત્પરમં બ્રહ્મૈવેતિ પરાયણમ્ ।
બ્રહ્મૈવ કલનાભાવં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૦॥

બ્રહ્મ સર્વં ન સન્દેહો બ્રહ્મૈવ ત્વં સદાશિવઃ ।
બ્રહ્મૈવેદં જગત્સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૧॥

બ્રહ્મૈવ સર્વસુલભં બ્રહ્મૈવાત્મા સ્વયં સ્વયમ્ ।
બ્રહ્મૈવ સુખમાત્રત્વાત્સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૨॥

બ્રહ્મૈવ સર્વં બ્રહ્મૈવ બ્રહ્મણોઽન્યદસત્સદા ।
બ્રહ્મૈવ બ્રહ્મમાત્રાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૩॥

બ્રહ્મૈવ સર્વવાક્યાર્થઃ બ્રહ્મૈવ પરમં પદમ્ ।
બ્રહ્મૈવ સત્યાસત્યં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૪॥

બ્રહ્મૈવૈકમનાદ્યન્તં બ્રહ્મૈવૈકં ન સંશયઃ ।
બ્રહ્મૈવૈકં ચિદાનન્દઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૫॥

બ્રહ્મૈવૈકં સુખં નિત્યં બ્રહ્મૈવૈકં પરાયણમ્ ।
બ્રહ્મૈવૈકં પરં બ્રહ્મ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૬॥

બ્રહ્મૈવ ચિત્સ્વયં સ્વસ્થં બ્રહ્મૈવ ગુણવર્જિતમ્ ।
બ્રહ્મૈવાત્યન્તિકં સર્વં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૭॥

બ્રહ્મૈવ નિર્મલં સર્વં બ્રહ્મૈવ સુલભં સદા ।
બ્રહ્મૈવ સત્યં સત્યાનાં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૮॥

બ્રહ્મૈવ સૌખ્યં સૌખ્યં ચ બ્રહ્મૈવાહં સુખાત્મકમ્ ।
બ્રહ્મૈવ સર્વદા પ્રોક્તં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૪૯॥

બ્રહ્મૈવમખિલં બ્રહ્મ બ્રહ્મૈકં સર્વસાક્ષિકમ્ ।
બ્રહ્મૈવ ભૂરિભવનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૦॥

બ્રહ્મૈવ પરિપૂર્ણાત્મા બ્રહ્મૈવં સારમવ્યયમ્ ।
બ્રહ્મૈવ કારણં મૂલં બ્રહ્મૈવૈકં પરાયણમ્ ॥ ૧૫.૫૧॥

બ્રહ્મૈવ સર્વભૂતાત્મા બ્રહ્મૈવ સુખવિગ્રહમ્ ।
બ્રહ્મૈવ નિત્યતૃપ્તાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૨॥

બ્રહ્મૈવાદ્વૈતમાત્રાત્મા બ્રહ્મૈવાકાશવત્પ્રભુઃ ।
બ્રહ્મૈવ હૃદયાનન્દઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૩॥

બ્રહ્મણોઽન્યત્પરં નાસ્તિ બ્રહ્મણોઽન્યજ્જગન્ન ચ ।
બ્રહ્મણોઽન્યદહં નાહં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૪॥

બ્રહ્મૈવાન્યસુખં નાસ્તિ બ્રહ્મણોઽન્યત્ફલં ન હિ ।
બ્રહ્મણોઽન્યત્તૃણં નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૫॥

બ્રહ્મણોઽન્યત્પદં મિથ્યા બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
બ્રહ્મણોઽન્યજ્જગન્મિથ્યા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૬॥

બ્રહ્મણોઽન્યદહં મિથ્યા બ્રહ્મમાત્રોહમેવ હિ ।
બ્રહ્મણોઽન્યો ગુરુર્નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૭॥

બ્રહ્મણોઽન્યદસત્કાર્યં બ્રહ્મણોઽન્યદસદ્વપુઃ ।
બ્રહ્મણોઽન્યન્મનો નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૮॥

બ્રહ્મણોઽન્યજ્જગન્મિથ્યા બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
બ્રહ્મણોઽન્યન્ન ચાહન્તા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫.૫૯॥

બ્રહ્મૈવ સર્વમિત્યેવં પ્રોક્તં પ્રકરણં મયા ।
યઃ પઠેચ્છ્રાવયેત્સદ્યો બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૫.૬૦॥

અસ્તિ બ્રહ્મેતિ વેદે ઇદમિદમખિલં વેદ સો સદ્ભવેત્ (વેદસારોદ્ભવેત્)
સચ્ચાસચ્ચ જગત્તથા શ્રુતિવચો બ્રહ્મૈવ તજ્જાદિકમ્ ।
યતો વિદ્યૈવેદં પરિલુઠતિ મોહેન જગતિ ।
અતો વિદ્યાપાદો (વિદ્યાપ્રાપ્તઃ) પરિભવતિ બ્રહ્મૈવ હિ સદા ॥ ૧૫.૬૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે

બ્રહ્મૈવ સર્વં પ્રકરણનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ ॥

## ૧૬. ચિદેવત્વમ્પ્રકરણવર્ણનં નામ ષોડશોઽધ્યાયઃ

ઋભુઃ -

અત્યન્તં દુર્લભં વક્ષ્યે વેદશાસ્ત્રાગમાદિષુ ।
શ઼ૃણ્વન્તુ સાવધાનેન અસદેવ હિ કેવલમ્ ॥ ૧૬.૧॥

યત્કિઞ્ચિદ્દૃશ્યતે લોકે યત્કિઞ્ચિદ્ભાષતે સદા ।
યત્કિઞ્ચિદ્ભુજ્યતે ક્વાપિ તત્સર્વમસદેવ હિ ॥ ૧૬.૨॥

યદ્યત્કિઞ્ચિજ્જપં વાપિ સ્નાનં વા જલમેવ વા ।
આત્મનોઽન્યત્પરં યદ્યદસત્સર્વં ન સંશયઃ ॥ ૧૬.૩॥

ચિત્તકાર્યં બુદ્ધિકાર્યં માયાકાર્યં તથૈવ હિ ।
આત્મનોઽન્યત્પરં કિઞ્ચિત્તત્સર્વમસદેવ હિ ॥ ૧૬.૪॥

અહન્તાયાઃ પરં રૂપં ઇદન્ત્વં સત્યમિત્યપિ ।
આત્મનોઽન્યત્પરં કિઞ્ચિત્તત્સર્વમસદેવ હિ ॥ ૧૬.૫॥

નાનાત્વમેવ રૂપત્વં વ્યવહારઃ ક્વચિત્ક્વચિત્ ।
આત્મીય એવ સર્વત્ર તત્સર્વમસદેવ હિ ॥ ૧૬.૬॥

તત્ત્વભેદં જગદ્ભેદં સર્વભેદમસત્યકમ્ ।
ઇચ્છાભેદં જગદ્ભેદં તત્સર્વમસદેવ હિ ॥ ૧૬.૭॥

દ્વૈતભેદં ચિત્રભેદં જાગ્રદ્ભેદં મનોમયમ્ ।
અહમ્ભેદમિદમ્ભેદમસદેવ હિ કેવલમ્ ॥ ૧૬.૮॥

(અહમ્ભેદમિદમ્ભેદં તત્સર્વમસદેવ હિ) ॥ ૧૬.૮॥

સ્વપ્નભેદં સુપ્તિભેદં તુર્યભેદમભેદકમ્ ।
કર્તૃભેદં કાર્યભેદં ગુણભેદં રસાત્મકમ્ ।
લિઙ્ગભેદમિદમ્ભેદમસદેવ હિ કેવલમ્ ॥ ૧૬.૯॥

આત્મભેદમસદ્ભેદં સદ્ભેદમસદણ્વપિ ।
અત્યન્તાભાવસદ્ભેદમસદેવ હિ કેવલમ્ ॥ ૧૬.૧૦॥

અસ્તિભેદં નાસ્તિભેદમભેદં ભેદવિભ્રમઃ ।
ભ્રાન્તિભેદં ભૂતિભેદમસદેવ હિ કેવલમ્ ॥ ૧૬.૧૧॥

પુનરન્યત્ર સદ્ભેદમિદમન્યત્ર વા ભયમ્ ।
પુણ્યભેદં પાપભેદં અસદેવ હિ કેવલમ્ ॥ ૧૬.૧૨॥

(પુણ્યભેદં પાપભેદં અસદ્ભેદમનણ્વપિ) ॥ ૧૬.૧૨॥

સઙ્કલ્પભેદં તદ્ભેદં સદા સર્વત્ર ભેદકમ્ ।
જ્ઞાનાજ્ઞાનમયં સર્વં અસદેવ હિ કેવલમ્ ॥ ૧૬.૧૩॥

બ્રહ્મભેદં ક્ષત્રભેદં ભૂતભૌતિકભેદકમ્ ।
ઇદમ્ભેદમહમ્ભેદં અસદેવ હિ કેવલમ્ ॥ ૧૬.૧૪॥

વેદભેદં દેવભેદં લોકાનાં ભેદમીદૃશમ્ ।
પઞ્ચાક્ષરમસન્નિત્યમસદેવ હિ કેવલમ્ ॥ ૧૬.૧૫॥

જ્ઞાનેન્દ્રિયમસન્નિત્યં કર્મેન્દ્રિયમસત્સદા ।
અસદેવ ચ શબ્દાખ્યં અસત્યં તત્ફલં તથા ॥ ૧૬.૧૬॥

અસત્યં પઞ્ચભૂતાખ્યમસત્યં પઞ્ચદેવતાઃ ।
અસત્યં પઞ્ચકોશાખ્યમસદેવ હિ કેવલમ્ ॥ ૧૬.૧૭॥

અસત્યં ષડ્વિકારાદિ અસત્યં ષટ્કમૂર્મિણામ્ ।
અસત્યમરિષડ્વર્ગમસત્યં ષડૃતુસ્તદા ॥ ૧૬.૧૮॥ (તથા)
અસત્યં દ્વાદશમાસાઃ અસત્યં વત્સરસ્તથા ।
અસત્યં ષડવસ્થાખ્યં ષટ્કાલમસદેવ હિ ॥ ૧૬.૧૯॥

અસત્યમેવ ષટ્શાસ્ત્રં અસદેવ હિ કેવલમ્ ।
અસદેવ સદા જ્ઞાનં અસદેવ હિ કેવલમ્ ॥ ૧૬.૨૦॥

અનુક્તમુક્તં નોક્તં ચ અસદેવ હિ કેવલમ્ ।
અસત્પ્રકરણં પ્રોક્તં સર્વવેદેષુ દુર્લભમ્ ॥ ૧૬.૨૧॥

ભૂયઃ શ‍ૃણુ ત્વં યોગીન્દ્ર સાક્ષાન્મોક્ષં બ્રવીમ્યહમ્ ।
સન્માત્રમહમેવાત્મા સચ્ચિદાનન્દ કેવલમ્ ॥ ૧૬.૨૨॥

સન્મયાનન્દભૂતાત્મા ચિન્મયાનન્દસદ્ઘનઃ ।
ચિન્મયાનન્દસન્દોહચિદાનન્દો હિ કેવલમ્ ॥ ૧૬.૨૩॥

ચિન્માત્રજ્યોતિરાનન્દશ્ચિન્માત્રજ્યોતિવિગ્રહઃ ।
ચિન્માત્રજ્યોતિરીશાનઃ સર્વદાનન્દકેવલમ્ ॥ ૧૬.૨૪॥

ચિન્માત્રજ્યોતિરખિલં ચિન્માત્રજ્યોતિરસ્મ્યહમ્ ।
ચિન્માત્રં સર્વમેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૨૫॥

ચિન્માત્રમેવ ચિત્તં ચ ચિન્માત્રં મોક્ષ એવ ચ ।
ચિન્માત્રમેવ મનનં ચિન્માત્રં શ્રવણં તથા ॥ ૧૬.૨૬॥

ચિન્માત્રમહમેવાસ્મિ સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રં નિર્ગુણં બ્રહ્મ ચિન્માત્રં સગુણં પરમ્ ॥ ૧૬.૨૭॥

ચિન્માત્રમહમેવ ત્વં સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રમેવ હૃદયં ચિન્માત્રં ચિન્મયં સદા ॥ ૧૬.૨૮॥

ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રમેવ શાન્તત્વં ચિન્માત્રં શાન્તિલક્ષણમ્ ॥ ૧૬.૨૯॥

ચિન્માત્રમેવ વિજ્ઞાનં ચિન્માત્રં બ્રહ્મ કેવલમ્ ।
ચિન્માત્રમેવ સઙ્કલ્પં ચિન્માત્રં ભુવનત્રયમ્ ॥ ૧૬.૩૦॥

ચિન્માત્રમેવ સર્વત્ર ચિન્માત્રં વ્યાપકો ગુરુઃ ।
ચિન્માત્રમેવ શુદ્ધત્વં ચિન્માત્રં બ્રહ્મ કેવલમ્ ॥ ૧૬.૩૧॥

ચિન્માત્રમેવ ચૈતન્યં ચિન્માત્રં ભાસ્કરાદિકમ્ ।
ચિન્માત્રમેવ સન્માત્રં ચિન્માત્રં જગદેવ હિ ॥ ૧૬.૩૨॥

ચિન્માત્રમેવ સત્કર્મ ચિન્માત્રં નિત્યમઙ્ગલમ્ ।
ચિન્માત્રમેવ હિ બ્રહ્મ ચિન્માત્રં હરિરેવ હિ ॥ ૧૬.૩૩॥

ચિન્માત્રમેવ મૌનાત્મા ચિન્માત્રં સિદ્ધિરેવ હિ ।
ચિન્માત્રમેવ જનિતં ચિન્માત્રં સુખમેવ હિ ॥ ૧૬.૩૪॥

ચિન્માત્રમેવ ગગનં ચિન્માત્રં પર્વતં જલમ્ ।
ચિન્માત્રમેવ નક્ષત્રં ચિન્માત્રં મેઘમેવ હિ ॥ ૧૬.૩૫॥

ચિદેવ દેવતાકારં ચિદેવ શિવપૂજનમ્ ।
ચિન્માત્રમેવ કાઠિન્યં ચિન્માત્રં શીતલં જલમ્ ॥ ૧૬.૩૬॥

ચિન્માત્રમેવ મન્તવ્યં ચિન્માત્રં દૃશ્યભાવનમ્ ।
ચિન્માત્રમેવ સકલં ચિન્માત્રં ભુવનં પિતા ॥ ૧૬.૩૭॥

ચિન્માત્રમેવ જનની ચિન્માત્રાન્નાસ્તિ કિઞ્ચન ।
ચિન્માત્રમેવ નયનં ચિન્માત્રં શ્રવણં સુખમ્ ॥ ૧૬.૩૮॥

ચિન્માત્રમેવ કરણં ચિન્માત્રં કાર્યમીશ્વરમ્ ।
ચિન્માત્રં ચિન્મયં સત્યં ચિન્માત્રં નાસ્તિ નાસ્તિ હિ ॥ ૧૬.૩૯॥

ચિન્માત્રમેવ વેદાન્તં ચિન્માત્રં બ્રહ્મ નિશ્ચયમ્ ।
ચિન્માત્રમેવ સદ્ભાવિ ચિન્માત્રં ભાતિ નિત્યશઃ ॥ ૧૬.૪૦॥

ચિદેવ જગદાકારં ચિદેવ પરમં પદમ્ ।
ચિદેવ હિ ચિદાકારં ચિદેવ હિ ચિદવ્યયઃ ॥ ૧૬.૪૧॥

ચિદેવ હિ શિવાકારં ચિદેવ હિ શિવવિગ્રહઃ ।
ચિદાકારમિદં સર્વં ચિદાકારં સુખાસુખમ્ ॥ ૧૬.૪૨॥

ચિદેવ હિ જડાકારં ચિદેવ હિ નિરન્તરમ્ ।
ચિદેવકલનાકારં જીવાકારં ચિદેવ હિ ॥ ૧૬.૪૩॥

ચિદેવ દેવતાકારં ચિદેવ શિવપૂજનમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૪૪॥

ચિદેવ પરમાકારં ચિદેવ હિ નિરામયમ્ ।
ચિન્માત્રમેવ સતતં ચિન્માત્રં હિ પરાયણમ્ ॥ ૧૬.૪૫॥

ચિન્માત્રમેવ વૈરાગ્યં ચિન્માત્રં નિર્ગુણં સદા ।
ચિન્માત્રમેવ સઞ્ચારં ચિન્માત્રં મન્ત્રતન્ત્રકમ્ ॥ ૧૬.૪૬॥

ચિદાકારમિદં વિશ્વં ચિદાકારં જગત્રયમ્ ।
ચિદાકારમહઙ્કારં ચિદાકારં પરાત્પરમ્ ॥ ૧૬.૪૭॥

ચિદાકારમિદં ભેદં ચિદાકારં તૃણાદિકમ્ ।
ચિદાકારં ચિદાકાશં ચિદાકારમરૂપકમ્ ॥ ૧૬.૪૮॥

ચિદાકારં મહાનન્દં ચિદાકારં સુખાત્સુખમ્ ।
ચિદાકારં સુખં ભોજ્યં ચિદાકારં પરં ગુરુમ્ ॥ ૧૬.૪૯॥

ચિદાકારમિદં વિશ્વં ચિદાકારમિદં પુમાન્ ।
ચિદાકારમજં શાન્તં ચિદાકારમનામયમ્ ॥ ૧૬.૫૦॥

ચિદાકારં પરાતીતં ચિદાકારં ચિદેવ હિ ।
ચિદાકારં ચિદાકાશં ચિદાકાશં શિવાયતે ॥ ૧૬.૫૧॥

ચિદાકારં સદા ચિત્તં ચિદાકારં સદાઽમૃતમ્ ।

ચિદાકારં ચિદાકાશં તદા સર્વાન્તરાન્તરમ્ ॥ ૧૬.૫૨॥

ચિદાકારમિદં પૂર્ણં ચિદાકારમિદં પ્રિયમ્ ।
ચિદાકારમિદં સર્વં ચિદાકારમહં સદા ॥ ૧૬.૫૩॥

ચિદાકારમિદં સ્થાનં ચિદાકારં હૃદમ્બરમ્ ।
ચિદાબોધં ચિદાકારં ચિદાકાશં તતં સદા ॥ ૧૬.૫૪॥

ચિદાકારં સદા પૂર્ણં ચિદાકારં મહત્ફલમ્ ।
ચિદાકારં પરં તત્ત્વં ચિદાકારં પરં ભવાન્ ॥ ૧૬.૫૫॥

ચિદાકારં સદામોદં ચિદાકારં સદા મૃતમ્ ।
ચિદાકારં પરં બ્રહ્મ ચિદહં ચિદહં સદા ॥ ૧૬.૫૬॥

ચિદહં ચિદહં ચિત્તં ચિત્તં સ્વસ્ય ન સંશયઃ ।
ચિદેવ જગદાકારં ચિદેવ શિવશઙ્કરઃ ॥ ૧૬.૫૭॥

ચિદેવ ગગનાકારં ચિદેવ ગણનાયકમ્ ।
ચિદેવ ભુવનાકારં ચિદેવ ભવભાવનમ્ ॥ ૧૬.૫૮॥

ચિદેવ હૃદયાકારં ચિદેવ હૃદયેશ્વરઃ ।
ચિદેવ અમૃતાકારં ચિદેવ ચલનાસ્પદમ્ ॥ ૧૬.૫૯॥

ચિદેવાહં ચિદેવાહં ચિન્મયં ચિન્મયં સદા ।
ચિદેવ સત્યવિશ્વાસં ચિદેવ બ્રહ્મભાવનમ્ ॥ ૧૬.૬૦॥

ચિદેવ પરમં દેવં ચિદેવ હૃદયાલયમ્ ।
ચિદેવ સકલાકારં ચિદેવ જનમણ્ડલમ્ ॥ ૧૬.૬૧॥

ચિદેવ સર્વમાનન્દં ચિદેવ પ્રિયભાષણમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૬૨॥

ચિદેવ પરમં ધ્યાનં ચિદેવ પરમર્હણમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્મયમેવ હિ ॥ ૧૬.૬૩॥

ચિદેવ ત્વં પ્રકરણં સર્વવેદેષુ દુર્લભમ્ ।
સકૃચ્છ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ ધ્રુવમ્ ॥ ૧૬.૬૪॥

યસ્યાભિધ્યાનયોગાજ્જનિમૃતિવિવશાઃ શાશ્વતં વૃત્તિભિર્યે
    માયામોહૈર્વિહીના હૃદુદરભયજં છિદ્યતે ગ્રન્થિજાતમ્ ।
વિશ્વં વિશ્વાધિકરસં ભવતિ ભવતો દર્શનાદાપ્તકામઃ

સો નિત્યો નિર્વિકલ્પો ભવતિ ભુવિ સદા બ્રહ્મભૂતોઽન્તરાત્મા ॥ ૧૬.૬૫॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
ચિદેવત્વમ્પ્રકરણવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥

## ૧૭. સર્વસિદ્ધાન્તસઙ્ગ્રહપ્રકરણં નામ સપ્તદશોઽધ્યાયઃ

ઋભુઃ -
નિદાઘ શ‍ૃણુ ગુહ્યં મે સર્વસિદ્ધાન્તસઙ્ગ્રહમ્ ।
દ્વૈતાદ્વૈતમિદં શૂન્યં શાન્તં બ્રહ્મૈવ સર્વદા ॥ ૧૭.૧॥

અહમેવ પરં બ્રહ્મ અહમેવ પરાત્પરમ્ ।
દ્વૈતાદ્વૈતમિદં શૂન્યં શાન્તં બ્રહ્મૈવ કેવલમ્ ॥ ૧૭.૨॥

અહમેવ હિ શાન્તાત્મા અહમેવ હિ સર્વગઃ ।
અહમેવ હિ શુદ્ધાત્મા અહમેવ હિ નિત્યશઃ ॥ ૧૭.૩॥

અહમેવ હિ નાનાત્મા અહમેવ હિ નિર્ગુણઃ ।
અહમેવ હિ નિત્યાત્મા અહમેવ હિ કારણમ્ ॥ ૧૭.૪॥

અહમેવ હિ જગત્સર્વં ઇદં ચૈવાહમેવ હિ ।
અહમેવ હિ મોદાત્મા અહમેવ હિ મુક્તિદઃ ॥ ૧૭.૫॥

અહમેવ હિ ચૈતન્યં અહમેવ હિ ચિન્મયઃ ।
અહમેવ હિ ચૈતન્યમહં સર્વાન્તરઃ સદા ॥ ૧૭.૬॥

અહમેવ હિ ભૂતાત્મા ભૌતિકં ત્વહમેવ હિ ।
અહમેવ ત્વમેવાહમહમેવાહમેવ હિ ॥ ૧૭.૭॥

જીવાત્મા ત્વહમેવાહમહમેવ પરેશ્વરઃ ।
અહમેવ વિભુર્નિત્યમહમેવ સ્વયં સદા ॥ ૧૭.૮॥

અહમેવાક્ષરં સાક્ષાદહમેવ હિ મે પ્રિયમ્ ।
અહમેવ સદા બ્રહ્મ અહમેવ સદાઽવ્યયઃ ॥ ૧૭.૯॥

અહમેવાહમેવાગ્રે (અહમેવાહમેકોઽયં) અહમેવાન્તરાન્તરઃ ।
અહમેવ ચિદાકાશમહમેવાવભાસકઃ ॥ ૧૭.૧૦॥

અહમેવ સદા સ્રષ્ટા અહમેવ હિ રક્ષકઃ ।
અહમેવ હિ લીલાત્મા અહમેવ હિ નિશ્ચયઃ ॥ ૧૭.૧૧॥

અહમેવ સદા સાક્ષી ત્વમેવ ત્વં પુરાતનઃ ।
ત્વમેવ હિ પરં બ્રહ્મ ત્વમેવ હિ નિરન્તરમ્ ॥ ૧૭.૧૨॥

અહમેવાહમેવાહમહમેવ ત્વમેવ હિ ।
અહમેવાદ્વયાકારઃ અહમેવ વિદેહકઃ ॥ ૧૭.૧૩॥

અહમેવ મમાધારઃ અહમેવ સદાત્મકઃ ।
અહમેવોપશાન્તાત્મા અહમેવ તિતિક્ષકઃ (વિવક્ષકઃ) ॥ ૧૭.૧૪॥

અહમેવ સમાધાનં શ્રદ્ધા ચાપ્યહમેવ હિ ।
અહમેવ મહાવ્યોમ અહમેવ કલાત્મકઃ ॥ ૧૭.૧૫॥

અહમેવ હિ કામાન્તઃ અહમેવ સદાન્તરઃ ।
અહમેવ પુરસ્તાચ્ચ અહં પશ્ચાદહં સદા ॥ ૧૭.૧૬॥

અહમેવ હિ વિશ્વાત્મા અહમેવ હિ કેવલમ્ ।
અહમેવ પરં બ્રહ્મ અહમેવ પરાત્પરઃ ॥ ૧૭.૧૭॥

અહમેવ ચિદાનન્દઃ અહમેવ સુખાસુખમ્ ।
અહમેવ ગુરુત્વં ચ અહમેવાચ્યુતઃ સદા ॥ ૧૭.૧૮॥

અહમેવ હિ વેદાન્તઃ અહમેવ હિ ચિન્તનઃ ।
દેહોઽહં શુદ્ધચૈતન્યઃ અહં સંશયવર્જિતઃ ॥ ૧૭.૧૯॥

અહમેવ પરં જ્યોતિરહમેવ પરં પદમ્ ।
અહમેવાવિનાશ્યાત્મા અહમેવ પુરાતનઃ ॥ ૧૭.૨૦॥

અહં બ્રહ્મ ન સન્દેહઃ અહમેવ હિ નિષ્કલઃ ।
અહં તુર્યો ન સન્દેહઃ અહમાત્મા ન સંશયઃ ॥ ૧૭.૨૧॥

અહમિત્યપિ હીનોઽહમહં ભાવનવર્જિતઃ ।
અહમેવ હિ ભાવાન્તા અહમેવ હિ શોભનમ્ ॥ ૧૭.૨૨॥

અહમેવ ક્ષણાતીતઃ અહમેવ હિ મઙ્ગલમ્ ।
અહમેવાચ્યુતાનન્દઃ અહમેવ નિરન્તરમ્ ॥ ૧૭.૨૩॥

અહમેવાપ્રમેયાત્મા અહં સઙ્કલ્પવર્જિતઃ ।
અહં બુદ્ધઃ પરન્ધામ અહં બુદ્ધિવિવર્જિતઃ ॥ ૧૭.૨૪॥

અહમેવ સદા સત્યં અહમેવ સદાસુખમ્ ।

અહમેવ સદા લભ્યં અહં સુલભકારણમ્ ॥ ૧૭.૨૫॥

અહં સુલભવિજ્ઞાનં દુર્લભો જ્ઞાનિનાં સદા ।
અહં ચિન્માત્ર એવાત્મા અહમેવ હિ ચિદ્ઘનઃ ॥ ૧૭.૨૬॥

અહમેવ ત્વમેવાહં બ્રહ્મૈવાહં ન સંશયઃ ।
અહમાત્મા ન સન્દેહઃ સર્વવ્યાપી ન સંશયઃ ॥ ૧૭.૨૭॥

અહમાત્મા પ્રિયં સત્યં સત્યં સત્યં પુનઃ પુનઃ ।
અહમાત્માઽજરો વ્યાપી અહમેવાત્મનો ગુરુઃ ॥ ૧૭.૨૮॥

અહમેવામૃતો મોક્ષો અહમેવ હિ નિશ્ચલઃ ।
અહમેવ હિ નિત્યાત્મા અહં મુક્તો ન સંશયઃ ॥ ૧૭.૨૯॥

અહમેવ સદા શુદ્ધઃ અહમેવ હિ નિર્ગુણઃ ।
અહં પ્રપઞ્ચહીનોઽહં અહં દેહવિવર્જિતઃ ॥ ૧૭.૩૦॥

અહં કામવિહીનાત્મા અહં માયાવિવર્જિતઃ ।
અહં દોષપ્રવૃત્તાત્મા અહં સંસારવર્જિતઃ ॥ ૧૭.૩૧॥

અહં સઙ્કલ્પરહિતો વિકલ્પરહિતઃ શિવઃ ।
અહમેવ હિ તુર્યાત્મા અહમેવ હિ નિર્મલઃ ॥ ૧૭.૩૨॥

અહમેવ સદા જ્યોતિરહમેવ સદા પ્રભુઃ ।
અહમેવ સદા બ્રહ્મ અહમેવ સદા પરઃ ॥ ૧૭.૩૩॥

અહમેવ સદા જ્ઞાનમહમેવ સદા મૃદુઃ ।
અહમેવ હિ ચિત્તં ચ અહં માનવિવર્જિતઃ ॥ ૧૭.૩૪॥

અહઙ્કારશ્ચ સંસારમહઙ્કારમસત્સદા ।
અહમેવ હિ ચિન્માત્રં મત્તોઽન્યન્નાસ્તિ નાસ્તિ હિ ॥ ૧૭.૩૫॥

અહમેવ હિ મે સત્યં મત્તોઽન્યન્નાસ્તિ કિઞ્ચન ।
મત્તોઽન્યત્તત્પદં નાસ્તિ મત્તોઽન્યત્ત્વત્પદં નહિ ॥ ૧૭.૩૬॥

પુણ્યમિત્યપિ ન ક્વાપિ પાપમિત્યપિ નાસ્તિ હિ ।
ઇદં ભેદમયં ભેદં સદસદ્ભેદમિત્યપિ ॥ ૧૭.૩૭॥

નાસ્તિ નાસ્તિ ત્વયા સત્યં સત્યં સત્યં પુનઃ પુનઃ ।
નાસ્તિ નાસ્તિ સદા નાસ્તિ સર્વં નાસ્તીતિ નિશ્ચયઃ ॥ ૧૭.૩૮॥

ઇદમેવ પરં બ્રહ્મ અહં બ્રહ્મ ત્વમેવ હિ ।
કાલો બ્રહ્મ કલા બ્રહ્મ કાર્યં બ્રહ્મ ક્ષણં તદા ॥ ૧૭.૩૯॥

સર્વં બ્રહ્માપ્યહં બ્રહ્મ બ્રહ્માસ્મીતિ ન સંશયઃ ।
ચિત્તં બ્રહ્મ મનો બ્રહ્મ સત્યં બ્રહ્મ સદાઽસ્મ્યહમ્ ॥ ૧૭.૪૦॥

નિર્ગુણં બ્રહ્મ નિત્યં ચ નિરન્તરમહં પરઃ ।
આદ્યન્તં બ્રહ્મ એવાહં આદ્યન્તં ચ નહિ ક્વચિત્ ॥ ૧૭.૪૧॥

અહમિત્યપિ વાર્તાઽપિ સ્મરણં ભાષણં ન ચ ।
સર્વં બ્રહ્મૈવ સન્દેહસ્ત્વમિત્યપિ ન હિ ક્વચિત્ ॥ ૧૭.૪૨॥

વક્તા નાસ્તિ ન સન્દેહઃ એષા ગીતા સુદુર્લભઃ ।
સદ્યો મોક્ષપ્રદં હ્યેતત્સદ્યો મુક્તિં પ્રયચ્છતિ ॥ ૧૭.૪૩॥

સદ્ય એવ પરં બ્રહ્મ પદં પ્રાપ્નોતિ નિશ્ચયઃ ।
સકૃચ્છ્રવણમાત્રેણ સદ્યો મુક્તિં પ્રયચ્છતિ ॥ ૧૭.૪૪॥

એતત્તુ દુર્લભં લોકે ત્રૈલોક્યેઽપિ ચ દુર્લભમ્ ।
અહં બ્રહ્મ ન સન્દેહ ઇત્યેવં ભાવયેદ્દૃઢમ્ ।
તતઃ સર્વં પરિત્યજ્ય તૂષ્ણીં તિષ્ઠ યથાસુખમ્ ॥ ૧૭.૪૫॥

સૂતઃ -
ભુવનગગનમધ્યધ્યાનયોગાઙ્ગસઙ્ગે
યમનિયમવિશેષૈર્ભસ્મરાગાઙ્ગસઙ્ગૈઃ ।
સુખમુખભરિતાશાઃ કોશપાશાદ્વિહીના
હૃદિ મુદિતપરાશાઃ શામ્ભવાઃ શમ્ભુવચ્ચ ॥ ૧૭.૪૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સર્વસિદ્ધાન્તસઙ્ગ્રહપ્રકરણં નામ સપ્તદશોઽધ્યાયઃ ॥

## ૧૮. ઋભુનિદાઘસંવાદો નામ અષ્ટદશોધ્યાયઃ

ઋભુઃ -
શ઼ૃણુ ભૂયઃ પરં તત્ત્વં સદ્યો મોક્ષપ્રદાયકમ્ ।
સર્વં બ્રહ્મૈવ સતતં સર્વં શાન્તં ન સંશયઃ ॥ ૧૮.૧॥

બ્રહ્માક્ષરમિદં સર્વં પરાકારમિદં નહિ ।

ઇદમિત્યપિ યદ્દોષં વયમિત્યપિ ભાષણમ્ ॥ ૧૮.૨॥

મત્તોઽન્યત્પાવનં નાસ્તિ મત્તોઽન્યત્સત્પદં ન હિ ।
મત્તોઽન્યદ્ધર્મરૂપં વા મત્તોઅન્યદખિલં ન ચ ॥ additional verse

યત્કિઞ્ચિત્સ્મરણં નાસ્તિ યત્કિઞ્ચિદ્ધ્યાનમેવ હિ ।
યત્કિઞ્ચિજ્જ્ઞાનરૂપં વા તત્સર્વં બ્રહ્મ એવ હિ ॥ ૧૮.૩॥

યત્કિઞ્ચિદ્બ્રહ્મવાક્યં વા યત્કિઞ્ચિદ્વેદવાક્યકમ્ ।
યત્કિઞ્ચિદ્ગુરુવાક્યં વા તત્સર્વં બ્રહ્મ એવ હિ ॥ ૧૮.૪॥

યત્કિઞ્ચિત્કલ્મષં સત્યં યત્કિઞ્ચિત્ પ્રિયભાષણમ્ ।
યત્કિઞ્ચિન્મનનં સત્તા તત્સર્વં બ્રહ્મ એવ હિ ॥ ૧૮.૫॥

યત્કિઞ્ચિચ્છ્રવણં નિત્યં યત્કિઞ્ચિદ્ધ્યાનમશ્નુતે ।
યત્કિઞ્ચિન્નિશ્ચયં શ્રદ્ધા તત્સર્વં બ્રહ્મ એવ હિ ॥ ૧૮.૬॥

યત્કિઞ્ચિદ્ગુરૂપદેશં (યત્કિઞ્ચિત્સદ્ગુરોર્વાક્યં) યત્કિઞ્ચિદ્ગુરુચિન્તનમ્ ।
યત્કિઞ્ચિદ્યોગભેદં વા તત્સર્વં બ્રહ્મ એવ હિ ॥ ૧૮.૭॥

સર્વં ત્યજ્ય ગુરું ત્યજ્ય સર્વં સન્ત્યજ્ય નિત્યશઃ ।
તૂષ્ણીમેવાસનં બ્રહ્મ સુખમેવ હિ કેવલમ્ ॥ ૧૮.૮॥

સર્વં ત્યક્ત્વા સુખં નિત્યં સર્વત્યાગં સુખં મહત્ ।
સર્વત્યાગં પરાનન્દં સર્વત્યાગં પરં સુખમ્ ॥ ૧૮.૯॥

સર્વત્યાગં મનસ્ત્યાગઃ સર્વત્યાગમહઙ્કૃતેઃ ।
સર્વત્યાગં મહાયાગઃ સર્વત્યાગં સુખં પરમ્ ॥ ૧૮.૧૦॥

સર્વત્યાગં મહામોક્ષં ચિત્તત્યાગં તદેવ હિ ।
ચિત્તમેવ જગન્નિત્યં ચિત્તમેવ હિ સંસૃતિઃ ॥ ૧૮.૧૧॥

ચિત્તમેવ મહામાયા ચિત્તમેવ શરીરકમ્ ।
ચિત્તમેવ ભયં દેહઃ ચિત્તમેવ મનોમયમ્ ॥ ૧૮.૧૨॥

ચિત્તમેવ પ્રપઞ્ચાખ્યં ચિત્તમેવ હિ કલ્મષમ્ ।
ચિત્તમેવ જડં સર્વં ચિત્તમેવેન્દ્રિયાદિકમ્ ॥ ૧૮.૧૩॥

ચિત્તમેવ સદા સત્યં ચિત્તમેવ નહિ ક્વચિત્ ।
ચિત્તમેવ મહાશાસ્ત્રં ચિત્તમેવ મનઃપ્રદમ્ ॥ ૧૮.૧૪॥

ચિત્તમેવ સદા પાપં ચિત્તમેવ સદા મતમ્ ।
ચિત્તમેવ હિ સર્વાખ્યં ચિત્તમેવ સદા જહિ (જયિ) ॥ ૧૮.૧૫ ॥

ચિત્તં નાસ્તીતિ ચિન્તા સ્યાદાત્મમાત્રં પ્રકાશતે ।
ચિત્તમસ્તીતિ ચિન્તા ચેચ્ચિત્તત્વં સ્વયમેવ હિ ॥ ૧૮.૧૬ ॥

સ્વયમેવ હિ ચિત્તાખ્યં સ્વયં બ્રહ્મ ન સંશયઃ ।
ચિત્તમેવ હિ સર્વાખ્યં ચિત્તં સર્વમિતિ સ્મૃતમ્ ॥ ૧૮.૧૭ ॥

બ્રહ્મૈવાહં સ્વયઞ્જ્યોતિર્બ્રહ્મૈવાહં ન સંશયઃ ।
સર્વં બ્રહ્મ ન સન્દેહઃ સર્વં ચિજ્જ્યોતિરેવ હિ ॥ ૧૮.૧૮ ॥

અહં બ્રહ્મૈવ નિત્યાત્મા પૂર્ણાત્પૂર્ણતરં સદા ।
અહં પૃથ્વ્યાદિસહિતં અહમેવ વિલક્ષણમ્ ॥ ૧૮.૧૯ ॥

અહં સૂક્ષ્મશરીરાન્તમહમેવ પુરાતનમ્ ।
અહમેવ હિ માનાત્મા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૮.૨૦ ॥

ચિદાકારો હ્યહં પૂર્ણશ્ચિદાકારમિદં જગત્ ।
ચિદાકારં ચિદાકાશં ચિદાકાશમહં સદા ॥ ૧૮.૨૧ ॥

ચિદાકાશં ત્વમેવાસિ ચિદાકાશમહં સદા ।
ચિદાકાશં ચિદેવેદં ચિદાકાશાન્ન કિઞ્ચન ॥ ૧૮.૨૨ ॥

ચિદાકાશતતં સર્વં ચિદાકાશં પ્રકાશકમ્ ।
ચિદાકારં મનોરૂપં ચિદાકાશં હિ ચિદ્ઘનમ્ ॥ ૧૮.૨૩ ॥

ચિદાકાશં પરં બ્રહ્મ ચિદાકાશં ચ ચિન્મયઃ ।
ચિદાકાશં શિવં સાક્ષાચ્ચિદાકાશમહં સદા ॥ ૧૮.૨૪ ॥

સચ્ચિદાનન્દરૂપોઽહં સચ્ચિદાનન્દશાશ્વતઃ ।
સચ્ચિદાનન્દ સન્માત્રં સચ્ચિદાનન્દભાવનઃ ॥ ૧૮.૨૫ ॥

સચ્ચિદાનન્દપૂર્ણોઽહં સચ્ચિદાનન્દકારણમ્ ।
સચ્ચિદાનન્દસન્દોહઃ સચ્ચિદાનન્દ ઈશ્વરઃ (હીનકઃ) ॥ ૧૮.૨૬ ॥

સચ્ચિદાનન્દનિત્યોઽહં સચ્ચિદાનન્દલક્ષણમ્ ।
સચ્ચિદાનન્દમાત્રોઽહં સચ્ચિદાનન્દરૂપકઃ ॥ ૧૮.૨૭ ॥

આત્મૈવેદમિદં સર્વમાત્મૈવાહં ન સંશયઃ ।
આત્મૈવાસ્મિ પરં સત્યમાત્મૈવ પરમં પદમ્ ॥ ૧૮.૨૮ ॥

આત્મૈવ જગદાકારં આત્મૈવ ભુવનત્રયમ્ ।
આત્મૈવ જગતાં શ્રેષ્ઠઃ આત્મૈવ હિ મનોમયઃ ॥ ૧૮.૨૯ ॥

આત્મૈવ જગતાં ત્રાતા આત્મૈવ ગુરુરાત્મનઃ ।
આત્મૈવ બહુધા ભાતિ આત્મૈવૈકં પરાત્મનઃ ॥ ૧૮.૩૦ ॥

આત્મૈવ પરમં બ્રહ્મ આત્મૈવાહં ન સંશયઃ ।
આત્મૈવ પરમં લોકં આત્મૈવ પરમાત્મનઃ ॥ ૧૮.૩૧ ॥

આત્મૈવ જીવરૂપાત્મા આત્મૈવેશ્વરવિગ્રહઃ ।
આત્મૈવ હરિરાનન્દઃ આત્મૈવ સ્વયમાત્મનઃ ॥ ૧૮.૩૨ ॥

આત્મૈવાનન્દસન્દોહ આત્મૈવેદં સદા સુખમ્ ।
આત્મૈવ નિત્યશુદ્ધાત્મા આત્મૈવ જગતઃ પરઃ ॥ ૧૮.૩૩ ॥

આત્મૈવ પઞ્ચભૂતાત્મા આત્મૈવ જ્યોતિરાત્મનઃ ।
આત્મૈવ સર્વદા નાન્યદાત્મૈવ પરમોઽવ્યયઃ ॥ ૧૮.૩૪ ॥

આત્મૈવ હ્યાત્મભાસાત્મા આત્મૈવ વિભુરવ્યયઃ ।
આત્મૈવ બ્રહ્મવિજ્ઞાનં આત્મૈવાહં ત્વમેવ હિ ॥ ૧૮.૩૫ ॥

આત્મૈવ પરમાનન્દ આત્મૈવાહં જગન્મયઃ ।
આત્મૈવાહં જગદ્ભાનં આત્મૈવાહં ન કિઞ્ચન ॥ ૧૮.૩૬ ॥

આત્મૈવ હ્યાત્મનઃ સ્નાનમાત્મૈવ હ્યાત્મનો જપઃ ।
આત્મૈવ હ્યાત્મનો મોદમાત્મૈવાત્મપ્રિયઃ સદા ॥ ૧૮.૩૭ ॥

આત્મૈવ હ્યાત્મનો નિત્યો હ્યાત્મૈવ ગુણભાસકઃ ।
આત્મૈવ તુર્યરૂપાત્મા આત્માતીતસ્તતઃ પરઃ ॥ ૧૮.૩૮ ॥

આત્મૈવ નિત્યપૂર્ણાત્મા આત્મૈવાહં ન સંશયઃ ।
આત્મૈવ ત્વમહં ચાત્મા સર્વમાત્મૈવ કેવલમ્ ॥ ૧૮.૩૯ ॥

નિત્યોઽહં નિત્યપૂર્ણોઽહં નિત્યોઽહં સર્વદા સદા ।
આત્મૈવાહં જગન્નાન્યદમૃતાત્મા પુરાતનઃ ॥ ૧૮.૪૦ ॥

પુરાતનોઽહં પુરુષોઽહમીશઃ પરાત્પરોઽહં પરમેશ્વરોઽહમ્ ।
ભવપ્રદોઽહં ભવનાશનોઽહં સુખપ્રદોઽહં સુખરૂપમદ્વયમ્ ॥ ૧૮.૪૧ ॥

આનન્દોઽહમશેષોઽહમમૃતોહં ન સંશયઃ ।

અજોઽહમાત્મરૂપોઽહમન્યન્નાસ્તિ સદા પ્રિયઃ ॥ ૧૮.૪૨॥

બ્રહ્મૈવાહમિદં બ્રહ્મ સર્વં બ્રહ્મ સદાઽવ્યયઃ ।
સદા સર્વપદં નાસ્તિ સર્વમેવ સદા ન હિ ॥ ૧૮.૪૩॥

નિર્ગુણોઽહં નિરાધાર અહં નાસ્તીતિ સર્વદા ।
અનર્થમૂલં નાસ્ત્યેવ માયાકાર્યં ન કિઞ્ચન ॥ ૧૮.૪૪॥

અવિદ્યાવિભવો નાસ્તિ અહં બ્રહ્મ ન સંશયઃ ।
સર્વં બ્રહ્મ ચિદાકાશં તદેવાહં ન સંશયઃ ॥ ૧૮.૪૫॥

તદેવાહં સ્વયં ચાહં પરં ચાહં પરેશ્વરઃ ।
વિદ્યાધરોઽહમેવાત્ર વિદ્યાવિદ્યે ન કિઞ્ચન ॥ ૧૮.૪૬॥

ચિદહં ચિદહં નિત્યં તુર્યોઽહં તુર્યકઃ પરઃ ।
બ્રહ્મૈવ સર્વં બ્રહ્મૈવ સર્વં બ્રહ્મ સદાઽસ્મ્યહમ્ ॥ ૧૮.૪૭॥

મત્તોઽન્યન્નાપરં કિઞ્ચિન્મત્તોઽન્યદ્બ્રહ્મ ચ ક્વચિત્ ।
મત્તોઽન્યત્પરમં નાસ્તિ મત્તોઽન્યચ્ચિત્પદં નહિ ॥ ૧૮.૪૮॥

મત્તોઽન્યત્સત્પદં નાસ્તિ મત્તોઽન્યચ્ચિત્પદં ન મે ।
મત્તોઽન્યદ્ભવનં નાસ્તિ મત્તોઽન્યદ્બ્રહ્મ એવ ન ॥ ૧૮.૪૯॥

મત્તોઽન્યત્કારણં નાસ્તિ મત્તોઽન્યત્કિઞ્ચિદપ્યણુ ।
મત્તોઽન્યત્સત્ત્વરૂપં ચ મત્તોઽન્યચ્છુદ્ધમેવ ન ॥ ૧૮.૫૦॥

મત્તોઽન્યત્પાવનં નાસ્તિ મત્તોઽન્યત્તત્પદં ન હિ ।
મત્તોઽન્યદ્ધર્મરૂપં વા મત્તોઽન્યદખિલં ન ચ ॥ ૧૮.૫૧॥

મત્તોઽન્યદસદેવાત્ર મત્તોઽન્યન્મિથ્યા એવ હિ ।
મત્તોઽન્યદ્ભાતિ સર્વસ્વં (સર્વસ્ય) મત્તોઽન્યચ્છશશૃઙ્ગવત્ ॥ ૧૮.૫૨॥

મત્તોઽન્યદ્ભાતિ ચેન્મિથ્યા મત્તોઽન્યચ્ચેન્દ્રજાલકમ્ ।
મત્તોઽન્યત્સંશયો (સદૃશં) નાસ્તિ મત્તોઽન્યત્કાર્ય
કારણં (લક્ષણમ્) ॥ ૧૮.૫૩॥

બ્રહ્મમાત્રમિદં સર્વં સોઽહમસ્મીતિ ભાવનમ્ ।
સર્વમુક્તં ભગવતા એવમેવેતિ નિશ્ચિનુ ॥ ૧૮.૫૪॥

બહુનોક્તેન કિં યોગિન્નિશ્ચયં કુરુ સર્વદા ।
સકૃન્નિશ્ચયમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૮.૫૫॥

વનનગભુવનં યચ્છઙ્કુરાન્નાન્યદસ્તિ
જગદિદમસુરાદ્યં દેવદેવઃ સ એવ ।
તનુમનગમનાદ્યૈઃ કોશકાશાવકાશે
સ ખલુ પરશિવાત્મા દૃશ્યતે સૂક્ષ્મબુદ્ધ્યા ॥ ૧૮.૫૬॥

ચક્ષુઃશ્રોત્રમનોઽસવશ્ચ હૃદિ ખાદુદ્ભાસિતધ્યાન્તરાત્
તસ્મિન્નેવ વિલીયતે ગતિપરં યદ્વાસના વાસિની ।
ચિત્તં ચેતયતે હૃદિન્દ્રિયગણં વાચાં મનોદૂરગં
તં બ્રહ્મામૃતમેતદેવ ગિરિજાકાન્તાત્મના સંજ્ઞિતમ્ ॥ ૧૮.૫૭॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કુરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
અષ્ટાદશોઽધ્યાયઃ ॥

## ૧૯. બ્રહ્માનન્દપ્રકરણં નામ એકોનવિંશોઽધ્યાયઃ

ઋભુઃ -
બ્રહ્માનન્દં પ્રવક્ષ્યામિ ત્રિષુ લોકેષુ દુર્લભમ્ ।
યસ્ય શ્રવણમાત્રેણ સદા મુક્તિમવાપ્નુયાત્ (યુક્તિમાપ્નુયાત્) ॥ ૧૯.૧॥

પરમાનન્દોઽહમેવાત્મા સર્વદાનન્દમેવ હિ ।
પૂર્ણાનન્દસ્વરૂપોઽહં ચિદાનન્દમયં જગત્ ॥ ૧૯.૨॥

સદાનન્તમનન્તોઽહં બોધાનન્દમિદં જગત્ ।
બુદ્ધાનન્દસ્વરૂપોઽહં નિત્યાનન્દમિદં મનઃ ॥ ૧૯.૩॥

કેવલાનન્દમાત્રોઽહં કેવલજ્ઞાનવાનહમ્ ।
ઇતિ ભાવય યત્નેન પ્રપઞ્ચોપશમાય વૈ ॥ ૧૯.૪॥

સદા સત્યં પરં જ્યોતિઃ સદા સત્યાદિલક્ષણઃ ।
સદા સત્યાદિહીનાત્મા સદા જ્યોતિઃ પ્રિયો હ્યહમ્ ॥ ૧૯.૫॥

નાસ્તિ મિથ્યાપ્રપઞ્ચાત્મા નાસ્તિ મિથ્યા મનોમયઃ ।
નાસ્તિ મિથ્યાભિધાનાત્મા નાસ્તિ ચિત્તં દુરાત્મવાન્ ॥ ૧૯.૬॥

નાસ્તિ મૂઢતરો લોકે નાસ્તિ મૂઢતમો નરઃ ।
અહમેવ પરં બ્રહ્મ અહમેવ સ્વયં સદા ॥ ૧૯.૭॥

ઇદં પરં ચ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ।
અહં બ્રહ્માસ્મિ શુદ્ધોઽસ્મિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૧૯.૮॥

જગત્સર્વં સદા નાસ્તિ ચિત્તમેવ જગન્મયમ્ ।
ચિત્તમેવ પ્રપઞ્ચાખ્યં ચિત્તમેવ શરીરકમ્ ॥ ૧૯.૯॥

ચિત્તમેવ મહાદોષં ચિત્તમેવ હિ બાલકઃ ।
ચિત્તમેવ મહાત્માઽયં ચિત્તમેવ મહાનસત્ ॥ ૧૯.૧૦॥

ચિત્તમેવ હિ મિથ્યાત્મા ચિત્તં શશવિષાણવત્ ।
ચિત્તં નાસ્તિ સદા સત્યં ચિત્તં વન્ધ્યાકુમારવત્ ॥ ૧૯.૧૧॥

ચિત્તં શૂન્યં ન સન્દેહો બ્રહ્મૈવ સકલં જગત્ ।
અહમેવ હિ ચૈતન્યં અહમેવ હિ નિર્ગુણમ્ ॥ ૧૯.૧૨॥

મન એવ હિ સંસારં મન એવ હિ મણ્ડલમ્ ।
મન એવ હિ બન્ધત્વં મન એવ હિ પાતકમ્ ॥ ૧૯.૧૩॥

મન એવ મહદ્દુઃખં મન એવ શરીરકમ્ ।
મન એવ પ્રપઞ્ચાખ્યં મન એવ કલેવરમ્ ॥ ૧૯.૧૪॥

મન એવ મહાસત્ત્વં મન એવ ચતુર્મુખઃ ।
મન એવ હરિઃ સાક્ષાન્મન એવ શિવઃ સ્મૃતઃ ॥ ૧૯.૧૫॥

મન એવેન્દ્રજાલાખ્યં મનઃ સઙ્કલ્પમાત્રકમ્ ।
મન એવ મહાપાપં મન એવ દુરાત્મવાન્ ॥ ૧૯.૧૬॥

મન એવ હિ સર્વાખ્યં મન એવ મહદ્ભયમ્ ।
મન એવ પરં બ્રહ્મ મન એવ હિ કેવલમ્ ॥ ૧૯.૧૭॥

મન એવ ચિદાકારં મન એવ મનાયતે ।
ચિદેવ હિ પરં રૂપં ચિદેવ હિ પરં પદમ્ ॥ ૧૯.૧૮॥

પરં બ્રહ્માહમેવાદ્ય પરં બ્રહ્માહમેવ હિ ।
અહમેવ હિ તૃપ્તાત્મા અહમાનન્દવિગ્રહઃ ॥ ૧૯.૧૯॥

અહં બુદ્ધિઃ પ્રવૃદ્ધાત્મા નિત્યં નિશ્ચલનિર્મલઃ ।
અહમેવ હિ શાન્તાત્મા અહમાદ્યન્તવર્જિતઃ ॥ ૧૯.૨૦॥

અહમેવ પ્રકાશાત્મા અહં બ્રહ્મૈવ કેવલમ્ ।
અહં નિત્યો ન સન્દેહ અહં બુદ્ધિઃ પ્રિયઃ સદા (બુદ્ધિપ્રિયઃ સદા) ॥ ૧૯.૨૧॥

અહમેવાહમેવૈકઃ અહમેવાખિલામૃતઃ ।
અહમેવ સ્વયં સિદ્ધઃ અહમેવાનુમોદકઃ ॥ ૧૯.૨૨॥

અહમેવ ત્વમેવાહં સર્વાત્મા સર્વવર્જિતઃ ।
અહમેવ પરં બ્રહ્મ અહમેવ પરાત્પરઃ ॥ ૧૯.૨૩॥

અહઙ્કારં ન મે દુઃખં ન મે દોષં ન મે સુખમ્ ।
ન મે બુદ્ધિર્ન મે ચિત્તં ન મે દેહો ન મેન્દ્રિયમ્ ॥ ૧૯.૨૪॥

ન મે ગોત્રં ન મે નેત્રં ન મે પાત્રં ન મે તૃણમ્ ।
ન મે જપો ન મે મન્ત્રો ન મે લોકો ન મે સુહૃત્ ॥ ૧૯.૨૫॥

ન મે બન્ધુર્ન મે શત્રુર્ન મે માતા ન મે પિતા ।
ન મે ભોજ્યં ન મે ભોક્તા ન મે વૃત્તિર્ન મે કુલમ્ ॥ ૧૯.૨૬॥

ન મે જાતિર્ન મે વર્ણઃ ન મે શ્રોત્રં ન મે ક્વચિત્ ।
ન મે બાહ્યં ન મે બુદ્ધિઃ સ્થાનં વાપિ ન મે વયઃ ॥ ૧૯.૨૭॥

ન મે તત્ત્વં ન મે લોકો ન મે શાન્તિર્ન મે કુલમ્ ।
ન મે કોપો ન મે કામઃ કેવલં બ્રહ્મમાત્રતઃ ॥ ૧૯.૨૮॥

કેવલં બ્રહ્મમાત્રત્વાત્ કેવલં સ્વયમેવ હિ ।
ન મે રાગો ન મે લોભો ન મે સ્તોત્રં ન મે સ્મૃતિઃ ॥ ૧૯.૨૯॥

ન મે મોહો ન મે તૃષ્ણા ન મે સ્નેહો ન મે ગુણઃ ।
ન મે કોશં ન મે બાલ્યં ન મે યૌવનવાર્ધકમ્ ॥ ૧૯.૩૦॥

સર્વં બ્રહ્મૈકરૂપત્વાદેકં બ્રહ્મેતિ નિશ્ચિતમ્ ।
બ્રહ્મણોઽન્યત્પરં નાસ્તિ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૧૯.૩૧॥

બ્રહ્મણોઽન્યદિદં નાસ્તિ બ્રહ્મણોઽન્યદિદં ન હિ ।
આત્મનોઽન્યત્સદા નાસ્તિ આત્મૈવાહં ન સંશયઃ ॥ ૧૯.૩૨॥

આત્મનોઽન્યત્સુખં નાસ્તિ આત્મનોઽન્યદહં ન ચ ।
ગ્રાહ્યગ્રાહકહીનોઽહં ત્યાગત્યાજ્યવિવર્જિતઃ ॥ ૧૯.૩૩॥

ન ત્યાજ્યં ન ચ મે ગ્રાહ્યં ન બન્ધો ન ચ ભુક્તિદં (મુક્તિદમ્) ।
ન મે લોકં ન મે હીનં ન શ્રેષ્ઠં નાપિ દૂષણમ્ ॥ ૧૯.૩૪॥

ન મે બલં ન ચણ્ડાલો ન મે વિપ્રાદિવર્ણકમ્ ।

ન મે પાનં ન મે હ્રસ્વં ન મે ક્ષીણં ન મે બલમ્ ॥ ૧૯.૩૫॥

ન મે શક્તિર્ન મે ભુક્તિર્ન મે દૈવં ન મે પૃથક્ ।
અહં બ્રહ્મૈકમાત્રત્વાન્નિત્યત્વાન્યન્ન કિઞ્ચન ॥ ૧૯.૩૬॥

ન મતં ન ચ મે મિથ્યા ન મે સત્યં વપુઃ ક્વચિત્ ।
અહમિત્યપિ નાસ્ત્યેવ બ્રહ્મ ઇત્યપિ નામ વા ॥ ૧૯.૩૭॥

યદ્યદ્યદ્યત્પ્રપઞ્ચોઽસ્તિ યદ્યદ્યદ્ગુરોર્વચઃ ।
તત્સર્વં બ્રહ્મ એવાહં તત્સર્વં ચિન્મયં મતમ્ ॥ ૧૯.૩૮॥

ચિન્મયં ચિન્મયં બ્રહ્મ સન્મયં સન્મયં સદા ।
સ્વયમેવ સ્વયં બ્રહ્મ સ્વયમેવ સ્વયં પરઃ ॥ ૧૯.૩૯॥

સ્વયમેવ સ્વયં મોક્ષઃ સ્વયમેવ નિરન્તરઃ ।
સ્વયમેવ હિ વિજ્ઞાનં સ્વયમેવ હિ નાસ્ત્યકમ્ ॥ ૧૯.૪૦॥

સ્વયમેવ સદાસારઃ સ્વયમેવ સ્વયં પરઃ ।
સ્વયમેવ હિ શૂન્યાત્મા સ્વયમેવ મનોહરઃ ॥ ૧૯.૪૧॥

તૂષ્ણીમેવાસનં સ્નાનં તૂષ્ણીમેવાસનં જપઃ ।
તૂષ્ણીમેવાસનં પૂજા તૂષ્ણીમેવાસનં પરઃ ॥ ૧૯.૪૨॥

વિચાર્ય મનસા નિત્યમહં બ્રહ્મેતિ નિશ્ચિનુ ।
અહં બ્રહ્મ ન સન્દેહઃ એવં તૂષ્ણીંસ્થિતિર્જપઃ ॥ ૧૯.૪૩॥

સર્વં બ્રહ્મૈવ નાસ્ત્યન્યત્સર્વં જ્ઞાનમયં તપઃ ।
સ્વયમેવ હિ નાસ્ત્યેવ સર્વાતીતસ્વરૂપવાન્ ॥ ૧૯.૪૪॥

વાચાતીતસ્વરૂપોઽહં વાચા જપ્યમનર્થકમ્ ।
માનસઃ પરમાર્થોઽયં એતદ્ભેદમહં ન મે ॥ ૧૯.૪૫॥

કુણપં સર્વભૂતાદિ કુણપં સર્વસઙ્ગ્રહમ્ ।
અસત્યં સર્વદા લોકમસત્યં સકલં જગત્ ॥ ૧૯.૪૬॥

અસત્યમન્યદસ્તિત્વમસત્યં નાસ્તિ ભાષણમ્ ।
અસત્યાકારમસ્તિત્વં બ્રહ્મમાત્રં સદા સ્વયમ્ ॥ ૧૯.૪૭॥

અસત્યં વેદવેદાઙ્ગં અસત્યં શાસ્ત્રનિશ્ચયઃ ।
અસત્યં શ્રવણં હ્યેતદસત્યં મનનં ચ તત્ ॥ ૧૯.૪૮॥

અસત્યં ચ નિદિધ્યાસઃ સજાતીયમસત્યકમ્ ।
વિજાતીયમસત્પ્રોક્તં સત્યં સત્યં ન સંશયઃ ।
સર્વં બ્રહ્મ સદા બ્રહ્મ એકં બ્રહ્મ ચિદવ્યયમ્ ॥ ૧૯.૪૯॥

ચેતોવિલાસજનિતં કિલ વિશ્વમેત-
દ્વિશ્વાધિકસ્ય કૃપયા પરિપૂર્ણભાસ્યાત્ ।
નાસ્ત્યન્યતઃ શ્રુતિશિરોત્થિતવાક્યમોઘ-
શાસ્ત્રાનુસારિકરણૈર્ભવતે વિમુક્ત્યૈ ॥ ૧૯.૫૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
બ્રહ્માનન્દપ્રકરણં નામ એકોનવિંશોઽધ્યાયઃ ॥

## ૨૦. આત્મવૈભવપ્રકરણં નામ વિંશોઽધ્યાયઃ

ઋભુઃ -
શ્ૃણુ કેવલમત્યન્તં રહસ્યં પરમાદ્ભુતમ્ ।
ઇતિ ગુહ્યતરં સદ્યો મોક્ષપ્રદમિદં સદા ॥ ૨૦.૧॥

સુલભં બ્રહ્મવિજ્ઞાનં સુલભં શુભમુત્તમમ્ ।
સુલભં બ્રહ્મનિષ્ઠાનાં સુલભં સર્વબોધકમ્ ॥ ૨૦.૨॥

સુલભં કૃતકૃત્યાનાં સુલભં સ્વયમાત્મનઃ ।
સુલભં કારણાભાવં સુલભં બ્રહ્મણિ સ્થિતમ્ ॥ ૨૦.૩॥

સુલભં ચિત્તહીનાનાં સ્વયં તચ્ચ સ્વયં સ્વયમ્ ।
સ્વયં સંસારહીનાનાં ચિત્તં સંસારમુચ્યતે ॥ ૨૦.૪॥

સૃષ્ટ્વૈદં ન સંસારઃ બ્રહ્મૈવેદં મનો ન ચ ।
બ્રહ્મૈવેદં ભયં નાસ્તિ બ્રહ્મૈવેદં ન કિઞ્ચન ॥ ૨૦.૫॥

બ્રહ્મૈવેદમસત્સર્વં બ્રહ્મૈવેદં પરાયણમ્ ।
બ્રહ્મૈવેદં શરીરાણાં બ્રહ્મૈવેદં તૃણં ન ચ ॥ ૨૦.૬॥

બ્રહ્મૈવાસ્મિ ન ચાન્યોઽસ્મિ બ્રહ્મૈવેદં જગન્ન ચ ।
બ્રહ્મૈવેદં વિયન્નાસ્તિ બ્રહ્મૈવેદં ક્રિયા ન ચ ॥ ૨૦.૭॥

બ્રહ્મૈવેદં મહાત્માનં બ્રહ્મૈવેદં પ્રિયં સદા ।
બ્રહ્મૈવેદં જગન્નાન્તો બ્રહ્મૈવાહં ભયં ન હિ ॥ ૨૦.૮॥

બ્રહ્મૈવાહં સદાચિત્તં બ્રહ્મૈવાહમિદં ન હિ ।
બ્રહ્મૈવાહં તુ યન્મિથ્યા બ્રહ્મૈવાહમિયં ભ્રમા ॥ ૨૦.૯॥

બ્રહ્મૈવ સર્વસિદ્ધાન્તો બ્રહ્મૈવ મનસાસ્પદમ્ ।
બ્રહ્મૈવ સર્વભવનં બ્રહ્મૈવ મુનિમણ્ડલમ્ ॥ ૨૦.૧૦॥

બ્રહ્મૈવાહં તુ નાસ્ત્યન્યદ્બ્રહ્મૈવ ગુરુપૂજનમ્ ।
બ્રહ્મૈવ નાન્યત્કિઞ્ચિત્તુ બ્રહ્મૈવ સકલં સદા ॥ ૨૦.૧૧॥

બ્રહ્મૈવ ત્રિગુણાકારં બ્રહ્મૈવ હરિરૂપકમ્ ।
બ્રહ્મણોઽન્યત્પદં નાસ્તિ બ્રહ્મણોઽન્યત્ક્ષણં ન મે ॥ ૨૦.૧૨॥

બ્રહ્મૈવાહં નાન્યવાર્તા બ્રહ્મૈવાહં ન ચ શ્રુતમ્ ।
બ્રહ્મૈવાહં સમં નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૦.૧૩॥

બ્રહ્મૈવાહં ન મે ભોગો બ્રહ્મૈવાહં ન મે પૃથક્ ।
બ્રહ્મૈવાહં સતં નાસ્તિ બ્રહ્મૈવ બ્રહ્મરૂપકઃ ॥ ૨૦.૧૪॥

બ્રહ્મૈવ સર્વદા ભાતિ બ્રહ્મૈવ સુખમુત્તમમ્ ।
બ્રહ્મૈવ નાનાકારત્વાત્બ્રહ્મૈવાહં પ્રિયં મહત્ ॥ ૨૦.૧૫॥

બ્રહ્મૈવ બ્રહ્મણઃ પૂજ્યં બ્રહ્મૈવ બ્રહ્મણો ગુરુઃ ।
બ્રહ્મૈવ બ્રહ્મમાતા તુ બ્રહ્મૈવાહં પિતા સુતઃ ॥ ૨૦.૧૬॥

બ્રહ્મૈવ બ્રહ્મ દેવં ચ બ્રહ્મૈવ બ્રહ્મ તજ્જયઃ ।
બ્રહ્મૈવ ધ્યાનરૂપાત્મા બ્રહ્મૈવ બ્રહ્મણો ગુણઃ ॥ ૨૦.૧૭॥

આત્મૈવ સર્વનિત્યાત્મા આત્મનોઽન્યન્ન કિઞ્ચન ।
આત્મૈવ સતતં હ્યાત્મા આત્મૈવ ગુરુરાત્મનઃ ॥ ૨૦.૧૮॥

આત્મજ્યોતિરહમ્ભૂતમાત્મૈવાસ્તિ સદા સ્વયમ્ ।
સ્વયં તત્ત્વમસિ બ્રહ્મ સ્વયં ભામિ પ્રકાશકઃ ॥ ૨૦.૧૯॥

સ્વયં જીવત્વસંશાન્તિઃ સ્વયમીશ્વરરૂપવાન્ ।
સ્વયં બ્રહ્મ પરં બ્રહ્મ સ્વયં કેવલમવ્યયમ્ ॥ ૨૦.૨૦॥

સ્વયં નાશં ચ સિદ્ધાન્તં સ્વયમાત્મા પ્રકાશકઃ ।
સ્વયં પ્રકાશરૂપાત્મા સ્વયમત્યન્તનિર્મલઃ ॥ ૨૦.૨૧॥

સ્વયમેવ હિ નિત્યાત્મા સ્વયં શુદ્ધઃ પ્રિયાપ્રિયઃ ।
સ્વયમેવ સ્વયં છન્દઃ સ્વયં દેહાદિવર્જિતઃ ॥ ૨૦.૨૨॥

સ્વયં દોષવિહીનાત્મા સ્વયમાકાશવત્સ્થિતઃ ।
અયં ચેદં ચ નાસ્ત્યેવ અયં ભેદવિવર્જિતઃ ॥ ૨૦.૨૩॥

બ્રહ્મૈવ ચિત્તવદ્ભાતિ બ્રહ્મૈવ શિવવત્ સદા ।
બ્રહ્મૈવ બુદ્ધિવદ્ભાતિ બ્રહ્મૈવ શિવવત્ સદા ॥ ૨૦.૨૪॥

બ્રહ્મૈવ શશવદ્ભાતિ બ્રહ્મૈવ સ્થૂલવત્સ્વયમ્ ।
બ્રહ્મૈવ સતતં નાન્યત્બ્રહ્મૈવ ગુરુરાત્મનઃ ॥ ૨૦.૨૫॥

આત્મજ્યોતિરહં ભૂતમહં નાસ્તિ સદા સ્વયમ્ ।
સ્વયમેવ પરં બ્રહ્મ સ્વયમેવ ચિદવ્યયઃ ॥ ૨૦.૨૬॥

સ્વયમેવ સ્વયં જ્યોતિઃ સ્વયં સર્વત્ર ભાસતે ।
સ્વયં બ્રહ્મ સ્વયં દેહઃ સ્વયં પૂર્ણઃ પરઃ પુમાન્ ॥ ૨૦.૨૭॥

સ્વયં તત્ત્વમસિ બ્રહ્મ સ્વયં ભાતિ પ્રકાશકઃ ।
સ્વયં જીવત્વસંશાન્તઃ સ્વયમીશ્વરરૂપવાન્ ॥ ૨૦.૨૮॥

સ્વયમેવ પરં બ્રહ્મ સ્વયં કેવલમવ્યયઃ ।
સ્વયં રાદ્ધાન્તસિદ્ધાન્તઃ સ્વયમાત્મા પ્રકાશકઃ ॥ ૨૦.૨૯॥

સ્વયં પ્રકાશરૂપાત્મા સ્વયમત્યન્તનિર્મલઃ ।
સ્વયમેવ હિ નિત્યાત્મા સ્વયં શુદ્ધઃ પ્રિયાપ્રિયઃ ॥ ૨૦.૩૦॥

સ્વયમેવ સ્વયં સ્વસ્થઃ સ્વયં દેહવિવર્જિતઃ ।
સ્વયં દોષવિહીનાત્મા સ્વયમાકાશવત્સ્થિતઃ ॥ ૨૦.૩૧॥

અખણ્ડઃ પરિપૂર્ણોઽહમખણ્ડરસપૂરણઃ ।
અખણ્ડાનન્દ એવાહમપરિચ્છિન્નવિગ્રહઃ ॥ ૨૦.૩૨॥

ઇતિ નિશ્ચિત્ય પૂર્ણાત્મા બ્રહ્મૈવ ન પૃથક્સ્વયમ્ ।
અહમેવ હિ નિત્યાત્મા અહમેવ હિ શાશ્વતઃ ॥ ૨૦.૩૩॥

અહમેવ હિ તદ્બ્રહ્મ બ્રહ્મૈવાહં જગત્પ્રભુઃ ।
બ્રહ્મૈવાહં નિરાભાસો બ્રહ્મૈવાહં નિરામયઃ ॥ ૨૦.૩૪॥

બ્રહ્મૈવાહં ચિદાકાશો બ્રહ્મૈવાહં નિરન્તરઃ ।
બ્રહ્મૈવાહં મહાનન્દો બ્રહ્મૈવાહં સદાત્મવાન્ ॥ ૨૦.૩૫॥

બ્રહ્મૈવાહમનન્તાત્મા બ્રહ્મૈવાહં સુખં પરમ્ ।

બ્રહ્મૈવાહં મહામૌની સર્વવૃત્તાન્તવર્જિતઃ ॥ ૨૦.૩૬॥

બ્રહ્મૈવાહમિદં મિથ્યા બ્રહ્મૈવાહં જગન્ન હિ ।
બ્રહ્મૈવાહં ન દેહોઽસ્મિ બ્રહ્મૈવાહં મહાદ્વયઃ ॥ ૨૦.૩૭॥

બ્રહ્મૈવ ચિત્તવદ્ભાતિ બ્રહ્મૈવ શિવવત્સદા ।
બ્રહ્મૈવ બુદ્ધિવદ્ભાતિ બ્રહ્મૈવ ફલવત્સ્વયમ્ ॥ ૨૦.૩૮॥

બ્રહ્મૈવ મૂર્તિવદ્ભાતિ તદ્બ્રહ્માસિ ન સંશયઃ ।
બ્રહ્મૈવ કાલવદ્ભાતિ બ્રહ્મૈવ સકલાદિવત્ ॥ ૨૦.૩૯॥

બ્રહ્મૈવ ભૂતિવદ્ભાતિ બ્રહ્મૈવ જડવત્સ્વયમ્ ।
બ્રહ્મૈવૌઙ્કારવત્સર્વં બ્રહ્મૈવૌઙ્કારરૂપવત્ ॥ ૨૦.૪૦॥

બ્રહ્મૈવ નાદવદ્બ્રહ્મ નાસ્તિ ભેદો ન ચાદ્વયમ્ ।
સત્યં સત્યં પુનઃ સત્યં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૨૦.૪૧॥

બ્રહ્મૈવ સર્વમાત્મૈવ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
સર્વં મિથ્યા જગન્મિથ્યા દૃશ્યત્વાદ્ઘટવત્ સદા ॥ ૨૦.૪૨॥

બ્રહ્મૈવાહં ન સન્દેહશ્ચિન્માત્રત્વાદહં સદા ।
બ્રહ્મૈવ શુદ્ધરૂપત્વાદ્દૃગ્રૂપત્વાત્સ્વયં મહત્ ॥ ૨૦.૪૩॥

અહમેવ પરં બ્રહ્મ અહમેવ પરાત્પરઃ ।
અહમેવ મનોતીત અહમેવ જગત્પરઃ ॥ ૨૦.૪૪॥

અહમેવ હિ નિત્યાત્મા અહં મિથ્યા સ્વભાવતઃ ।
આનન્દોઽહં નિરાધારો બ્રહ્મૈવ ન ચ કિઞ્ચન ॥ ૨૦.૪૫॥

નાન્યત્કિઞ્ચિદહં બ્રહ્મ નાન્યત્કિઞ્ચિચ્ચિદવ્યયઃ ।
આત્મનોઽન્યત્પરં તુચ્છમાત્મનોઽન્યદહં નહિ ॥ ૨૦.૪૬॥

આત્મનોઽન્યન્ન મે દેહઃ આત્મૈવાહં ન મે મલમ્ ।
આત્મન્યેવાત્મના ચિત્તમાત્મૈવાહં ન તત્પૃથક્ ॥ ૨૦.૪૭॥

આત્મૈવાહમહં શૂન્યમાત્મૈવાહં સદા ન મે ।
આત્મૈવાહં ગુણો નાસ્તિ આત્મૈવ ન પૃથક્ક્વચિત્ ॥ ૨૦.૪૮॥

અત્યન્તાભાવ એવ ત્વં અત્યન્તાભાવમીદૃશમ્ ।
અત્યન્તાભાવ એવેદમત્યન્તાભાવમણ્વપિ ॥ ૨૦.૪૯॥

આત્મૈવાહં પરં બ્રહ્મ સર્વં મિથ્યા જગત્ત્રયમ્ ।
અહમેવ પરં બ્રહ્મ અહમેવ પરો ગુરુઃ ॥ ૨૦.૫૦॥

જીવભાવં સદાસત્યં શિવસદ્ભાવમીદૃશમ્ ।
વિષ્ણુવદ્ભાવનાભ્રાન્તિઃ સર્વં શશવિષાણવત્ ॥ ૨૦.૫૧॥

અહમેવ સદા પૂર્ણં અહમેવ નિરન્તરમ્ ।
નિત્યતૃપ્તો નિરાકારો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૨૦.૫૨॥

અહમેવ પરાનન્દ અહમેવ ક્ષણાન્તિકઃ ।
અહમેવ ત્વમેવાહં ત્વં ચાહં નાસ્તિ નાસ્તિ હિ ॥ ૨૦.૫૩॥

વાચામગોચરોઽહં વૈ વાઙ્મનો નાસ્તિ કલ્પિતમ્ ।
અહં બ્રહ્મૈવ સર્વાત્મા અહં બ્રહ્મૈવ નિર્મલઃ ॥ ૨૦.૫૪॥

અહં બ્રહ્મૈવ ચિન્માત્રં અહં બ્રહ્મૈવ નિત્યશઃ ।
ઇદં ચ સર્વદા નાસ્તિ અહમેવ સદા સ્થિરઃ ॥ ૨૦.૫૫॥

ઇદં સુખમહં બ્રહ્મ ઇદં સુખમહં જડમ્ ।
ઇદં બ્રહ્મ ન સન્દેહઃ સત્યં સત્યં પુનઃ પુનઃ ॥ ૨૦.૫૬॥

ઇત્યાત્મવૈભવં પ્રોક્તં સર્વલોકેષુ દુર્લભમ્ ।
સકૃચ્છ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૨૦.૫૭॥

શાન્તિદાન્તિપરમા ભવતાન્તાઃ સ્વાન્તભાન્તમનિશં શશિકાન્તમ્ ।
અન્તકાન્તકમહો કલયન્તો વેદમૌલિવચનૈઃ કિલ શાન્તાઃ ॥ ૨૦.૫૮॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
આત્મવૈભવપ્રકરણં નામ વિંશોઽધ્યાયઃ ॥

## ૨૧. સર્વપ્રપઞ્ચહેયત્વપ્રકરણવર્ણનં નામ એકવિંશોઽધ્યાયઃ

ઋભુઃ -
મહારહસ્યં વક્ષ્યામિ વેદાન્તેષુ ચ ગોપિતમ્ ।
યસ્ય શ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૨૧.૧॥

સચ્ચિદાનન્દમાત્રોઽહં સર્વં સચ્ચિન્મયં તતમ્ ।
તદેવ બ્રહ્મ સમ્પશ્યત્બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૨૧.૨॥

અહં બ્રહ્મ ઇદં બ્રહ્મ નાના બ્રહ્મ ન સંશયઃ ।

સત્યં બ્રહ્મ સદા બ્રહ્માપ્યહં બ્રહ્મૈવ કેવલમ્ ॥ ૨૧.૩॥

ગુરુર્બ્રહ્મ ગુણો બ્રહ્મ સર્વં બ્રહ્મપરોઽસ્મ્યહમ્ ।
નાન્તં બ્રહ્મ અહં બ્રહ્મ સર્વં બ્રહ્માપરોઽસ્મ્યહમ્ ॥ ૨૧.૪॥

વેદવેદ્યં પરં બ્રહ્મ વિદ્યા બ્રહ્મ વિશેષતઃ ।
આત્મા બ્રહ્મ અહં બ્રહ્મ આદ્યન્તં બ્રહ્મ સોઽસ્મ્યહમ્ ॥ ૨૧.૫॥

સત્યં બ્રહ્મ સદા બ્રહ્મ અન્યન્નાસ્તિ સદા પરમ્ ।
અહં બ્રહ્મ ત્વહં નાસ્તિ અહઙ્કારપરં નહિ ॥ ૨૧.૬॥

અહં બ્રહ્મ ઇદં નાસ્તિ અયમાત્મા મહાન્સદા ।
વેદાન્તવેદ્યો બ્રહ્માત્મા અપરં શશશૃઙ્ગવત્ ॥ ૨૧.૭॥

ભૂતં નાસ્તિ ભવિષ્યં ન બ્રહ્મૈવ સ્થિરતાં ગતઃ ।
ચિન્મયોઽહં જડં તુચ્છં ચિન્માત્રં દેહનાશનમ્ ॥ ૨૧.૮॥

ચિત્તં કિઞ્ચિત્ક્વચિચ્ચાપિ ચિત્તં દૂરોઽહમાત્મકઃ (હરોઽહમાત્મકઃ) ।
સત્યં જ્ઞાનમનન્તં યન્નાનૃતં જડદુઃખકમ્ ॥ ૨૧.૯॥

આત્મા સત્યમનન્તાત્મા દેહમેવ ન સંશયઃ ।
વાર્તાપ્યસચ્છ્રુતં તન્ન અહમેવ મહોમહઃ ॥ ૨૧.૧૦॥

એકસઙ્ખ્યાપ્યસદ્બ્રહ્મ સત્યમેવ સદાઽપ્યહમ્ ।
સર્વમેવમસત્યં ચ ઉત્પન્નત્વાત્પરાત્સદા ॥ ૨૧.૧૧॥

સર્વાવયવહીનોઽપિ નિત્યત્વાત્પરમો હ્યહમ્ ।
સર્વં દૃશ્યં ન મે કિઞ્ચિત્ચિન્મયત્વાદ્વદામ્યહમ્ ॥ ૨૧.૧૨॥

આગ્રહં ચ ન મે કિઞ્ચિત્ચિન્મયત્વાદ્વદામ્યહમ્ ।
ઇદમિત્યપિ નિર્દેશો ન ક્વચિન્ન ક્વચિત્સદા ॥ ૨૧.૧૩॥

નિર્ગુણબ્રહ્મ એવાહં સુગુરોરુપદેશતઃ ।
વિજ્ઞાનં સગુણો (સગુણં) બ્રહ્મ અહં વિજ્ઞાનવિગ્રહઃ ॥ ૨૧.૧૪॥

નિર્ગુણોઽસ્મિ નિરંશોઽસ્મિ ભવોઽસ્મિ ભરણોઽસ્મ્યહમ્ ।
દેવોઽસ્મિ દ્રવ્યપૂર્ણોઽસ્મિ શુદ્ધોઽસ્મિ રહિતોઽસ્મ્યહમ્ ॥ ૨૧.૧૫॥

રસોઽસ્મિ રસહીનોઽસ્મિ તુર્યોઽસ્મિ શુભભાવનઃ ।
કામોઽસ્મિ (કાર્યોઽસ્મિ) કાર્યહીનોઽસ્મિ નિત્યનિર્મલવિગ્રહઃ ॥ ૨૧.૧૬॥

આચારફલહીનોઽસ્મિ અહં બ્રહ્માસ્મિ કેવલમ્ ।
ઇદં સર્વં પરં બ્રહ્મ અયમાત્મા ન વિસ્મયઃ ॥ ૨૧.૧૭॥

પૂર્ણાપૂર્ણસ્વરૂપાત્મા નિત્યં સર્વાત્મવિગ્રહઃ ।
પરમાનન્દતત્ત્વાત્મા પરિચ્છિન્નં ન હિ ક્વચિત્ ॥ ૨૧.૧૮॥

એકાત્મા નિર્મલાકાર અહમેવેતિ ભાવય ।
અહમ્ભાવનયા યુક્ત અહમ્ભાવેન સંયુતઃ ॥ ૨૧.૧૯॥

શાન્તં ભાવય સર્વાત્મા શામ્યતત્ત્વં (શામ્યત્યન્તં) મનોમલઃ ।
દેહોઽહમિતિ સન્ત્યજ્ય બ્રહ્માહમિતિ નિશ્ચિનુ ॥ ૨૧.૨૦॥

બ્રહ્મૈવાહં બ્રહ્મમાત્રં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
ઇદં નાહમિદં નાહમિદં નાહં સદા સ્મર ॥ ૨૧.૨૧॥

અહં સોઽહમહં સોઽહમહં બ્રહ્મેતિ ભાવય ।
ચિદહં ચિદહં બ્રહ્મ ચિદહં ચિદહં વદ ॥ ૨૧.૨૨॥

નેદં નેદં સદા નેદં ન ત્વં નાહં ચ ભાવય ।
સર્વં બ્રહ્મ ન સન્દેહઃ સર્વં વેદં ન કિઞ્ચન ॥ ૨૧.૨૩॥

સર્વં શબ્દાર્થભવનં સર્વલોકભયન્ન ચ ।
સર્વતીર્થં ન સત્યં હિ સર્વદેવાલયં ન હિ ॥ ૨૧.૨૪॥

સર્વચૈતન્યમાત્રત્વાત્ સર્વં નામ સદા ન હિ ।
સર્વરૂપં પરિત્યજ્ય સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૨૧.૨૫॥

બ્રહ્મૈવ સર્વં તત્સત્યં પ્રપઞ્ચં પ્રકૃતિર્નહિ ।
પ્રાકૃતં સ્મરણં ત્યજ્ય બ્રહ્મસ્મરણમાહર ॥ ૨૧.૨૬॥

તતસ્તદપિ સન્ત્યજ્ય નિજરૂપે સ્થિરો ભવ ।
સ્થિરરૂપં પરિત્યજ્ય આત્મમાત્રં ભવત્યસૌ ॥ ૨૧.૨૭॥

ત્યાગત્વમપિ સન્ત્યજ્ય ભેદમાત્રં સદા ત્યજ ।
સ્વયં નિજં સમાવૃત્ય સ્વયમેવ સ્વયં ભજ ॥ ૨૧.૨૮॥

ઇદમિત્યઙ્ગુલીદૃષ્ટમિદમસ્તમચેતનમ્ ।
ઇદં વાક્યં ચ વાક્યેન વાચાઽપિ પરિવેદનમ્ ॥ ૨૧.૨૯॥

સર્વભાવં (સર્વભ્રાન્તં) ન સન્દેહઃ સર્વં નાસ્તિ ન સંશયઃ ।
સર્વં તુચ્છં ન સન્દેહઃ સર્વં માયા ન સંશયઃ ॥ ૨૧.૩૦॥

ત્વં બ્રહ્માહં ન સન્દેહો બ્રહ્મૈવેદં ન સંશયઃ ।
સર્વં ચિત્તં ન સન્દેહઃ સર્વં બ્રહ્મ ન સંશયઃ ॥ ૨૧.૩૧॥

બ્રહ્માન્યદ્ભાતિ ચેન્મિથ્યા સર્વં મિથ્યા પરાવરા ।
ન દેહં પઞ્ચભૂતં વા ન ચિત્તં ભ્રાન્તિમાત્રકમ્ ॥ ૨૧.૩૨॥

ન ચ બુદ્ધીન્દ્રિયાભાવો ન મુક્તિર્બ્રહ્મમાત્રકમ્ ।
નિમિષં ચ ન શઙ્કાપિ ન સઙ્કલ્પં તદસ્તિ ચેત્ ॥ ૨૧.૩૩॥

અહઙ્કારમસદ્વિદ્ધિ અભિમાનં તદસ્તિ ચેત્ ।
ન ચિત્તસ્મરણં તચ્ચેન્ન સન્દેહો જરા યદિ ॥ ૨૧.૩૪॥

પ્રાણો .... દીયતે શાસ્તિ ઘ્રાણો યદિહ ગન્ધકમ્ ।
ચક્ષુર્યદિહ ભૂતસ્ય શ્રોત્રં શ્રવણભાવનમ્ ॥ ૨૧.૩૫॥

ત્વગસ્તિ ચેત્સ્પર્શસત્તા જિહ્વા ચેદ્રસસઙ્ગ્રહઃ ।
જીવોઽસ્તિ ચેજ્જીવનં ચ પાદશ્ચેત્પાદચારણમ્ ॥ ૨૧.૩૬॥

હસ્તૌ યદિ ક્રિયાસત્તા સ્રષ્ટા ચેત્સૃષ્ટિસમ્ભવઃ ।
રક્ષ્યં ચેદ્રક્ષકો વિષ્ણુર્ભક્ષ્યં ચેદ્ભક્ષકઃ શિવઃ ॥ ૨૧.૩૭॥

સર્વં બ્રહ્મ ન સન્દેહઃ સર્વં બ્રહ્મૈવ કેવલમ્ ।
પૂજ્યં ચેત્પૂજનં ચાસ્તિ ભાસ્યં ચેદ્ભાસકઃ શિવઃ ॥ ૨૧.૩૮॥

સર્વં મિથ્યા ન સન્દેહઃ સર્વં ચિન્માત્રમેવ હિ ।
અસ્તિ ચેત્કારણં સત્યં કાર્યં ચૈવ ભવિષ્યતિ ॥ ૨૧.૩૯॥

નાસ્તિ ચેન્નાસ્તિ હીનોઽહં બ્રહ્મૈવાહં પરાયણમ્ ।
અત્યન્તદુઃખમેતદ્ધિ અત્યન્તસુખમવ્યયમ્ ॥ ૨૧.૪૦॥

અત્યન્તં જન્મમાત્રં ચ અત્યન્તં રણસમ્ભવમ્ ।
અત્યન્તં મલિનં સર્વમત્યન્તં નિર્મલં પરમ્ ॥ ૨૧.૪૧॥

અત્યન્તં કલ્પનં દુષ્ટં અત્યન્તં નિર્મલં ત્વહમ્ ।
અત્યન્તં સર્વદા દોષમત્યન્તં સર્વદા ગુણમ્ ॥ ૨૧.૪૨॥

અત્યન્તં સર્વદા શુભ્રમત્યન્તં સર્વદા મલમ્ ।
અત્યન્તં સર્વદા ચાહમત્યન્તં સર્વદા ઇદમ્ ॥ ૨૧.૪૩॥

અત્યન્તં સર્વદા બ્રહ્મ અત્યન્તં સર્વદા જગત્ ।

એતાવદુક્તમભયમહં ભેદં ન કિઞ્ચન ॥ ૨૧.૪૪॥

સદસદ્વાપિ નાસ્ત્યેવ સદસદ્વાપિ વાક્યકમ્ ।
નાસ્તિ નાસ્તિ ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૨૧.૪૫॥

કારણં કાર્યરૂપં વા સર્વં નાસ્તિ ન સંશયઃ ।
કર્તા ભોક્તા ક્રિયા વાપિ ન ભોજ્યં ભોગતૃપ્તતા ॥ ૨૧.૪૬॥

સર્વં બ્રહ્મ ન સન્દેહઃ સર્વશબ્દો ન વાસ્તવમ્ ।
ભૂતં ભવિષ્યં વાર્તં તુ કાર્યં વા નાસ્તિ સર્વદા ॥ ૨૧.૪૭॥

સદસદ્ભેદ્યભેદં વા ન ગુણા ગુણભાગિનઃ ।
નિર્મલં વા મલં વાપિ નાસ્તિ નાસ્તિ ન કિઞ્ચન ॥ ૨૧.૪૮॥

ભાષ્યં વા ભાષણં વાઽપિ નાસ્તિ નાસ્તિ ન કિઞ્ચન ।
પ્રબલં દુર્બલં વાપિ અહં ચ ત્વં ચ વા ક્વચિત્ ॥ ૨૧.૪૯॥

ગ્રાહ્યં ચ ગ્રાહકં વાપિ ઉપેક્ષ્યં નાત્મનઃ ક્વચિત્ ।
તીર્થં વા સ્નાનરૂપં વા દેવો વા દેવપૂજનમ્ ॥ ૨૧.૫૦॥

જન્મ વા મરણં હેતુર્નાસ્તિ નાસ્તિ ન કિઞ્ચન ।
સત્યં વા સત્યરૂપં વા નાસ્તિ નાસ્તિ ન કિઞ્ચન ॥ ૨૧.૫૧॥

માતરઃ પિતરો વાપિ દેહો વા નાસ્તિ કિઞ્ચન ।
દૃગ્રૂપં દૃશ્યરૂપં વા નાસ્તિ નાસ્તીહ કિઞ્ચન ॥ ૨૧.૫૨॥

માયાકાર્યં ચ માયા વા નાસ્તિ નાસ્તીહ કિઞ્ચન ।
જ્ઞાનં વા જ્ઞાનભેદો વા નાસ્તિ નાસ્તીહ કિઞ્ચન ॥ ૨૧.૫૩॥

સર્વપ્રપઞ્ચહેયત્વં પ્રોક્તં પ્રકરણં ચ તે ।
યઃ શ‍ૃણોતિ સકૃદ્વાપિ આત્માકારં પ્રપદ્યતે ॥ ૨૧.૫૪॥

સ્કન્દઃ -
માયા સા ત્રિગુણા ગણાધિપગુરોરેણાઙ્કચૂડામણેઃ
    પાદામ્ભોજસમર્ચનેન વિલયં યાત્યેવ નાસ્ત્યન્યથા ।
વિદ્યા હૃદ્યતમા સુવિદ્યુદિવ સા ભાત્યેવ હૃત્પઙ્કજે
    યસ્યાનલ્પતપોભિરુગ્રકરણાદૃક્તસ્ય મુક્તિઃ સ્થિરા ॥ ૨૧.૫૫॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    સર્વપ્રપઞ્ચહેયત્વપ્રકરણવર્ણનં નામ એકવિંશોઽધ્યાયઃ ॥

## ૨૨. નામરૂપનિષેધપ્રકરણં નામ દ્વાવિંશોऽધ્યાયઃ

ઋભુઃ -

વક્ષ્યે બ્રહ્મમયં સર્વં નાસ્તિ સર્વં જગન્મૃષા ।
અહં બ્રહ્મ ન મે ચિન્તા અહં બ્રહ્મ ન મે જડમ્ ॥ ૨૨.૧॥

અહં બ્રહ્મ ન મે દોષઃ અહં બ્રહ્મ ન મે ફલમ્ ।
અહં બ્રહ્મ ન મે વાર્તા અહં બ્રહ્મ ન મે દ્વયમ્ ॥ ૨૨.૨॥

અહં બ્રહ્મ ન મે નિત્યમહં બ્રહ્મ ન મે ગતિઃ ।
અહં બ્રહ્મ ન મે માતા અહં બ્રહ્મ ન મે પિતા ॥ ૨૨.૩॥

અહં બ્રહ્મ ન મે સોऽયમહં વૈશ્વાનરો ન હિ ।
અહં બ્રહ્મ ચિદાકાશમહં બ્રહ્મ ન સંશયઃ ॥ ૨૨.૪॥

સર્વાન્તરોऽહં પૂર્ણાત્મા સર્વાન્તરમનોऽન્તરઃ ।
અહમેવ શરીરાન્તરહમેવ સ્થિરઃ સદા ॥ ૨૨.૫॥

એવં વિજ્ઞાનવાન્મુક્ત એવં જ્ઞાનં સુદુર્લભમ્ ।
અનેકશતસાહસ્રેષ્વેક એવ વિવેકવાન્ ॥ ૨૨.૬॥

તસ્ય દર્શનમાત્રેણ પિતરસ્તૃપ્તિમાગતાઃ ।
જ્ઞાનિનો દર્શનં પુણ્યં સર્વતીર્થાવગાહનમ્ ॥ ૨૨.૭॥

જ્ઞાનિનઃ ચાર્ચનેનૈવ જીવન્મુક્તો ભવેન્નરઃ ।
જ્ઞાનિનો ભોજને દાને સદ્યો મુક્તો ભવેન્નરઃ ॥ ૨૨.૮॥

અહં બ્રહ્મ ન સન્દેહઃ અહમેવ ગુરુઃ પરઃ ।
અહં શાન્તોऽસ્મિ શુદ્ધોऽસ્મિ અહમેવ ગુણાન્તરઃ ॥ ૨૨.૯॥

ગુણાતીતો જનાતીતઃ પરાતીતો મનઃ પરઃ ।
પરતઃ પરતોऽતીતો બુદ્ધ્યાતીતો રસાત્પરઃ ॥ ૨૨.૧૦॥

ભાવાતીતો મનાતીતો વેદાતીતો વિદઃ પરઃ ।
શરીરાદેશ્ચ પરતો જાગ્રત્સ્વપ્નસુષુપ્તિતઃ ॥ ૨૨.૧૧॥

અવ્યક્તાત્પરતોऽતીત ઇત્યેવં જ્ઞાનનિશ્ચયઃ ।
ક્વચિદેતત્પરિત્યજ્ય સર્વં સન્ત્યજ્ય મૂકવત્ ॥ ૨૨.૧૨॥

તૂષ્ણીં બ્રહ્મ પરં બ્રહ્મ શાશ્વતબ્રહ્મવાન્સ્વયમ્ ।

જ્ઞાનિનો મહિમા કિઞ્ચિદણુમાત્રમપિ સ્ફુટમ્ ॥ ૨૨.૧૩॥

હરિણાપિ હરેણાપિ બ્રહ્મણાપિ સુરૈરપિ ।
ન શક્યતે વર્ણયિતું કલ્પકોટિશતૈરપિ ॥ ૨૨.૧૪॥

અહં બ્રહ્મેતિ વિજ્ઞાનં ત્રિષુ લોકેષુ દુર્લભમ્ ।
વિવેકિનં મહાત્માનં બ્રહ્મમાત્રેણાવસ્થિતમ્ ॥ ૨૨.૧૫॥

દ્રષ્ટું ચ ભાષિતું વાપિ દુર્લભં પાદસેવનમ્ ।
કદાચિત્પાદતીર્થેન સ્નાતશ્ચેદ્બ્રહ્મ એવ સઃ ॥ ૨૨.૧૬॥

સર્વં મિથ્યા ન સન્દેહઃ સર્વં બ્રહ્મૈવ કેવલમ્ ।
એતત્પ્રકરણં પ્રોક્તં સર્વસિદ્ધાન્તસઙ્ગ્રહઃ ॥ ૨૨.૧૭॥

દુર્લભં યઃ પઠેદ્ભક્ત્યા બ્રહ્મ સમ્પદ્યતે નરઃ ।
વક્ષ્યે બ્રહ્મમયં સર્વં નાન્યત્સર્વં જગન્મૃષા ॥ ૨૨.૧૮॥

બ્રહ્મૈવ જગદાકારં બ્રહ્મૈવ પરમં પદમ્ ।
અહમેવ પરં બ્રહ્મ અહમિત્યપિ વર્જિતઃ ॥ ૨૨.૧૯॥

સર્વવર્જિતચિન્માત્રં સર્વવર્જિતચેતનઃ ।
સર્વવર્જિતશાન્તાત્મા સર્વમઙ્ગલવિગ્રહઃ ॥ ૨૨.૨૦॥

અહં બ્રહ્મ પરં બ્રહ્મ અસન્નેદં ન મે ન મે ।
ન મે ભૂતં ભવિષ્યચ્ચ ન મે વર્ણં ન સંશયઃ ॥ ૨૨.૨૧॥

બ્રહ્મૈવાહં ન મે તુચ્છં અહં બ્રહ્મ પરં તપઃ ।
બ્રહ્મરૂપમિદં સર્વં બ્રહ્મરૂપમનામયમ્ ॥ ૨૨.૨૨॥

બ્રહ્મૈવ ભાતિ ભેદેન બ્રહ્મૈવ ન પરઃ પરઃ ।
આત્મૈવ દ્વૈતવદ્ભાતિ આત્મૈવ પરમં પદમ્ ॥ ૨૨.૨૩॥

બ્રહ્મૈવં ભેદરહિતં ભેદમેવ મહદ્ભયમ્ ।
આત્મૈવાહં નિર્મલોઽહમાત્મૈવ ભુવનત્રયમ્ ॥ ૨૨.૨૪॥

આત્મૈવ નાન્યત્સર્વત્ર સર્વં બ્રહ્મૈવ નાન્યકઃ ।
અહમેવ સદા ભામિ (ભાતિ) બ્રહ્મૈવાસ્મિ પરોઽસ્મ્યહમ્ ॥ ૨૨.૨૫॥

નિર્મલોઽસ્મિ પરં બ્રહ્મ કાર્યાકાર્યવિવર્જિતઃ ।
સદા શુદ્ધૈકરૂપોઽસ્મિ સદા ચૈતન્યમાત્રકઃ ॥ ૨૨.૨૬॥

નિશ્ચયોઽસ્મિ પરં બ્રહ્મ સત્યોઽસ્મિ સકલોઽસ્મ્યહમ્ ।
અક્ષરોઽસ્મિ પરં બ્રહ્મ શિવોઽસ્મિ શિખરોઽસ્મ્યહમ્ ॥ ૨૨.૨૭॥

સમરૂપોઽસ્મિ શાન્તોઽસ્મિ તત્પરોઽસ્મિ ચિદવ્યયઃ ।
સદા બ્રહ્મ હિ નિત્યોઽસ્મિ સદા ચિન્માત્રલક્ષણઃ ॥ ૨૨.૨૮॥

સદાઽખણ્ડૈકરૂપોઽસ્મિ સદામાનવિવર્જિતઃ ।
સદા શુદ્ધૈકરૂપોઽસ્મિ સદા ચૈતન્યમાત્રકઃ ॥ ૨૨.૨૯॥

સદા સન્માન(સમાન)રૂપોઽસ્મિ સદા સત્તાપ્રકાશકઃ ।
સદા સિદ્ધાન્તરૂપોઽસ્મિ સદા પાવનમઙ્ગલઃ ॥ ૨૨.૩૦॥

એવં નિશ્ચિતવાન્મુક્તઃ એવં નિત્યપરો વરઃ ।
એવં ભાવનયા યુક્તઃ પરં બ્રહ્મૈવ સર્વદા ॥ ૨૨.૩૧॥

એવં બ્રહ્માત્મવાંજ્ઞાની બ્રહ્માહમિતિ નિશ્ચયઃ ।
સ એવ પુરુષો લોકે બ્રહ્માહમિતિ નિશ્ચિતઃ ॥ ૨૨.૩૨॥

સ એવ પુરુષો જ્ઞાની જીવન્મુક્તઃ સ આત્મવાન્ ।
બ્રહ્મૈવાહં મહાનાત્મા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૨૨.૩૩॥

નાહં જીવો ન મે ભેદો નાહં ચિન્તા ન મે મનઃ ।
નાહં માંસં ન મેઽસ્થીનિ નાહઙ્કારકલેવરઃ ॥ ૨૨.૩૪॥

ન પ્રમાતા ન મેયં વા નાહં સર્વં પરોઽસ્મ્યહમ્ ।
સર્વવિજ્ઞાનરૂપોઽસ્મિ નાહં સર્વં કદાચન ॥ ૨૨.૩૫॥

નાહં મૃતો જન્મનાન્યો ન ચિન્માત્રોઽસ્મિ નાસ્મ્યહમ્ ।
ન વાચ્યોઽહં ન મુક્તોઽહં ન બુદ્ધોઽહં કદાચન ॥ ૨૨.૩૬॥

ન શૂન્યોઽહં ન મૂઢોઽહં ન સર્વોઽહં પરોઽસ્મ્યહમ્ ।
સર્વદા બ્રહ્મમાત્રોઽહં ન રસોઽહં સદાશિવઃ ॥ ૨૨.૩૭॥

ન ઘ્રાણોઽહં ન ગન્ધોઽહં ન ચિહ્નોઽયં ન મે પ્રિયઃ ।
નાહં જીવો રસો નાહં વરુણો ન ચ ગોલકઃ ॥ ૨૨.૩૮॥

બ્રહ્મૈવાહં ન સન્દેહો નામરૂપં ન કિઞ્ચન ।
ન શ્રોત્રોઽહં ન શબ્દોઽહં ન દિશોઽહં ન સાક્ષિકઃ ॥ ૨૨.૩૯॥

નાહં ન ત્વં ન ચ સ્વર્ગો નાહં વાયુર્ન સાક્ષિકઃ ।
પાયુર્નાહં વિસર્ગો ન ન મૃત્યુર્ન ચ સાક્ષિકઃ ॥ ૨૨.૪૦॥

ગુહ્યં નાહં ન ચાનન્દો ન પ્રજાપતિદેવતા ।
સર્વં બ્રહ્મ ન સન્દેહઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૨.૪૧॥

નાહં મનો ન સઙ્કલ્પો ન ચન્દ્રો ન ચ સાક્ષિકઃ ।
નાહં બુદ્ધીન્દ્રિયો બ્રહ્મા નાહં નિશ્ચયરૂપવાન્ ॥ ૨૨.૪૨॥

નાહઙ્કારમહં રુદ્રો નાભિમાનો ન સાક્ષિકઃ ।
ચિત્તં નાહં વાસુદેવો ધારણા નાયમીશ્વરઃ ॥ ૨૨.૪૩॥

નાહં વિશ્વો ન જાગ્રદ્વા સ્થૂલદેહો ન મે ક્વચિત્ ।
ન પ્રાતિભાસિકો જીવો ન ચાહં વ્યાવહારિકઃ ॥ ૨૨.૪૪॥

ન પારમાર્થિકો દેવો નાહમન્નમયો જડઃ ।
ન પ્રાણમયકોશોઽહં ન મનોમયકોશવાન્ ॥ ૨૨.૪૫॥

ન વિજ્ઞાનમયઃ કોશો નાનન્દમયકોશવાન્ ।
બ્રહ્મૈવાહં ન સન્દેહો નામરૂપે ન કિઞ્ચન ॥ ૨૨.૪૬॥

એતાવદુક્ત્વા સકલં નામરૂપદ્વયાત્મકમ્ ।
સર્વં ક્ષણેન વિસ્મૃત્ય કાષ્ઠલોષ્ટાદિવત્ત્યજેત્ ॥ ૨૨.૪૭॥

એતત્સર્વમસન્નિત્યં સદા વન્ધ્યાકુમારવત્ ।
શશશૃઙ્ગવદેવેદં નરશૃઙ્ગવદેવતત્ ॥ ૨૨.૪૮॥

આકાશપુષ્પસદૃશં યથા મરુમરીચિકા ।
ગન્ધર્વનગરં યદ્વદિન્દ્રજાલવદેવ હિ ॥ ૨૨.૪૯॥

અસત્યમેવ સતતં પઞ્ચરૂપકમિષ્યતે ।
શિષ્યોપદેશકાલો હિ દ્વૈતં ન પરમાર્થતઃ ॥ ૨૨.૫૦॥

માતા મૃતે રોદનાય દ્રવ્યં દત્વાઽઽહ્વયેજ્જનાન્ ।
તેષાં રોદનમાત્રં યત્કેવલં દ્રવ્યપઞ્ચકમ્ ॥ ૨૨.૫૧॥

તદદ્વૈતં મયા પ્રોક્તં સર્વં વિસ્મૃત્ય કુડ્યવત્ ।
અહં બ્રહ્મેતિ નિશ્ચિત્ય અહમેવેતિ ભાવય ॥ ૨૨.૫૨॥

અહમેવ સુખં ચેતિ અહમેવ ન ચાપરઃ ।
અહં ચિન્માત્રમેવેતિ બ્રહ્મૈવેતિ વિનિશ્ચિનુ ॥ ૨૨.૫૩॥

અહં નિર્મલશુદ્ધેતિ અહં જીવવિલક્ષણઃ ।

અહં બ્રહ્મૈવ સર્વાત્મા અહમિત્યવભાસકઃ ॥ ૨૨.૫૪॥

અહમેવ હિ ચિન્માત્રમહમેવ હિ નિર્ગુણઃ ।
સર્વાન્તર્યામ્યહં બ્રહ્મ ચિન્માત્રોઽહં સદાશિવઃ ॥ ૨૨.૫૫॥

નિત્યમઙ્ગલરૂપાત્મા નિત્યમોક્ષમયઃ પુમાન્ ।
એવં નિશ્ચિત્ય સતતં સ્વાત્માનં સ્વયમાસ્થિતઃ ॥ ૨૨.૫૬॥

બ્રહ્મૈવાહં ન સન્દેહો નામરૂપે ન કિઞ્ચન ।
એતદ્રૂપપ્રકરણં સર્વવેદેષુ દુર્લભમ્ ।
યઃ શૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૨૨.૫૭॥

તં વેદાદિવચોભિરીડિતમહાયાગૈશ્ચ ભોગૈર્વ્રતૈ-
દાનૈશ્ચાનશનૈર્યમાદિનિયમૈસ્તં વિદ્વિષન્તે દ્વિજાઃ ।
તસ્યાનઙ્ગરિપોરતીવ સુમહાહૃદ્યં હિ લિઙ્ગાર્ચનં
તેનૈવાશુ વિનાશ્ય મોહમખિલં જ્ઞાનં દદાતીશ્વરઃ ॥ ૨૨.૫૮॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
નામરૂપનિષેધપ્રકરણં નામ દ્વાવિંશોઽધ્યાયઃ ॥

## ૨૩. રહસ્યોપદેશપ્રકરણં નામ ત્રયોવિંશોઽધ્યાયઃ

ઋભુઃ -
નિદાઘ શૃણુ વક્ષ્યામિ સર્વલોકેષુ દુર્લભમ્ ।
ઇદં બ્રહ્મ પરં બ્રહ્મ સચ્ચિદાનન્દ એવ હિ ॥ ૨૩.૧॥

નાનાવિધજનં લોકં નાના કારણકાર્યકમ્ ।
બ્રહ્મૈવાન્યદસત્સર્વં સચ્ચિદાનન્દ એવ હિ ॥ ૨૩.૨॥

અહં બ્રહ્મ સદા બ્રહ્મ અસ્મિ બ્રહ્માહમેવ હિ ।
કાલો બ્રહ્મ ક્ષણો બ્રહ્મ અહં બ્રહ્મ ન સંશયઃ ॥ ૨૩.૩॥

વેદો બ્રહ્મ પરં બ્રહ્મ સત્યં બ્રહ્મ પરાત્પરઃ ।
હંસો બ્રહ્મ હરિર્બ્રહ્મ શિવો બ્રહ્મ ચિદવ્યયઃ ॥ ૨૩.૪॥

સર્વોપનિષદો બ્રહ્મ સામ્યં બ્રહ્મ સમોઽસ્મ્યહમ્ ।
અજો બ્રહ્મ રસો બ્રહ્મ વિયદ્બ્રહ્મ પરાત્પરઃ ॥ ૨૩.૫॥

ત્રુટિર્બ્રહ્મ મનો બ્રહ્મ વ્યષ્ટિર્બ્રહ્મ સદામુદઃ ।

ઇદં બ્રહ્મ પરં બ્રહ્મ તત્ત્વં બ્રહ્મ સદા જપઃ ॥ ૨૩.૬॥

અકારો બ્રહ્મ એવાહમુકારોઽહં ન સંશયઃ ।
મકારબ્રહ્મમાત્રોઽહં મન્ત્રબ્રહ્મમનુઃ પરમ્ ॥ ૨૩.૭॥

શિકારબ્રહ્મમાત્રોઽહં વાકારં બ્રહ્મ કેવલમ્ ।
યકારં બ્રહ્મ નિત્યં ચ પઞ્ચાક્ષરમહં પરમ્ ॥ ૨૩.૮॥

રેચકં બ્રહ્મ સદ્બ્રહ્મ પૂરકં બ્રહ્મ સર્વતઃ ।
કુમ્ભકં બ્રહ્મ સર્વોઽહં ધારણં બ્રહ્મ સર્વતઃ ॥ ૨૩.૯॥

બ્રહ્મૈવ નાન્યત્તત્સર્વં સચ્ચિદાનન્દ એવ હિ ।
એવં ચ નિશ્ચિતો મુક્તઃ સદ્ય એવ ન સંશયઃ ॥ ૨૩.૧૦॥

કેચિદેવ મહામૂઢાઃ દ્વૈતમેવં વદન્તિ હિ ।
ન સમ્ભાષ્યાઃ સદાનર્હા નમસ્કારે ન યોગ્યતા ॥ ૨૩.૧૧॥

મૂઢા મૂઢતરાસ્તુચ્છાસ્તથા મૂઢતમાઃ પરે ।
એતે ન સન્તિ મે નિત્યં અહંવિજ્ઞાનમાત્રતઃ ॥ ૨૩.૧૨॥

સર્વં ચિન્માત્રરૂપત્વાદાનન્દત્વાન્ન મે ભયમ્ ।
અહમિત્યપિ નાસ્ત્યેવ પરમિત્યપિ ન ક્વચિત્ ॥ ૨૩.૧૩॥

બ્રહ્મૈવ નાન્યત્તત્સર્વં સચ્ચિદાનન્દ એવ હિ ।
કાલાતીતં સુખાતીતં સર્વાતીતમતીતકમ્ ॥ ૨૩.૧૪॥

નિત્યાતીતમનિત્યાનામમિતં બ્રહ્મ કેવલમ્ ।
બ્રહ્મૈવ નાન્યદ્યત્સર્વં સચ્ચિદાનન્દમાત્રકમ્ ॥ ૨૩.૧૫॥

દ્વૈતસત્યત્વબુદ્ધિશ્ચ દ્વૈતબુદ્ધ્યા ન તત્સ્મર ।
સર્વં બ્રહ્મૈવ નાન્યોઽસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૩.૧૬॥

બુદ્ધ્યાતીતં મનોઽતીતં વેદાતીતમતઃ પરમ્ ।
આત્માતીતં જનાતીતં જીવાતીતં ચ નિર્ગુણમ્ ॥ ૨૩.૧૭॥

કાષ્ઠાતીતં કલાતીતં નાટ્યાતીતં પરં સુખમ્ ।
બ્રહ્મમાત્રેણ સમ્પશ્યન્બ્રહ્મમાત્રપરો ભવ ॥ ૨૩.૧૮॥

બ્રહ્મમાત્રપરો નિત્યં ચિન્માત્રોઽહં ન સંશયઃ ।
જ્યોતિરાનન્દમાત્રોઽહં નિજાનન્દાત્મમાત્રકઃ ॥ ૨૩.૧૯॥

શૂન્યાનન્દાત્મમાત્રોઽહં ચિન્માત્રોઽહમિતિ સ્મર ।
સત્તામાત્રોઽહમેવાત્ર સદા કાલગુણાન્તરઃ ॥ ૨૩.૨૦॥

નિત્યસન્માત્રરૂપોઽહં શુદ્ધાનન્દાત્મમાત્રકમ્ ।
પ્રપઞ્ચહીનરૂપોઽહં સચ્ચિદાનન્દમાત્રકઃ ॥ ૨૩.૨૧॥

નિશ્ચયાનન્દમાત્રોઽહં કેવલાનન્દમાત્રકઃ ।
પરમાનન્દમાત્રોઽહં પૂર્ણાનન્દોઽહમેવ હિ ॥ ૨૩.૨૨॥

દ્વૈતસ્યમાત્રસિદ્ધોઽહં સામ્રાજ્યપદલક્ષણમ્ ।
ઇત્યેવં નિશ્ચયં કુર્વન્સદા ત્રિષુ યથાસુખમ્ ॥ ૨૩.૨૩॥

દૃઢનિશ્ચયરૂપાત્મા દૃઢનિશ્ચયસન્મયઃ ।
દૃઢનિશ્ચયશાન્તાત્મા દૃઢનિશ્ચયમાનસઃ ॥ ૨૩.૨૪॥

દૃઢનિશ્ચયપૂર્ણાત્મા દૃઢનિશ્ચયનિર્મલઃ ।
દૃઢનિશ્ચયજીવાત્મા દૃઢનિશ્ચયમઙ્ગલઃ ॥ ૨૩.૨૫॥

દૃઢનિશ્ચયજીવાત્મા સંશયં નાશમેષ્યતિ ।
દૃઢનિશ્ચયમેવાત્ર બ્રહ્મજ્ઞાનસ્ય લક્ષણમ્ ॥ ૨૩.૨૬॥

દૃઢનિશ્ચયમેવાત્ર વાક્યજ્ઞાનસ્ય લક્ષણમ્ ।
દૃઢનિશ્ચયમેવાત્ર કારણં મોક્ષસમ્પદઃ ॥ ૨૩.૨૭॥

એવમેવ સદા કાર્યં બ્રહ્મૈવાહમિતિ સ્થિરમ્ ।
બ્રહ્મૈવાહં ન સન્દેહઃ સચ્ચિદાનન્દ એવ હિ ॥ ૨૩.૨૮॥

આત્માનન્દસ્વરૂપોઽહં નાન્યદસ્તીતિ ભાવય ।
તતસ્તદપિ સન્ત્યજ્ય એક એવ સ્થિરો ભવ ॥ ૨૩.૨૯॥

તતસ્તદપિ સન્ત્યજ્ય નિર્ગુણો ભવ સર્વદા ।
નિર્ગુણત્વં ચ સન્ત્યજ્ય વાચાતીતો ભવેત્તતઃ ॥ ૨૩.૩૦॥

વાચાતીતં ચ સન્ત્યજ્ય ચિન્માત્રત્વપરો ભવ ।
આત્માતીતં ચ સન્ત્યજ્ય બ્રહ્મમાત્રપરો ભવ ॥ ૨૩.૩૧॥

ચિન્માત્રત્વઞ્ચ સન્ત્યજ્ય સર્વતૂષ્ણીમ્પરો ભવ ।
સર્વતૂષ્ણીમ્ચ સન્ત્યજ્ય મહાતૂષ્ણીમ્પરો ભવ ॥ ૨૩.૩૨॥

મહાતૂષ્ણીઞ્ચ સન્ત્યજ્ય ચિત્તતૂષ્ણીં સમાશ્રય ।
ચિત્તતૂષ્ણીઞ્ચ સન્ત્યજ્ય જીવતૂષ્ણીં સમાહર ॥ ૨૩.૩૩॥

જીવતૂષ્ણીમ્પરિત્યજ્ય જીવશૂન્યપરો ભવ ।
શૂન્યત્યાગમ્પરિત્યજ્ય યથા તિષ્ઠ તથાસિ ભો ॥ ૨૩.૩૪॥

તિષ્ઠત્વમપિ સન્ત્યજ્ય અવાઙ્મનસગોચરઃ (અવાઙ્માનસગોચરઃ) ।
તતઃ પરં ન વક્તવ્યં તતઃ પશ્યેન્ન (પશ્યાન્ન) કિઞ્ચન ॥ ૨૩.૩૫॥

નો ચેત્સર્વપરિત્યાગો બ્રહ્મૈવાહમિતીરય ।
સદા સ્મરન્સદા ચિન્ત્યં સદા ભાવય નિર્ગુણમ્ ॥ ૨૩.૩૬॥

સદા તિષ્ઠસ્વ તત્ત્વજ્ઞ સદા જ્ઞાની સદા પરઃ ।
સદાનન્દઃ સદાતીતઃ સદાદોષવિવર્જિતઃ ॥ ૨૩.૩૭॥

સદા શાન્તઃ સદા તૃપ્તઃ સદા જ્યોતિઃ સદા રસઃ ।
સદા નિત્યઃ સદા શુદ્ધઃ સદા બુદ્ધઃ સદા લયઃ ॥ ૨૩.૩૮॥

સદા બ્રહ્મ સદા મોદઃ સદાનન્દઃ સદા પરઃ ।
સદા સ્વયં સદા શૂન્યઃ સદા મૌની સદા શિવઃ ॥ ૨૩.૩૯॥

સદા સર્વં સદા મિત્રઃ સદા સ્નાનં સદા જપઃ ।
સદા સર્વં ચ વિસ્મૃત્ય સદા મૌનં પરિત્યજ ॥ ૨૩.૪૦॥

દેહાભિમાનં સન્ત્યજ્ય ચિત્તસત્તાં પરિત્યજ ।
આત્મૈવાહં સ્વયં ચાહં ઇત્યેવં સર્વદા ભવ ॥ ૨૩.૪૧॥

એવં સ્થિતે ત્વં મુક્તોઽસિ ન તુ કાર્યા વિચારણા ।
બ્રહ્મૈવ સર્વં યત્કિઞ્ચિત્સચ્ચિદાનન્દ એવ હિ ॥ ૨૩.૪૨॥

અહં બ્રહ્મ ઇદં બ્રહ્મ ત્વં બ્રહ્માસિ નિરન્તરઃ ।
પ્રજ્ઞાનં બ્રહ્મ એવાસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૨૩.૪૩॥

દૃઢનિશ્ચયમેવ ત્વં કુરુ કલ્યાણમાત્મનઃ ।
મનસો ભૂષણં બ્રહ્મ મનસો ભૂષણં પરઃ ॥ ૨૩.૪૪॥

મનસો ભૂષણં કર્તા બ્રહ્મૈવાહમવેક્ષતઃ ।
બ્રહ્મૈવ સચ્ચિદાનદઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૨૩.૪૫॥

સચ્ચિદાનન્દમખિલં સચ્ચિદાનન્દ એવ હિ ।
સચ્ચિદાનન્દજીવાત્મા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૨૩.૪૬॥

સચ્ચિદાનન્દમદ્વૈતં સચ્ચિદાનન્દશઙ્કરઃ ।

સચ્ચિદાનન્દવિજ્ઞાનં સચ્ચિદાનન્દભોજનઃ ॥ ૨૩.૪૭॥

સચ્ચિદાનન્દપૂર્ણાત્મા સચ્ચિદાનન્દકારણઃ ।
સચ્ચિદાનન્દલીલાત્મા સચ્ચિદાનન્દશેવધિઃ ॥ ૨૩.૪૮॥

સચ્ચિદાનન્દસર્વાઙ્ગઃ સચ્ચિદાનન્દચન્દનઃ ।
સચ્ચિદાનન્દસિદ્ધાન્તઃ સચ્ચિદાનન્દવેદકઃ ॥ ૨૩.૪૯॥

સચ્ચિદાનન્દશાસ્ત્રાર્થઃ સચ્ચિદાનન્દવાચકઃ ।
સચ્ચિદાનન્દહોમશ્ચ સચ્ચિદાનન્દરાજ્યકઃ ॥ ૨૩.૫૦॥

સચ્ચિદાનન્દપૂર્ણાત્મા સચ્ચિદાનન્દપૂર્ણકઃ ।
સચ્ચિદાનન્દસન્માત્રં મૂઢેષુ પઠિતં ચ યત્ ॥ ૨૩.૫૧॥

શુદ્ધં મૂઢેષુ યદ્દત્તં સુબદ્ધં માર્ગચારિણા ।
વિષયાસક્તચિત્તેષુ ન સમ્ભાષ્યં વિવેકિના ॥ ૨૩.૫૨॥

સકૃચ્છ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
ઇચ્છા ચેદ્યદિ નારીણાં મુખં બ્રાહ્મણ એવ હિ ॥ ૨૩.૫૩॥

સર્વં ચૈતન્યમાત્રત્વાત્સ્ત્રીભેદં ચ ન વિદ્યતે ।
વેદશાસ્ત્રેણ યુક્તોઽપિ જ્ઞાનાભાવાદ્દ્વિજોઽદ્વિજઃ ॥ ૨૩.૫૪॥

બ્રહ્મૈવ તન્તુના તેન બદ્ધાસ્તે મુક્તિચિન્તકાઃ ।
સર્વમુક્તં ભગવતા રહસ્યં શઙ્કરેણ હિ ॥ ૨૩.૫૫॥

સોમાપીડપદામ્બુજાર્ચનફલૈર્ભુક્ત્યૈ ભવાન્માનસં
નાન્યદ્યોગપથા શ્રુતિશ્રવણતઃ કિં કર્મભિર્ભૂયતે ।
યુક્ત્યા શિક્ષિતમાનસાનુભવતોઽપ્યશમાપ્યસઙ્ગો વચાં
કિં ગ્રાહ્યં ભવતીન્દ્રિયાર્થરહિતાનન્દૈકસાન્દ્રઃ શિવઃ ॥ ૨૩.૫૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
રહસ્યોપદેશપ્રકરણં નામ ત્રયોવિંશોઽધ્યાયઃ ॥

## ૨૪. અહં બ્રહ્મપ્રકરણનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ

ઋભુઃ -
પુનઃ પુનઃ પરં વક્ષ્યે આત્મનોઽન્યદસત્સ્વતઃ ।
અસતો વચનં નાસ્તિ સતો નાસ્તિ સદા સ્થિતે ॥ ૨૪.૧॥

બ્રહ્માભ્યાસ પરસ્યાહં (રહસ્યં ચ) વક્ષ્યે નિર્ણયમાત્મનઃ ।
તસ્યાપિ સકૃદેવાહં વક્ષ્યે મઙ્ગલપૂર્વકમ્ ॥ ૨૪.૨॥

સર્વં બ્રહ્માહમેવાસ્મિ ચિન્માત્રો નાસ્તિ કિઞ્ચન ।
અહમેવ પરં બ્રહ્મ અહમેવ ચિદાત્મકમ્ ॥ ૨૪.૩॥

અહં મમેતિ નાસ્ત્યેવ અહં જ્ઞાનીતિ નાસ્તિ ચ ।
શુદ્ધોઽહં બ્રહ્મરૂપોઽહમાનન્દોઽહમજો નરઃ (નજઃ) ॥ ૨૪.૪॥

દેવોઽહં દિવ્યભાનોઽહં તુર્યોઽહં ભવભાવ્યહમ્ ।
અણ્ડજોઽહમશેષોઽહમન્તરાદન્તરોઽસ્મ્યહમ્ ॥ ૨૪.૫॥

અમરોઽહમજસ્રોઽહમત્યન્તપરમોઽસ્મ્યહમ્ ।
પરાપરસ્વરૂપોઽહં નિત્યાનિત્યરસોઽસ્મ્યહમ્ ॥ ૨૪.૬॥

ગુણાગુણવિહીનોઽહં તુર્યાતુર્યરસોઽસ્મ્યહમ્ ।
શાન્તાશાન્તવિહીનોઽહં જ્ઞાનાજ્ઞાનરસોઽસ્મ્યહમ્ ॥ ૨૪.૭॥

કાલાકાલવિહીનોઽહમાત્માનાત્મવિવર્જિતઃ ।
લબ્ધાલબ્ધાદિહીનોઽહં સર્વશૂન્યોઽહમવ્યયઃ ॥ ૨૪.૮॥

અહમેવાહમેવાહમનન્તરનિરન્તરમ્ ।
શાશ્વતોઽહમલક્ષ્યોઽહમાત્મા ન પરિપૂર્ણતઃ ॥ ૨૪.૯॥

ઇત્યાદિશબ્દમુક્તોઽહં ઇત્યાદ્યં ચ ન ચાસ્મ્યહમ્ ।
ઇત્યાદિવાક્યમુક્તોઽહં સર્વવર્જિતદુર્જયઃ ॥ ૨૪.૧૦॥

નિરન્તરોઽહં ભૂતોઽહં ભવ્યોઽહં ભવવર્જિતઃ ।
લક્ષ્યલક્ષણહીનોઽહં કાર્યહીનોઽહમાશુગઃ ॥ ૨૪.૧૧॥

વ્યોમાદિરૂપહીનોઽહં વ્યોમરૂપોઽહમચ્યુતઃ ।
અન્તરાન્તરભાવોઽહમન્તરાન્તરવર્જિતઃ ॥ ૨૪.૧૨॥

સર્વસિદ્ધાન્તરૂપોઽહં સર્વદોષવિવર્જિતઃ ।
ન કદાચન મુક્તોઽહં ન બદ્ધોઽહં કદાચન ॥ ૨૪.૧૩॥

એવમેવ સદા કૃત્વા બ્રહ્મૈવાહમિતિ સ્મર ।
એતાવદેવ માત્રં તુ મુક્તો ભવતુ નિશ્ચયઃ ॥ ૨૪.૧૪॥

ચિન્માત્રોઽહં શિવોઽહં વૈ શુભમાત્રમહં સદા ।
સદાકારોઽહં મુક્તોઽહં સદા વાચામગોચરઃ ॥ ૨૪.૧૫॥

સર્વદા પરિપૂર્ણોઽહં વેદોપાધિવિવર્જિતઃ ।
ચિત્તકાર્યવિહીનોઽહં ચિત્તમસ્તીતિ મે ન હિ ॥ ૨૪.૧૬॥

યત્કિઞ્ચિદપિ નાસ્ત્યેવ નાસ્ત્યેવ પ્રિયભાષણમ્ ।
આત્મપ્રિયમનાત્મા હિ ઇદં મે વસ્તુતો ન હિ ॥ ૨૪.૧૭॥

ઇદં દુઃખમિદં સૌખ્યમિદં ભાતિ અહં ન હિ ।
સર્વવર્જિતરૂપોઽહં સર્વવર્જિતચેતનઃ ॥ ૨૪.૧૮॥

અનિર્વાચ્યમનિર્વાચ્યં પરં બ્રહ્મ રસોઽસ્મ્યહમ્ ।
અહં બ્રહ્મ ન સન્દેહ અહમેવ પરાત્પરઃ ॥ ૨૪.૧૯॥

અહં ચૈતન્યભૂતાત્મા દેહો નાસ્તિ કદાચન ।
લિઙ્ગદેહં ચ નાસ્ત્યેવ કારણં દેહમેવ ન ॥ ૨૪.૨૦॥

અહં ત્યક્ત્વા પરં ચાહં અહં બ્રહ્મસ્વરૂપતઃ ।
કામાદિવર્જિતોઽતીતઃ કાલભેદપરાત્પરઃ ॥ ૨૪.૨૧॥

બ્રહ્મૈવેદં ન સંવેદ્યં નાહં ભાવં ન ચા નહિ ।
સર્વસંશયસંશાન્તો બ્રહ્મૈવાહમિતિ સ્થિતિઃ ॥ ૨૪.૨૨॥

નિશ્ચયં ચ ન મે કિઞ્ચિચ્ચિન્તાભાવાત્સદાઽક્ષરઃ ।
ચિદહં ચિદહં બ્રહ્મ ચિદહં ચિદહં સદા ॥ ૨૪.૨૩॥

એવં ભાવનયા યુક્તસ્ત્યક્તશઙ્કઃ સુખીભવ ।
સર્વસઙ્ગં પરિત્યજ્ય આત્મૈક્યૈવં ભવાન્વહમ્ ॥ ૨૪.૨૪॥

સઙ્ગં નામ પ્રવક્ષ્યેઽહં બ્રહ્માહમિતિ નિશ્ચયઃ ।
સત્યોઽહં પરમાત્માઽહં સ્વયમેવ સ્વયં સ્વયમ્ ॥ ૨૪.૨૫॥

નાહં દેહો ન ચ પ્રાણો ન દ્વન્દ્વો ન ચ નિર્મલઃ ।
એષ એવ હિ સત્સઙ્ગઃ એષ એવ હિ નિર્મલઃ ॥ ૨૪.૨૬॥

મહત્સઙ્ગે (મહત્સઙ્ગો) મહદ્બ્રહ્મભાવનં પરમં પદમ્ ।
અહં શાન્તપ્રભાવોઽહં અહં બ્રહ્મ ન સંશયઃ ॥ ૨૪.૨૭॥

અહં ત્યક્તસ્વરૂપોઽહં અહં ચિન્તાદિવર્જિતઃ ।
એષ એવ હિ સત્સઙ્ગઃ એષ નિત્યં ભવાનહમ્ ॥ ૨૪.૨૮॥

સર્વસઙ્કલ્પહીનોઽહં સર્વવૃત્તિવિવર્જિતઃ ।

અમૃતોઽહમજો નિત્યં મૃતિભીતિરતીતિકઃ ॥ ૨૪.૨૯॥

સર્વકલ્યાણરૂપોઽહં સર્વદા પ્રિયરૂપવાન્ ।
સમલાઙ્ગો મલાતીતઃ સર્વદાહં સદાનુગઃ ॥ ૨૪.૩૦॥

અપરિચ્છિન્નસન્માત્રં સત્યજ્ઞાનસ્વરૂપવાન્ ।
નાદાન્તરોઽહં નાદોઽહં નામરૂપવિવર્જિતઃ ॥ ૨૪.૩૧॥

અત્યન્તાભિન્નહીનોઽહમાદિમધ્યાન્તવર્જિતઃ ।
એવં નિત્યં દૃઢાભ્યાસ એવં સ્વાનુભવેન ચ ॥ ૨૪.૩૨॥

એવમેવ હિ નિત્યાત્મભાવનેન સુખી ભવ ।
એવમાત્મા સુખં પ્રાપ્તઃ પુનર્જન્મ ન સમ્ભવેત્ ॥ ૨૪.૩૩॥

સદ્યો મુક્તો ભવેદ્બ્રહ્માકારેણ પરિતિષ્ઠતિ ।
આત્માકારમિદં વિશ્વમાત્માકારમહં મહત્ ॥ ૨૪.૩૪॥

આત્મૈવ નાન્યદ્ભૂતં વા આત્મૈવ મન એવ હિ ।
આત્મૈવ ચિત્તવદ્ભાતિ આત્મૈવ સ્મૃતિવત્ક્વચિત્ ॥ ૨૪.૩૫॥

આત્મૈવ વૃત્તિવદ્ભાતિ (વૃત્તિમદ્ભાતિ) આત્મૈવ ક્રોધવત્સદા ।
આત્મૈવ શ્રવણં તદ્વદાત્મૈવ મનનં ચ તત્ ॥ ૨૪.૩૬॥

આત્મૈવોપક્રમં નિત્યમુપસંહારમાત્મવત્ ।
આત્મૈવાભ્યાં સમં નિત્યમાત્મૈવાપૂર્વતાફલમ્ ॥ ૨૪.૩૭॥

અર્થવાદવદાત્મા હિ પરમાત્મોપપત્તિ હિ ।
ઇચ્છા પ્રારભ્યવદ્બ્રહ્મ (પ્રારબ્ધવદ્બ્રહ્મ)
ઇચ્છામારભ્યવત્પરઃ ॥ ૨૪.૩૮॥

પરેચ્છારબ્ધવદ્બ્રહ્મા ઇચ્છાશક્તિશ્ચિદેવ હિ ।
અનિચ્છાશક્તિરાત્મૈવ પરેચ્છાશક્તિરવ્યયઃ ॥ ૨૪.૩૯॥

પરમાત્મૈવાધિકારો વિષયં પરમાત્મનઃ ।
સમ્બન્ધં પરમાત્મૈવ પ્રયોજનં પરાત્મકમ્ ॥ ૨૪.૪૦॥

બ્રહ્મૈવ પરમં સઙ્ગં કર્મજં બ્રહ્મ સઙ્ગમમ્ ।
બ્રહ્મૈવ ભ્રાન્તિજં ભાતિ દ્વન્દ્વં બ્રહ્મૈવ નાન્યતઃ ॥ ૨૪.૪૧॥

સર્વં બ્રહ્મેતિ નિશ્ચિત્ય સદ્ય એવ વિમોક્ષદમ્ ।
સવિકલ્પસમાધિસ્થં નિર્વિકલ્પસમાધિ હિ ॥ ૨૪.૪૨॥

શબ્દાનુવિદ્ધં બ્રહ્મૈવ બ્રહ્મ દૃશ્યાનુવિદ્ધકમ્ ।
બ્રહ્મૈવાદિસમાધિશ્ચ તન્મધ્યમસમાધિકમ્ ॥ ૨૪.૪૩॥

બ્રહ્મૈવ નિશ્ચયં શૂન્યં તદુક્તમસમાધિકમ્ ।
દેહાભિમાનરહિતં તદ્વૈરાગ્યસમાધિકમ્ ॥ ૨૪.૪૪॥

એતદ્ભાવનયા શાન્તં જીવન્મુક્તસમાધિકઃ ।
અત્યન્તં સર્વશાન્તત્વં દેહો મુક્તસમાધિકમ્ ॥ ૨૪.૪૫॥

એતદભ્યાસિનાં પ્રોક્તં સર્વં ચૈતત્સમન્વિતમ્ ।
સર્વં વિસ્મૃત્ય વિસ્મૃત્ય ત્યક્ત્વા ત્યક્ત્વા પુનઃ પુનઃ ॥ ૨૪.૪૬॥

સર્વવૃત્તિં ચ શૂન્યેન સ્થાસ્યામીતિ વિમુચ્ય હિ ।
ન સ્થાસ્યામીતિ વિસ્મૃત્ય ભાસ્યામીતિ (સ્થાત્યામિતિ) ચ વિસ્મર ॥ ૨૪.૪૭॥

ચૈતન્યોઽહમિતિ ત્યક્ત્વા સન્માત્રોઽહમિતિ ત્યજ ।
ત્યજનં ચ પરિત્યજ્ય ભાવનં ચ પરિત્યજ ॥ ૨૪.૪૮॥

સર્વં ત્યક્ત્વા મનઃ ક્ષિપ્રં સ્મરણં ચ પરિત્યજ ।
સ્મરણં કિઞ્ચિદેવાત્ર મહાસંસારસાગરમ્ ॥ ૨૪.૪૯॥

સ્મરણં કિઞ્ચિદેવાત્ર મહાદુઃખં ભવેત્તદા ।
મહાદોષં ભવં બન્ધં ચિત્તજન્મ શતં મનઃ ॥ ૨૪.૫૦॥

પ્રારબ્ધં હૃદયગ્રન્થિ બ્રહ્મહત્યાદિ પાતકમ્ ।
સ્મરણં ચૈવમેવેહ બન્ધમોક્ષસ્ય કારણમ્ ॥ ૨૪.૫૧॥

અહં બ્રહ્મપ્રકરણં સર્વદુઃખવિનાશકમ્ ।
સર્વપ્રપઞ્ચશમનં સદ્યો મોક્ષપ્રદં સદા ।
એતચ્છ્રવણમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૨૪.૫૨॥

ભક્ત્યા પદ્મદલાક્ષપૂજિતપદધ્યાનાનુવૃત્ત્યા મનઃ
સ્વાન્તાનન્તપથપ્રચારવિધુરં મુક્ત્યૈ ભવેન્માનસમ્ ।
સઙ્કલ્પોજ્ઝિતમેતદલ્પસુમહાશીલો દયામ્ભોનિધૌ
કશ્ચિત્સ્યાચ્છિવભક્તધુર્યસુમહાશાન્તઃ શિવપ્રેમતઃ ॥ ૨૪.૫૩॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
અહં બ્રહ્મપ્રકરણનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ ॥

## ૨૫. બ્રહ્મણસ્સર્વરૂપત્વનિરૂપણપ્રકરણં નામ પઞ્ચવિંશોઽધ્યાયઃ

ઋભુઃ -

વક્ષ્યે પ્રસિદ્ધમાત્માનં સર્વલોકપ્રકાશકમ્ ।
સર્વાકારં સદા સિદ્ધં સર્વત્ર નિબિડં મહત્ ॥ ૨૫.૧॥

તદ્બ્રહ્માહં ન સન્દેહ ઇતિ નિશ્ચિત્ય તિષ્ઠ ભોઃ ।
ચિદેવાહં ચિદેવાહં ચિત્રં ચેદહમેવ હિ ॥ ૨૫.૨॥

વાચાવધિશ્ચ દેવોઽહં ચિદેવ મનસઃ પરઃ ।
ચિદેવાહં પરં બ્રહ્મ ચિદેવ સકલં પદમ્ ॥ ૨૫.૩॥

સ્થૂલદેહં ચિદેવેદં સૂક્ષ્મદેહં ચિદેવ હિ ।
ચિદેવ કરણં સોઽહં કાયમેવ ચિદેવ હિ ॥ ૨૫.૪॥

અખણ્ડાકારવૃત્તિશ્ચ ઉત્તમાધમમધ્યમાઃ ।
દેહહીનશ્ચિદેવાહં સૂક્ષ્મદેહશ્ચિદેવ હિ ॥ ૨૫.૫॥

ચિદેવ કારણં સોઽહં બુદ્ધિહીનશ્ચિદેવ હિ ।
ભાવહીનશ્ચિદેવાહં દોષહીનશ્ચિદેવ હિ ॥ ૨૫.૬॥

અસ્તિત્વં બ્રહ્મ નાસ્ત્યેવ નાસ્તિ બ્રહ્મેતિ નાસ્તિ હિ ।
(અસ્તિ બ્રહ્મમૈવ મસ્ત્યેવ નાસ્તિ બ્રહ્મેતિ નાસ્તિ હિ ।)
અસ્તિ નાસ્તીતિ નાસ્ત્યેવ અહમેવ ચિદેવ હિ ॥ ૨૫.૭॥

સર્વં નાસ્ત્યેવ નાસ્ત્યેવ સાકારં નાસ્તિ નાસ્તિ હિ ।
યત્કિઞ્ચિદપિ નાસ્ત્યેવ અહમેવ ચિદેવ હિ ॥ ૨૫.૮॥

અન્વયવ્યતિરેકં ચ આદિમધ્યાન્તદૂષણમ્ ।
સર્વં ચિન્માત્રરૂપત્વાદહમેવ ચિદેવ હિ ॥ ૨૫.૯॥

સર્વાપરં ચ સદસત્કાર્યકારણકર્તૃકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૦॥

અશુદ્ધં શુદ્ધમદ્વૈતં દ્વૈતમેકમનેકકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૧॥

અસત્યસત્યમદ્વન્દ્વં (અસત્યં સત્યમદ્વૈતં) દ્વન્દ્વં ચ પરતઃ પરમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૨॥

ભૂતં ભવિષ્યં વર્તં ચ મોહામોહૌ સમાસમૌ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૩॥

ક્ષણં લવં ત્રુટિર્બ્રહ્મત્વમ્પદં તત્પદં તથા ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૪॥

ત્વમ્પદં તત્પદં વાપિ ઐક્યં ચ હ્યહમેવ હિ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૫॥

આનન્દં પરમાનન્દં સર્વાનન્દં નિજં મહત્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૬॥

અહં બ્રહ્મ ઇદં બ્રહ્મ કં બ્રહ્મ હ્યક્ષરં પરમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૭॥

વિષ્ણુરેવ પરં બ્રહ્મ શિવો બ્રહ્માહમેવ હિ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૮॥

શ્રોત્રં બ્રહ્મ પરં બ્રહ્મ શબ્દં બ્રહ્મ પદં શુભમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૯॥

સ્પર્શો બ્રહ્મ પદં ત્વક્ચ ત્વક્ચ બ્રહ્મ પરસ્પરમ્ ।
(સ્પર્શો બ્રહ્મ પદં ત્વં ચ ત્વં ચ બ્રહ્મ ત્વક્યેતિ ।)
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૦॥

પરં રૂપં ચક્ષુર્ભિરેવ તત્રૈવ યોજ્યતામ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૧॥

બ્રહ્મૈવ સર્વં સતતં સચ્ચિદાનન્દમાત્રકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૨॥

ચિન્મયાનન્દમાત્રોઽહં ઇદં વિશ્વમિદં સદા ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૩॥

બ્રહ્મૈવ સર્વં યત્કિઞ્ચિત્તદ્બ્રહ્માહં ન સંશયઃ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૪॥

વાચા યત્પ્રોચ્યતે નામ મનસા મનુતે તુ યત્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૫॥

કારણે કલ્પિતે યદ્યત્તૂષ્ણીં વા સ્થીયતે સદા ।

શરીરેણ તુ યદ્ભુઙ્ક્તે ઇન્દ્રિયૈર્યત્તુ ભાવ્યતે ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૬॥

વેદે યત્કર્મ વેદોક્તં શાસ્ત્રં શાસ્ત્રોક્તનિર્ણયમ્ ।
ગુરૂપદેશસિદ્ધાન્તં શુદ્ધાશુદ્ધવિભાસકમ્ ॥ ૨૫.૨૭॥

કામાદિકલનં બ્રહ્મ દેવાદિકલનં પૃથક્ ।
જીવયુક્તેતિ કલનં વિદેહો મુક્તિકલ્પનમ્ ॥ ૨૫.૨૮॥

બ્રહ્મ ઇત્યપિ સઙ્કલ્પં બ્રહ્મવિદ્વરકલ્પનમ્ ।
વરીયાનિતિ સઙ્કલ્પં વરિષ્ઠ ઇતિ કલ્પનમ્ ॥ ૨૫.૨૯॥

(કનીયાનિતિ સઙ્કલ્પં ગરીયાનિતિ કલ્પનમ્) ॥ ૨૫.૨૯॥

બ્રહ્માહમિતિ સઙ્કલ્પં ચિદહં ચેતિ કલ્પનમ્ ।
મહાવિદ્યેતિ સઙ્કલ્પં મહામાયેતિ કલ્પનમ્ ॥ ૨૫.૩૦॥

મહાશૂન્યેતિ સઙ્કલ્પં મહાચિન્તેતિ કલ્પનમ્ ।
મહાલોકેતિ સઙ્કલ્પં મહાસત્યેતિ કલ્પનમ્ ॥ ૨૫.૩૧॥

મહારૂપેતિ સઙ્કલ્પં મહારૂપં ચ કલ્પનમ્ ।
સર્વસઙ્કલ્પકં ચિત્તં સર્વસઙ્કલ્પકં મનઃ ॥ ૨૫.૩૨॥

સર્વં નાસ્ત્યેવ નાસ્ત્યેવ સર્વં બ્રહ્મૈવ કેવલમ્ ।
સર્વં દ્વૈતં મનોરૂપં સર્વં દુઃખં મનોમયમ્ ॥ ૨૫.૩૩॥

ચિદેવાહં ન સન્દેહઃ ચિદેવેદં જગત્ત્રયમ્ ।
યત્કિઞ્ચિદ્ભાષણં વાપિ યત્કિઞ્ચિન્મનસો જપમ્ ।
યત્કિઞ્ચિન્માનસં કર્મ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૫.૩૪॥

સર્વં નાસ્તીતિ સન્મન્ત્રં જીવબ્રહ્મસ્વરૂપકમ્ ।
બ્રહ્મૈવ સર્વમિત્યેવં મન્ત્રઞ્ચૈવોત્તમોત્તમમ્ ॥ ૨૫.૩૫॥

અનુક્તમન્ત્રં સન્મન્ત્રં વૃત્તિશૂન્યં પરં મહત્ ।
સર્વં બ્રહ્મેતિ સઙ્કલ્પં તદેવ પરમં પદમ્ ॥ ૨૫.૩૬॥

સર્વં બ્રહ્મેતિ સઙ્કલ્પં મહાદેવેતિ કીર્તનમ્ ।
સર્વં બ્રહ્મેતિ સઙ્કલ્પં શિવપૂજાસમમ્મહત્ ॥ ૨૫.૩૭॥

સર્વં બ્રહ્મેત્યનુભવઃ સર્વાકારો ન સંશયઃ ।
સર્વં બ્રહ્મેતિ સઙ્કલ્પં સર્વત્યાગમિતીરિતમ્ ॥ ૨૫.૩૮॥

સર્વં બ્રહ્મેતિ સઙ્કલ્પં ભાવાભાવવિનાશનમ્ ।
સર્વં બ્રહ્મેતિ સઙ્કલ્પં મહાદેવેતિ નિશ્ચયઃ ॥ ૨૫.૩૯॥

સર્વં બ્રહ્મેતિ સઙ્કલ્પં કાલસત્તાવિનિર્મુક્તઃ (મુક્તિકઃ) ।
સર્વં બ્રહ્મેતિ સઙ્કલ્પઃ દેહસત્તા વિમુક્તિકઃ ॥ ૨૫.૪૦॥

સર્વં બ્રહ્મેતિ સઙ્કલ્પઃ સચ્ચિદાનન્દરૂપકઃ ।
સર્વોઽહં બ્રહ્મમાત્રૈવ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૫.૪૧॥

ઇદમિત્યેવ યત્કિઞ્ચિત્તદ્બ્રહ્મૈવ ન સંશયઃ ।
ભ્રાન્તિશ્ચ નરકં દુઃખં સ્વર્ગભ્રાન્તિરિતીરિતા ॥ ૨૫.૪૨॥

બ્રહ્મા વિષ્ણુરિતિ ભ્રાન્તિર્ભ્રાન્તિશ્ચ શિવરૂપકમ્ ।
વિરાટ્સ્વરાટ્તથા સંરાટ્સૂત્રાત્મા ભ્રાન્તિરેવ ચ ॥ ૨૫.૪૩॥

દેવાશ્ચ દેવકાર્યાણિ સૂર્યાચન્દ્રમસોર્ગતિઃ ।
મુનયો મનવઃ સિદ્ધા ભ્રાન્તિરેવ ન સંશયઃ ॥ ૨૫.૪૪॥

સર્વદેવાસુરા ભ્રાન્તિસ્તેષાં યુદ્ધાદિ જન્મ ચ ।
વિષ્ણોર્જન્માવતારાણિ ચરિતં શાન્તિરેવ હિ ॥ ૨૫.૪૫॥

બ્રહ્મણઃ સૃષ્ટિકૃત્યાનિ રુદ્રસ્ય ચરિતાનિ ચ ।
સર્વભ્રાન્તિસમાયુક્તં ભ્રાન્ત્યા લોકાશ્ચતુર્દશ ॥ ૨૫.૪૬॥

વર્ણાશ્રમવિભાગશ્ચ ભ્રાન્તિરેવ ન સંશયઃ ।
બ્રહ્મવિષ્ણ્વીશરુદ્રાણામુપાસા ભ્રાન્તિરેવ ચ ॥ ૨૫.૪૭॥

તત્રાપિ યન્ત્રમન્ત્રાભ્યાં ભ્રાન્તિરેવ ન સંશયઃ ।
વાચામગોચરં બ્રહ્મ સર્વં બ્રહ્મમયં ચ હિ ॥ ૨૫.૪૮॥

સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ ચિદેવ હિ ।
એવં વદ ત્વં તિષ્ઠ ત્વં સદ્યો મુક્તો ભવિષ્યસિ ॥ ૨૫.૪૯॥

એતાવદુક્તં યત્કિઞ્ચિત્તન્નાસ્ત્યેવ ન સંશયઃ ।
એવં યદાન્તરં ક્ષિપ્રં બ્રહ્મૈવ દૃઢનિશ્ચયમ્ ॥ ૨૫.૫૦॥

દૃઢનિશ્ચયમેવાત્ર પ્રથમં કારણં ભવેત્ ।
નિશ્ચયઃ ખલ્વયં પશ્ચાત્સ્વયમેવ ભવિષ્યતિ ॥ ૨૫.૫૧॥

આર્તં યચ્છિવપાદતોઽન્યદિતરં તજ્જાદિશબ્દાત્મકં

ચેતોવૃત્તિપરં પરાપ્રમુદિતં ષડ્ભાવસિદ્ધં જગત્ ।
ભૂતાક્ષાદિમનોવચોભિરનઘે સાન્દ્રે મહેશે ઘને
સિન્ધૌ સૈન્ધવખણ્ડવજ્જગદિદં લીયેત વૃત્ત્યુજ્ઝિતમ્ ॥ ૨૫.૫૨॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
બ્રહ્મણસ્સર્વરૂપત્વનિરૂપણપ્રકરણં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥

## ૨૬. જ્ઞાનામૃતમનોમયપ્રકરણવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે સચ્ચિત્પરાનન્દં સ્વભાવં સર્વદા સુખમ્ ।
સર્વવેદપુરાણાનાં સારાત્સારતરં સ્વયમ્ ॥ ૨૬.૧॥

ન ભેદં ચ દ્વયં દ્વન્દ્વં ન ભેદં ભેદવર્જિતમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૨॥

ન ક્વચિન્નાત એવાહં નાક્ષરં ન પરાત્પરમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૩॥

ન બહિર્નાન્તરં નાહં ન સઙ્કલ્પો ન વિગ્રહઃ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૪॥

ન સત્યં ચ પરિત્યજ્ય ન વાર્તા નાર્થદૂષણમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૫॥

ન ગુણો ગુણિવાક્યં વા ન મનોવૃત્તિનિશ્ચયઃ ।
ન જપં ન પરિચ્છિન્નં ન વ્યાપકમસત્ફલમ્ ॥ ૨૬.૬॥

ન ગુરુર્ન ચ શિષ્યો વા ન સ્થિરં ન શુભાશુભમ્ ।
નૈકરૂપં નાન્યરૂપં ન મોક્ષો ન ચ બન્ધકમ્ ॥ ૨૬.૭॥

અહં પદાર્થસ્તત્પદં વા નેન્દ્રિયં વિષયાદિકમ્ ।
ન સંશયં ન તુચ્છં વા ન નિશ્ચયં ન વા કૃતમ્ ॥ ૨૬.૮॥

ન શાન્તિરૂપમદ્વૈતં ન ચોર્ધ્વં ન ચ નીચકમ્ ।
ન લક્ષણં ન દુઃખાઙ્ગં ન સુખં ન ચ ચઞ્ચલમ્ ॥ ૨૬.૯॥

ન શરીરં ન લિઙ્ગં વા ન કારણમકારણમ્ ।
ન દુઃખં નાન્તિકં નાહં ન ગૂઢં ન પરં પદમ્ ॥ ૨૬.૧૦॥

ન સઞ્ચિતં ચ નાગામિ ન સત્યં ચ ત્વમાહકમ્ ।
નાજ્ઞાનં ન ચ વિજ્ઞાનં ન મૂઢો ન ચ વિજ્ઞવાન્ (વિવેકવાન્) ॥ ૨૬.૧૧॥

ન નીચં નરકં નાન્તં ન મુક્તિર્ન ચ પાવનમ્ ।
ન તૃષ્ણા ન ચ વિદ્યાત્વં નાહં તત્ત્વં ન દેવતા ॥ ૨૬.૧૨॥

ન શુભાશુભસઙ્કેતો ન મૃત્યુર્ન ચ જીવનમ્ ।
ન તૃપ્તિર્ન ચ ભોજ્યં વા ન ખણ્ડૈકરસોઽદ્વયમ્ ॥ ૨૬.૧૩॥

ન સઙ્કલ્પં ન પ્રપઞ્ચં ન જાગરણરાજકમ્ ।
ન કિઞ્ચિત્સમતાદોષો ન તુર્યગણના ભ્રમઃ ॥ ૨૬.૧૪॥

ન સર્વં સમલં નેષ્ટં ન નીતિર્ન ચ પૂજનમ્ ।
ન પ્રપઞ્ચં ન બહુના નાન્યભાષણસઙ્ગમઃ ॥ ૨૬.૧૫॥

ન સત્સઙ્ગમસત્સઙ્ગઃ ન બ્રહ્મ ન વિચારણમ્ ।
નાભ્યાસં ન ચ વક્તા ચ ન સ્નાનં ન ચ તીર્થકમ્ ॥ ૨૬.૧૬॥

ન પુણ્યં ન ચ વા પાપં ન ક્રિયા દોષકારણમ્ ।
ન ચાધ્યાત્મં નાધિભૂતં ન દૈવતમસમ્ભવમ્ ॥ ૨૬.૧૭॥

ન જન્મમરણે ક્વાપિ જાગ્રત્સ્વપ્નસુષુપ્તિકમ્ ।
ન ભૂલોકં ન પાતાલં ન જયાપજયાજયૌ ॥ ૨૬.૧૮॥

ન હીનં ન ચ વા ભીતિર્ન રતિર્ન મૃતિસ્ત્વરા ।
અચિન્ત્યં નાપરાધ્યાત્મા નિગમાગમવિભ્રમઃ ॥ ૨૬.૧૯॥

ન સાત્ત્વિકં રાજસં ચ ન તામસગુણાધિકમ્ ।
ન શૈવં ન ચ વેદાન્તં ન સ્વાદ્યં તન્ન માનસમ્ ॥ ૨૬.૨૦॥

ન બન્ધો ન ચ મોક્ષો વા ન વાક્યં ઐક્યલક્ષણમ્ ।
ન સ્ત્રીરૂપં ન પુમ્ભાવઃ ન ષણ્ડો ન સ્થિરઃ પદમ્ ॥ ૨૬.૨૧॥

ન ભૂષણં ન દૂષણં ન સ્તોત્રં ન સ્તુતિર્ન હિ ।
ન લૌકિકં વૈદિકં ન શાસ્ત્રં ન ચ શાસનમ્ ॥ ૨૬.૨૨॥

ન પાનં ન કૃશં નેદં ન મોદં ન મદામદમ્ ।
ન ભાવનમભાવો વા ન કુલં નામરૂપકમ્ ॥ ૨૬.૨૩॥

નોત્કૃષ્ટં ચ નિકૃષ્ટં ચ ન શ્રેયોઽશ્રેય એવ હિ ।
નિર્મલત્વં મલોત્સર્ગો ન જીવો ન મનોદમઃ ॥ ૨૬.૨૪॥

ન શાન્તિકલના નાગં ન શાન્તિર્ન શમો દમઃ ।
ન ક્રીડા ન ચ ભાવાઙ્ગં ન વિકારં ન દોષકમ્ ॥ ૨૬.૨૫॥

ન યત્કિઞ્ચિન્ન યત્રાહં ન માયાખ્યા ન માયિકા ।
યત્કિઞ્ચિન્ન ચ ધર્માદિ ન ધર્મપરિપીડનમ્ ॥ ૨૬.૨૬॥

ન યૌવનં ન બાલ્યં વા ન જરામરણાદિકમ્ ।
ન બન્ધુર્ન ચ વાઽબન્ધુર્ન મિત્રં ન ચ સોદરઃ ॥ ૨૬.૨૭॥

નાપિ સર્વં ન ચાકિઞ્ચિન્ન વિરિઞ્ચો ન કેશવઃ ।
ન શિવો નાષ્ટદિક્પાલો ન વિશ્વો ન ચ તૈજસઃ ॥ ૨૬.૨૮॥

ન પ્રાજ્ઞો હિ ન તુર્યો વા ન બ્રહ્મક્ષત્રવિડ્વરઃ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનામયમ્ ॥ ૨૬.૨૯॥

ન પુનર્ભાવિ પશ્ચાદ્વા ન પુનર્ભવસમ્ભવઃ ।
ન કાલકલના નાહં ન સમ્ભાષણકારણમ્ ॥ ૨૬.૩૦॥

ન ચોર્ધ્વમન્તઃકરણં ન ચ ચિન્માત્રભાષણમ્ ।
ન બ્રહ્માહમિતિ દ્વૈતં ન ચિન્માત્રમિતિ દ્વયમ્ ॥ ૨૬.૩૧॥

નાન્નકોશં ન ચ પ્રાણમનોમયમકોશકમ્ ।
ન વિજ્ઞાનમયઃ કોશઃ ન ચાનન્દમયઃ પૃથક્ ॥ ૨૬.૩૨॥

ન બોધરૂપં બોધ્યં વા બોધકં નાત્ર યદ્ભ્રમઃ ।
ન બાધ્યં બાધકં મિથ્યા ત્રિપુટીજ્ઞાનનિર્ણયઃ ॥ ૨૬.૩૩॥

ન પ્રમાતા પ્રમાણં વા ન પ્રમેયં ફલોદયમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનોમયમ્ ॥ ૨૬.૩૪॥

ન ગુહ્યં ન પ્રકાશં વા ન મહત્વં ન ચાણુતા ।
ન પ્રપઞ્ચો વિદ્યમાનં ન પ્રપઞ્ચઃ કદાચન ॥ ૨૬.૩૫॥

નાન્તઃકરણસંસારો ન મનો જગતાં ભ્રમઃ ।
ન ચિત્તરૂપસંસારો બુદ્ધિપૂર્વં પ્રપઞ્ચકમ્ ॥ ૨૬.૩૬॥

ન જીવરૂપસંસારો વાસનારૂપસંસૃતિઃ ।
ન લિઙ્ગભેદસંસારો નાજ્ઞાનમયસંસ્મૃતિઃ (સંસૃતિઃ) ॥ ૨૬.૩૭॥

ન વેદરૂપસંસારો ન શાસ્ત્રાગમસંસૃતિઃ ।

નાન્યદસ્તીતિ સંસારમન્યદસ્તીતિ ભેદકમ્ ॥ ૨૬.૩૮॥

ન ભેદાભેદકલનં ન દોષાદોષકલ્પનમ્ ।
ન શાન્તાશાન્તસંસારં ન ગુણાગુણસંસૃતિઃ ॥ ૨૬.૩૯॥

ન સ્ત્રીલિઙ્ગં ન પુંલિઙ્ગં ન નપુંસકસંસૃતિઃ ।
ન સ્થાવરં ન જઙ્ગમં ચ ન દુઃખં ન સુખં ક્વચિત્ ॥ ૨૬.૪૦॥

ન શિષ્ટાશિષ્ટરૂપં વા ન યોગ્યાયોગ્યનિશ્ચયઃ ।
ન દ્વૈતવૃત્તિરૂપં વા સાક્ષિવૃત્તિત્વલક્ષણમ્ ॥ ૨૬.૪૧॥

અખણ્ડાકારવૃત્તિત્વમખણ્ડૈકરસં સુખમ્ ।
દેહોઽહમિતિ યા વૃત્તિર્બ્રહ્માહમિતિ શબ્દકમ્ ॥ ૨૬.૪૨॥

અખણ્ડનિશ્ચયા વૃત્તિર્નાખણ્ડૈકરસં મહત્ ।
ન સર્વવૃત્તિભવનં સર્વવૃત્તિવિનાશકમ્ ॥ ૨૬.૪૩॥

સર્વવૃત્ત્યનુસન્ધાનં સર્વવૃત્તિવિમોચનમ્ ।
સર્વવૃત્તિવિનાશાન્તં સર્વવૃત્તિવિશૂન્યકમ્ ॥ ૨૬.૪૪॥

ન સર્વવૃત્તિસાહસ્રં ક્ષણક્ષણવિનાશનમ્ ।
ન સર્વવૃત્તિસાક્ષિત્વં ન ચ બ્રહ્માત્મભાવનમ્ ॥ ૨૬.૪૫॥

ન જગન્ન મનો નાન્તો ન કાર્યકલનં ક્વચિત્ ।
ન દૂષણં ભૂષણં વા ન નિરઙ્કુશલક્ષણમ્ ॥ ૨૬.૪૬॥

ન ચ ધર્માત્મનો લિઙ્ગં ગુણશાલિત્વલક્ષણમ્ ।
ન સમાધિકલિઙ્ગં વા ન પ્રારબ્ધં પ્રબન્ધકમ્ ॥ ૨૬.૪૭॥

બ્રહ્મવિત્તં આત્મસત્યો ન પરઃ સ્વપ્નલક્ષણમ્ ।
(ન બ્રહ્મચિત્ત આત્મન્યો ન પરઃ સ્વપ્નલક્ષણમ્ ।)
ન ચ વર્યપરો રોધો વરિષ્ઠો નાર્થતત્પરઃ ॥ ૨૬.૪૮॥

આત્મજ્ઞાનવિહીનો યો મહાપાતકિરેવ સઃ ।
એતાવજ્જ્ઞાનહીનો યો મહારોગી સ એવ હિ ॥ ૨૬.૪૯॥

અહં બ્રહ્મ ન સન્દેહ અખણ્ડૈકરસાત્મકઃ ।
બ્રહ્મૈવ સર્વમેવેતિ નિશ્ચયાનુભવાત્મકઃ ॥ ૨૬.૫૦॥

સદ્યો મુક્તો ન સન્દેહઃ સદ્યઃ પ્રજ્ઞાનવિગ્રહઃ ।
સ એવ જ્ઞાનવાઁલ્લોકે સ એવ પરમેશ્વરઃ ॥ ૨૬.૫૧॥

ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનોમયમ્ ।
એતત્પ્રકરણં યસ્તુ શ‍ૃણુતે બ્રહ્મ એવ સઃ ॥ ૨૬.૫૨॥

એકત્વં ન બહુત્વમપ્યણુમહત્કાર્યં ન વૈ કારણં
 વિશ્વં વિશ્વપતિત્વમપ્યરસકં નો ગન્ધરૂપં સદા ।
બદ્ધં મુક્તમનુત્તમોત્તમમહાનન્દૈકમોદં સદા
 ભૂમાનન્દસદાશિવં જનિજરારોગાદ્યસઙ્ગં મહઃ ॥ ૨૬.૫૩॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
 જ્ઞાનામૃતમનોમયપ્રકરણવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥

## ૨૭. આનન્દરૂપત્વનિરૂપણપ્રકરણં નામ સપ્તવિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે પ્રકરણં સત્યં બ્રહ્માનન્દમનોમયમ્ ।
કાર્યકારણનિર્મુક્તં નિત્યાનન્દમયં ત્વિદમ્ ॥ ૨૭.૧॥

અક્ષયાનન્દ એવાહમાત્માનન્દપ્રકાશકમ્ ।
જ્ઞાનાનન્દસ્વરૂપોઽહં લક્ષ્યાનન્દમયં સદા ॥ ૨૭.૨॥

 વિષયાનન્દશૂન્યોઽહં મિથ્યાનન્દપ્રકાશકઃ ।
વૃત્તિશૂન્યસુખાત્માહં વૃત્તિશૂન્યસુખાત્પરમ્ ॥ ૨૭.૩॥

 (વૃત્તિશૂન્યં સુખાત્માહં વૃત્તિહીનં સુખાત્પરમ્) ॥ ૨૭.૩॥

જડાનન્દપ્રકાશાત્મા આત્માનન્દરસોઽસ્મ્યહમ્ ।
આત્માનન્દવિહીનોઽહં નાસ્ત્યાનન્દાત્મવિગ્રહઃ ॥ ૨૭.૪॥

કાર્યાનન્દવિહીનોઽહં કાર્યાનન્દકલાત્મકઃ ।
ગુણાનન્દવિહીનોઽહં ગુહ્યાનન્દસ્વરૂપવાન્ ॥ ૨૭.૫॥

ગુપ્તાનન્દસ્વરૂપોઽહં કૃત્યાનન્દમહાનહમ્ ।
જ્ઞેયાનન્દવિહીનોઽહં ગોપ્યાનન્દવિવર્જિતઃ ॥ ૨૭.૬॥

સદાનન્દસ્વરૂપોઽહં મુદાનન્દનિજાત્મકઃ ।
લોકાનન્દો મહાનન્દો લોકાતીતમહાનયમ્ ॥ ૨૭.૭॥

ભેદાનન્દશ્ચિદાનન્દઃ સુખાનન્દોઽહમદ્વયઃ ।

ક્રિયાનન્દોઽક્ષયાનન્દો વૃત્ત્યાનન્દવિવર્જિતઃ ॥ ૨૭.૮॥

સર્વાનન્દોઽક્ષયાનન્દશ્ચિદાનન્દોઽહમવ્યયઃ ।
સત્યાનન્દઃ પરાનન્દઃ સદ્યોનન્દઃ પરાત્પરઃ ॥ ૨૭.૯॥

વાક્યાનન્દમહાનન્દઃ શિવાનન્દોઽહમદ્વયઃ ।
શિવાનન્દોત્તરાનન્દ આદ્યાનન્દવિવર્જિતઃ ॥ ૨૭.૧૦॥

અમલાત્મા પરાનન્દશ્ચિદાનન્દોઽહમદ્વયઃ ।
વૃત્ત્યાનન્દપરાનન્દો વિદ્યાતીતો હિ નિર્મલઃ ॥ ૨૭.૧૧॥

કારણાતીત આનન્દશ્ચિદાનન્દોઽહમદ્વયઃ ।
સર્વાનન્દઃ પરાનન્દો બ્રહ્માનન્દાત્મભાવનઃ ॥ ૨૭.૧૨॥

જીવાનન્દો લયાનન્દશ્ચિદાનન્દસ્વરૂપવાન્ ।
શુદ્ધાનન્દસ્વરૂપાત્મા બુદ્ધ્યાનન્દો મનોમયઃ ॥ ૨૭.૧૩॥

શબ્દાનન્દો મહાનન્દશ્ચિદાનન્દોઽહમદ્વયઃ ।
આનન્દાનન્દશૂન્યાત્મા ભેદાનન્દવિશૂન્યકઃ ॥ ૨૭.૧૪॥

દ્વૈતાનન્દપ્રભાવાત્મા ચિદાનન્દોઽહમદ્વયઃ ।
એવમાદિમહાનન્દ અહમેવેતિ ભાવય ॥ ૨૭.૧૫॥

શાન્તાનન્દોઽહમેવેતિ ચિદાનન્દપ્રભાસ્વરઃ ।
એકાનન્દપરાનન્દ એક એવ ચિદવ્યયઃ ॥ ૨૭.૧૬॥

એક એવ મહાનાત્મા એકસઙ્ખ્યાવિવર્જિતઃ ।
એકતત્ત્વમહાનન્દસ્તત્ત્વભેદવિવર્જિતઃ ॥ ૨૭.૧૭॥

વિજિતાનન્દહીનોઽહં નિર્જિતાનન્દહીનકઃ ।
હીનાનન્દપ્રશાન્તોઽહં શાન્તોઽહમિતિ શાન્તકઃ ॥ ૨૭.૧૮॥

મમતાનન્દશાન્તોઽહમહમાદિપ્રકાશકમ્ ।
સર્વદા દેહશાન્તોઽહં શાન્તોઽહમિતિ વર્જિતઃ ॥ ૨૭.૧૯॥

બ્રહ્મૈવાહં ન સંસારી ઇત્યેવમિતિ શાન્તકઃ ।
અન્તરાદન્તરોઽહં વૈ અન્તરાદન્તરાન્તરઃ ॥ ૨૭.૨૦॥

એક એવ મહાનન્દ એક એવાહમક્ષરઃ ।
એક એવાક્ષરં બ્રહ્મ એક એવાક્ષરોઽક્ષરઃ ॥ ૨૭.૨૧॥

એક એવ મહાનાત્મા એક એવ મનોહરઃ ।
એક એવાદ્વયોઽહં વૈ એક એવ ન ચાપરઃ ॥ ૨૭.૨૨॥

એક એવ ન ભૂરાદિ એક એવ ન બુદ્ધયઃ ।
એક એવ પ્રશાન્તોઽહં એક એવ સુખાત્મકઃ ॥ ૨૭.૨૩॥

એક એવ ન કામાત્મા એક એવ ન કોપકમ્ ।
એક એવ ન લોભાત્મા એક એવ ન મોહકઃ ॥ ૨૭.૨૪॥

એક એવ મદો નાહં એક એવ ન મે રસઃ ।
એક એવ ન ચિત્તાત્મા એક એવ ન ચાન્યકઃ ॥ ૨૭.૨૫॥

એક એવ ન સત્તાત્મા એક એવ જરામરઃ ।
એક એવ હિ પૂર્ણાત્મા એક એવ હિ નિશ્ચલઃ ॥ ૨૭.૨૬॥

એક એવ મહાનન્દ એક એવાહમેકવાન્ ।
દેહોઽહમિતિ હીનોઽહં શાન્તોઽહમિતિ શાશ્વતઃ ॥ ૨૭.૨૭॥

શિવોઽહમિતિ શાન્તોઽહં આત્મૈવાહમિતિ ક્રમઃ (આત્મૈવાહમિત્યક્રિયઃ) ।
જીવોઽહમિતિ શાન્તોઽહં નિત્યશુદ્ધહૃદન્તરઃ ॥ ૨૭.૨૮॥

એવં ભાવય નિઃશઙ્કં સદ્યો મુક્તસ્ત્વમદ્વયે ।
એવમાદિ સુશબ્દં વા નિત્યં પઠતુ નિશ્ચલઃ ॥ ૨૭.૨૯॥

(જન્મમૃત્યુજરાવ્યાધિસંસારાબ્ધિં તરણ્યસિ)
કાલસ્વભાવો નિયતૈશ્ચ ભૂતૈઃ જગદ્વિજાયેત ઇતિ શ્રુતીરિતમ્ ।
તદ્વૈ મૃષા સ્યાજ્જગતો જડત્વતઃ ઇચ્છાભવં
ચૈતદથેશ્વરસ્ય ॥ ૨૭.૩૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
આનન્દરૂપત્વનિરૂપણપ્રકરણં નામ સપ્તવિંશોઽધ્યાયઃ ॥

## ૨૮. આત્મવૈલક્ષણ્યપ્રકરણં નામ અષ્ટાવિંશોઽધ્યાયઃ

ઋભુઃ -
બ્રહ્મૈવાહં ચિદેવાહં નિર્મલોઽહં નિરન્તરઃ ।
શુદ્ધસ્વરૂપ એવાહં નિત્યરૂપઃ પરોઽસ્મ્યહમ્ ॥ ૨૮.૧॥

નિત્યનિર્મલરૂપોઽહં નિત્યચૈતન્યવિગ્રહઃ ।

આદ્યન્તરૂપહીનોઽહમાદ્યન્તદ્વૈતહીનકઃ ॥ ૨૮.૨॥

અજસ્રસુખરૂપોઽહં અજસ્રાનન્દરૂપવાન્ ।
અહમેવાદિનિર્મુક્તઃ અહં કારણવર્જિતઃ ॥ ૨૮.૩॥

અહમેવ પરં બ્રહ્મ અહમેવાહમેવ હિ ।
ઇત્યેવં ભાવયન્નિત્યં સુખમાત્મનિ નિર્મલઃ ॥ ૨૮.૪॥

સુખં તિષ્ઠ સુખં તિષ્ઠ સુચિરં સુખમાવહ ।
સર્વવેદમનન્યસ્ત્વં સર્વદા નાસ્તિ કલ્પનમ્ ॥ ૨૮.૫॥

સર્વદા નાસ્તિ ચિત્તાખ્યં સર્વદા નાસ્તિ સંસૃતિઃ ।
સર્વદા નાસ્તિ નાસ્ત્યેવ સર્વદા જગદેવ ન ॥ ૨૮.૬॥

જગત્પ્રસઙ્ગો નાસ્ત્યેવ દેહવાર્તા કુતસ્તતઃ ।
બ્રહ્મૈવ સર્વચિન્માત્રમહમેવ હિ કેવલમ્ ॥ ૨૮.૭॥

ચિત્તમિત્યપિ નાસ્ત્યેવ ચિત્તમસ્તિ હિ નાસ્તિ હિ ।
અસ્તિત્વભાવના નિષ્ઠા જગદસ્તિત્વવાઙ્મૃષા ॥ ૨૮.૮॥

અસ્તિત્વવક્તા વાર્તા હિ જગદસ્તીતિ ભાવના ।
સ્વાત્મનોઽન્યજ્જગદ્રક્ષા દેહોઽહમિતિ નિશ્ચિતઃ ॥ ૨૮.૯॥

મહાચણ્ડાલ એવાસૌ મહાવિપ્રોઽપિ નિશ્ચયઃ ।
તસ્માદિતિ જગન્નેતિ ચિત્તં વા બુદ્ધિરેવ ચ ॥ ૨૮.૧૦॥

નાસ્તિ નાસ્તીતિ સહસા નિશ્ચયં કુરુ નિર્મલઃ ।
દૃશ્યં નાસ્ત્યેવ નાસ્ત્યેવ નાસ્તિ નાસ્તીતિ ભાવય ॥ ૨૮.૧૧॥

અહમેવ પરં બ્રહ્મ અહમેવ હિ નિષ્કલઃ ।
અહમેવ ન સન્દેહઃ અહમેવ સુખાત્સુખમ્ ॥ ૨૮.૧૨॥

અહમેવ હિ દિવ્યાત્મા અહમેવ હિ કેવલઃ ।
વાચામગોચરોઽહં વૈ અહમેવ ન ચાપરઃ ॥ ૨૮.૧૩॥

અહમેવ હિ સર્વાત્મા અહમેવ સદા પ્રિયઃ ।
અહમેવ હિ ભાવાત્મા અહં વૃત્તિવિવર્જિતઃ ॥ ૨૮.૧૪॥

અહમેવાપરિચ્છિન્ન અહમેવ નિરન્તરઃ ।
અહમેવ હિ નિશ્ચિન્ત અહમેવ હિ સદ્ગુરુઃ ॥ ૨૮.૧૫॥

અહમેવ સદા સાક્ષી અહમેવાહમેવ હિ ।
નાહં ગુપ્તો ન વાઽગુપ્તો ન પ્રકાશાત્મકઃ સદા ॥ ૨૮.૧૬॥

નાહં જડો ન ચિન્માત્રઃ ક્વચિત્કિઞ્ચિત્તદસ્તિ હિ ।
નાહં પ્રાણો જડત્વં તદત્યન્તં સર્વદા ભ્રમઃ ॥ ૨૮.૧૭॥

અહમત્યન્તમાનન્દ અહમત્યન્તનિર્મલઃ ।
અહમત્યન્તવેદાત્મા અહમત્યન્તશાઙ્કરઃ ॥ ૨૮.૧૮॥

અહમિત્યપિ મે કિઞ્ચિદહમિત્યપિ ન સ્મૃતિઃ ।
સર્વહીનોઽહમેવાગ્રે સર્વહીનઃ સુખાચ્છુભાત્ ॥ ૨૮.૧૯॥

પરાત્પરતરં બ્રહ્મ પરાત્પરતરઃ પુમાન્ ।
પરાત્પરતરોઽહં વૈ સર્વસ્યાત્પરતઃ પરઃ ॥ ૨૮.૨૦॥

સર્વદેહવિહીનોઽહં સર્વકર્મવિવર્જિતઃ ।
સર્વમન્ત્રઃ પ્રશાન્તાત્મા સર્વાન્તઃકરણાત્ પરઃ ॥ ૨૮.૨૧॥

સર્વસ્તોત્રવિહીનોઽહં સર્વદેવપ્રકાશકઃ ।
સર્વસ્નાનવિહીનાત્મા એકમગ્નોઽહમદ્વયઃ ॥ ૨૮.૨૨॥

આત્મતીર્થે હ્યાત્મજલે આત્માનન્દમનોહરે ।
આત્મૈવાહમિતિ જ્ઞાત્વા આત્મારામોવસામ્યહમ્ ॥ ૨૮.૨૩॥

આત્મૈવ ભોજનં હ્યાત્મા તૃપ્તિરાત્મસુખાત્મકઃ ।
આત્મૈવ હ્યાત્મનો હ્યાત્મા આત્મૈવ પરમો હ્યહમ્ ॥ ૨૮.૨૪॥

અહમાત્માઽહમાત્માહમહમાત્મા ન લૌકિકઃ ।
સર્વાત્માહં સદાત્માહં નિત્યાત્માહં ગુણાન્તરઃ ॥ ૨૮.૨૫॥

એવં નિત્યં ભાવયિત્વા સદા ભાવય સિદ્ધયે ।
સિદ્ધં તિષ્ઠતિ ચિન્માત્રો નિશ્ચયં માત્રમેવ સા ।
નિશ્ચયં ચ લયં યાતિ સ્વયમેવ સુખી ભવ ॥ ૨૮.૨૬॥

શાખાદિભિશ્ચ શ્રુતયો હ્યનન્તા-
સ્ત્વામેકમેવ ભગવન્બહુધા વદન્તિ ।
વિષ્ણ્વિન્દ્રધાતૃરવિસૂન્વનલાનિલાદિ
ભૂતાત્મનાથ ગણનાથલલામ શમ્ભો ॥ ૨૮.૨૭॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે

આત્મવૈલક્ષણ્યપ્રકરણં નામ અષ્ટાવિંશોઽધ્યાયઃ ॥

## ૨૯. તન્મયભાવોપદેશપ્રકરણં નામ એકોનત્રિંશોઽધ્યાયઃ

ઋભુઃ -
અત્યન્તં તન્મયં વક્ષ્યે દુર્લભં યોગિનામપિ ।
વેદશાસ્ત્રેષુ દેવેષુ રહસ્યમતિદુર્લભમ્ ॥ ૨૯.૧॥

યઃ પરં બ્રહ્મ સર્વાત્મા સચ્ચિદાનન્દવિગ્રહઃ ।
સર્વાત્મા પરમાત્મા હિ તન્મયો ભવ સર્વદા ॥ ૨૯.૨॥

આત્મરૂપમિદં સર્વમાદ્યન્તરહિતોઽજયઃ ।
કાર્યાકાર્યમિદં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૩॥

યત્ર દ્વૈતભયં નાસ્તિ યત્રાદ્વૈતપ્રબોધનમ્ ।
શાન્તાશાન્તદ્વયં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪॥

યત્ર સઙ્કલ્પકં નાસ્તિ યત્ર ભ્રાન્તિર્ન વિદ્યતે ।
તદેવ હિ મતિર્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫॥

યત્ર બ્રહ્મણિ નાસ્ત્યેવ યત્ર ભાવિ વિકલ્પનમ્ ।
યત્ર સર્વં જગન્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૬॥

યત્ર ભાવમભાવં વા મનોભ્રાન્તિ વિકલ્પનમ્ ।
યત્ર ભ્રાન્તેર્ન વાર્તા વા તન્મયો ભવ સર્વદા ॥ ૨૯.૭॥

(યત્ર વાર્તા ન વાર્તા વા તન્મયો ભવ સર્વદા) ॥ ૨૯.૭॥

યત્ર નાસ્તિ સુખં નાસ્તિ દેહોઽહમિતિ રૂપકમ્ ।
સર્વસઙ્કલ્પનિર્મુક્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૮॥

યત્ર બ્રહ્મ વિના ભાવો યત્ર દોષો ન વિદ્યતે ।
યત્ર દ્વન્દ્વભયં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૯॥

યત્ર વાક્કાયકાર્યં વા યત્ર કલ્પો લયં ગતઃ ।
યત્ર પ્રપઞ્ચં નોત્પન્નં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૦॥

યત્ર માયા પ્રકાશો ન માયા કાર્યં ન કિઞ્ચન ।
યત્ર દૃશ્યમદૃશ્યં વા તન્મયો ભવ સર્વદા ॥ ૨૯.૧૧॥

વિદ્વાન્વિદ્યાપિ નાસ્ત્યેવ યત્ર પક્ષવિપક્ષકૌ ।
ન યત્ર દોષાદોષૌ વા તન્મયો ભવ સર્વદા ॥ ૨૯.૧૨॥

યત્ર વિષ્ણુત્વભેદો ન યત્ર બ્રહ્મા ન વિદ્યતે ।
યત્ર શઙ્કરભેદો ન તન્મયો ભવ સર્વદા ॥ ૨૯.૧૩॥

ન યત્ર સદસદ્ભેદો ન યત્ર કલનાપદમ્ ।
ન યત્ર જીવકલના તન્મયો ભવ સર્વદા ॥ ૨૯.૧૪॥

ન યત્ર શઙ્કરધ્યાનં ન યત્ર પરમં પદમ્ ।
ન યત્ર કલનાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૫॥

ન યત્રાણુર્મહત્ત્વં ચ યત્ર સન્તોષકલ્પનમ્ ।
યત્ર પ્રપઞ્ચમાભાસં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૬॥

ન યત્ર દેહકલનં ન યત્ર હિ કુતૂહલમ્ ।
ન યત્ર ચિત્તકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૭॥

ન યત્ર બુદ્ધિવિજ્ઞાનં ન યત્રાત્મા મનોમયઃ ।
ન યત્ર કામકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૮॥

ન યત્ર મોક્ષવિશ્રાન્તિર્યત્ર બન્ધત્વવિ(નિ)ગ્રહઃ ।
ન યત્ર શાશ્વતં જ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૧૯॥

ન યત્ર કાલકલનં યત્ર દુઃખત્વભાવનમ્ ।
ન યત્ર દેહકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૦॥

ન યત્ર જીવવૈરાગ્યં યત્ર શાસ્ત્રવિકલ્પનમ્ ।
યત્રાહમહમાત્મત્વં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૧॥

ન યત્ર જીવન્મુક્તિર્વા યત્ર દેહવિમોચનમ્ ।
યત્ર સઙ્કલ્પિતં કાર્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૨॥

ન યત્ર ભૂતકલનં યત્રાન્યત્વપ્રભાવનમ્ ।
ન યત્ર જીવભેદો વા તન્મયો ભવ સર્વદા ॥ ૨૯.૨૩॥

યત્રાનન્દપદં બ્રહ્મ યત્રાનન્દપદં સુખમ્ ।
યત્રાનન્દગુણં નિત્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૪॥

ન યત્ર વસ્તુપ્રભવં ન યત્રાપજયોજયઃ ।
ન યત્ર વાક્યકથનં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૫॥

ન યત્રાત્મવિચારાઙ્ગં ન યત્ર શ્રવણાકુલમ્ ।
ન યત્ર ચ મહાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૬॥

ન યત્ર હિ સજાતીયં વિજાતીયં ન યત્ર હિ ।
ન યત્ર સ્વગતં ભેદં તન્મયો ભવ સર્વદા ॥ ૨૯.૨૭॥

ન યત્ર નરકો ઘોરો ન યત્ર સ્વર્ગસમ્પદઃ ।
ન યત્ર બ્રહ્મલોકો વા તન્મયો ભવ સર્વદા ॥ ૨૯.૨૮॥

ન યત્ર વિષ્ણુસાયુજ્યં યત્ર કૈલાસપર્વતઃ ।
બ્રહ્માણ્ડમણ્ડલં યત્ર તન્મયો ભવ સર્વદા ॥ ૨૯.૨૯॥

ન યત્ર ભૂષણં યત્ર દૂષણં વા ન વિદ્યતે ।
ન યત્ર સમતા દોષં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૦॥

ન યત્ર મનસા ભાવો ન યત્ર સવિકલ્પનમ્ ।
ન યત્રાનુભવં દુઃખં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૧॥

યત્ર પાપભયં નાસ્તિ પઞ્ચપાપાદપિ ક્વચિત્ ।
ન યત્ર સઙ્ગદોષં વા તન્મયો ભવ સર્વદા ॥ ૨૯.૩૨॥

યત્ર તાપત્રયં નાસ્તિ યત્ર જીવત્રયં ક્વચિત્ ।
યત્ર વિશ્વવિકલ્પાખ્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૩॥

ન યત્ર બોધમુત્પન્નં ન યત્ર જગતાં ભ્રમઃ ।
ન યત્ર કરણાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૪॥

ન યત્ર હિ મનો રાજ્યં યત્રૈવ પરમં સુખમ્ ।
યત્ર વૈ શાશ્વતં સ્થાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૫॥

યત્ર વૈ કારણં શાન્તં યત્રૈવ સકલં સુખમ્ ।
યદ્ગત્વા ન નિવર્તન્તે તન્મયો ભવ સર્વદા ॥ ૨૯.૩૬॥

યજ્જ્ઞાત્વા મુચ્યતે સર્વં યજ્જ્ઞાત્વાઽન્યન્ન વિદ્યતે ।
યજ્જ્ઞાત્વા નાન્યવિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૭॥

યત્રૈવ દોષં નોત્પન્નં યત્રૈવ સ્થાનનિશ્ચલઃ ।
યત્રૈવ જીવસઙ્ઘાતઃ તન્મયો ભવ સર્વદા ॥ ૨૯.૩૮॥

યત્રૈવ નિત્યતૃપ્તાત્મા યત્રૈવાનન્દનિશ્ચલમ્ ।

યત્રૈવ નિશ્ચલં શાન્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૩૯॥

યત્રૈવ સર્વસૌખ્યં વા યત્રૈવ સન્નિરૂપણમ્ ।
યત્રૈવ નિશ્ચયાકારં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૦॥

ન યત્રાહં ન યત્ર ત્વં ન યત્ર ત્વં સ્વયં સ્વયમ્ ।
યત્રૈવ નિશ્ચયં શાન્તં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૧॥

યત્રૈવ મોદતે નિત્યં યત્રૈવ સુખમેધતે ।
યત્ર દુઃખભયન્નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૨॥

યત્રૈવ ચિન્મયાકારં યત્રૈવાનન્દસાગરઃ ।
યત્રૈવ પરમં સાક્ષાત્તન્મયો ભવ સર્વદા ॥ ૨૯.૪૩॥

યત્રૈવ સ્વયમેવાત્ર સ્વયમેવ તદેવ હિ ।
સ્વસ્વાત્મનોક્તભેદોઽસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૪॥

યત્રૈવ પરમાનન્દં સ્વયમેવ સુખં પરમ્ ।
યત્રૈવાભેદકલનં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૫॥

ન યત્ર ચાણુમાત્રં વા ન યત્ર મનસો મલમ્ ।
ન યત્ર ચ દદામ્યેવ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૬॥

યત્ર ચિત્તં મૃતં દેહં મનો મરણમાત્મનઃ ।
યત્ર સ્મૃતિર્લયં યાતિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૭॥

યત્રૈવાહં મૃતો નૂનં યત્ર કામો લયં ગતઃ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૪૮॥

યત્ર દેવાસ્ત્રયો લીનં યત્ર દેહાદયો મૃતાઃ ।
ન યત્ર વ્યવહારોઽસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૪૯॥

યત્ર મગ્નો નિરાયાસો યત્ર મગ્નો ન પશ્યતિ ।
યત્ર મગ્નો ન જન્માદિસ્તન્મયો ભવ સર્વદા ॥ ૨૯.૫૦॥

યત્ર મગ્નો ન ચાભાતિ યત્ર જાગ્રન્ન વિદ્યતે ।
યત્રૈવ મોહમરણં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૧॥

યત્રૈવ કાલમરણં યત્ર યોગો લયં ગતઃ ।
યત્ર સત્સઙ્ગતિર્નષ્ટા તન્મયો ભવ સર્વદા ॥ ૨૯.૫૨॥

(additional shloka)

—

યત્ર વિદ્યાતિમરણં યત્ર વિશ્વં લયં ગતમ્ ।
યત્ર ભ્રાન્તિ નિવૃત્તત્વં તન્મયો ભવ સર્વદા ॥

યત્ર પ્રાણદયો નષ્ટા યત્ર દેહાસ્રયો મૃતાઃ ।
યત્ર માનાવમાનં ન તન્મયો ભવ સર્વદા ॥

—

યત્રૈવ બ્રહ્મણો રૂપં યત્રૈવાનન્દમાત્રકમ્ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૩॥

યત્ર વિશ્વં ક્વચિન્નાસ્તિ યત્ર નાસ્તિ તતો જગત્ ।
યત્રાન્તઃકરણં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૪॥

યત્રૈવ સુખમાત્રં ચ યત્રૈવાનન્દમાત્રકમ્ ।
યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૫॥

યત્ર સન્માત્રચૈતન્યં યત્ર ચિન્માત્રમાત્રકમ્ ।
યત્રાનન્દમયં ભાતિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૬॥

યત્ર સાક્ષાત્પરં બ્રહ્મ યત્ર સાક્ષાત્સ્વયં પરમ્ ।
યત્ર શાન્તં પરં લક્ષ્યં તન્મયો ભવ સર્વદા ॥ ૨૯.૫૭॥

યત્ર સાક્ષાદખણ્ડાર્થં યત્ર સાક્ષાત્પરાયણમ્ ।
યત્ર નાશાદિકં નાસ્તિ તન્મયો ભવ સર્વદા ॥ ૨૯.૫૮॥

યત્ર સાક્ષાત્સ્વયં માત્રં યત્ર સાક્ષાત્સ્વયં જયમ્ ।
યત્ર સાક્ષાન્મહાનાત્મા તન્મયો ભવ સર્વદા ॥ ૨૯.૫૯॥

યત્ર સાક્ષાત્પરં તત્ત્વં યત્ર સાક્ષાત્સ્વયં મહત્ ।
યત્ર સાક્ષાત્તુ વિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૦॥

યત્ર સાક્ષાદ્ગુણાતીતં યત્ર સાક્ષાદ્ધિ નિર્મલમ્ ।
યત્ર સાક્ષાત્સદાશુદ્ધં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૧॥

યત્ર સાક્ષાન્મહાનાત્મા યત્ર સાક્ષાત્સુખાત્સુખમ્ ।
યત્રૈવ જ્ઞાનવિજ્ઞાનં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૨॥

યત્રૈવ હિ સ્વયં જ્યોતિર્યત્રૈવ સ્વયમદ્વયમ્ ।

યત્રૈવ પરમાનન્દં તન્મયો ભવ સર્વદા ॥ ૨૯.૬૩॥

એવં તન્મયભાવોક્તં એવં નિત્યશનિત્યશઃ ।
બ્રહ્માહં સચ્ચિદાનન્દં અખણ્ડોઽહં સદા સુખમ્ ॥ ૨૯.૬૪॥

વિજ્ઞાનં બ્રહ્મમાત્રોઽહં સ શાન્તં પરમોઽસ્મ્યહમ્ ।
ચિદહં ચિત્તહીનોઽહં નાહં સોઽહં ભવામ્યહમ્ ॥ ૨૯.૬૫॥

તદહં ચિદહં સોઽહં નિર્મલોઽહમહં પરમ્ ।
પરોઽહં પરમોઽહં વૈ સર્વં ત્યજ્ય સુખીભવ ॥ ૨૯.૬૬॥

ઇદં સર્વં ચિત્તશેષં શુદ્ધત્વકમલીકૃતમ્ ।
(ઇદં સર્વં ચિત્તશેષં શુદ્ધત્વં ચ મલત્વકમ્ ।)
એવં સર્વં પરિત્યજ્ય વિસ્મૃત્વા શુદ્ધકાષ્ઠવત્ ॥ ૨૯.૬૭॥

પ્રેતવદ્દેહં સન્ત્યજ્ય કાષ્ઠવલ્લોષ્ઠવત્સદા ।
સ્મરણં ચ પરિત્યજ્ય બ્રહ્મમાત્રપરો ભવ ॥ ૨૯.૬૮॥

એતત્પ્રકરણં યસ્તુ શ◌ૃણોતિ સકૃદસ્તિ વા ।
મહાપાતકયુક્તોઽપિ સર્વં ત્યક્ત્વા પરં ગતઃ ॥ ૨૯.૬૯॥

અઙ્ગાવબદ્ધાભિરુપાસનાભિર્વદન્તિ વેદાઃ કિલ ત્વામસઙ્ગમ્ ।
સમસ્તહૃત્કોશવિશેષસઙ્ગં ભૂમાનમાત્માનમખણ્ડરૂપમ્ ॥ ૨૯.૭૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
તન્મયભાવોપદેશપ્રકરણં નામ એકોનત્રિંશોઽધ્યાયઃ ॥

## ૩૦. બ્રહ્મૈકરૂપત્વનિરૂપણપ્રકરણં નામ ત્રિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે પરં બ્રહ્મમાત્રં જગત્સન્ત્યાગપૂર્વકમ્ ।
સકૃચ્છ્રવણમાત્રેણ બ્રહ્મભાવં પરં લભેત્ ॥ ૩૦.૧॥

બ્રહ્મ બ્રહ્મપરં માત્રં નિર્ગુણં નિત્યનિર્મલમ્ ।
શાશ્વતં સમમત્યન્તં બ્રહ્મણોઽન્યન્ન વિદ્યતે ॥ ૩૦.૨॥

અહં સત્યઃ પરાનન્દઃ શુદ્ધો નિત્યો નિરઞ્જનઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૩॥

અખણ્ડૈકરસૈવાસ્મિ પરિપૂર્ણોઽસ્મિ સર્વદા ।

બ્રહ્મૈવ સર્વં નાન્યોઽસ્તિ સર્વં બ્રહ્મ ન સંશયઃ ॥ ૩૦.૪॥

સર્વદા કેવલાત્માહં સર્વં બ્રહ્મેતિ નિત્યશઃ ।
આનન્દરૂપમેવાહં નાન્યત્કિઞ્ચિન્ન શાશ્વતમ્ ॥ ૩૦.૫॥

શુદ્ધાનન્દસ્વરૂપોઽહં શુદ્ધવિજ્ઞાનમાત્મનઃ ।
એકાકારસ્વરૂપોઽહં નૈકસત્તાવિવર્જિતઃ ॥ ૩૦.૬॥

અન્તરજ્ઞાનશુદ્ધોઽહમહમેવ પરાયણમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૭॥

અનેકતત્ત્વહીનોઽહં એકત્વં ચ ન વિદ્યતે ।
(અહમેકત્ત્વહીનોઽહં એકત્વં ચ ન વિદ્યતે ।)
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૮॥

સર્વપ્રકારરૂપોઽસ્મિ સર્વં ઇત્યપિ વર્જિતઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૯॥

નિર્મલજ્ઞાનરૂપોઽહમહમેવ ન વિદ્યતે ।
શુદ્ધબ્રહ્મસ્વરૂપોઽહં વિશુદ્ધપદવર્જિતઃ ॥ ૩૦.૧૦॥

નિત્યાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દમહં સદા ।
સૂક્ષ્માત્સૂક્ષ્મતરોઽહં વૈ સૂક્ષ્મ ઇત્યાદિવર્જિતઃ ॥ ૩૦.૧૧॥

અખણ્ડાનન્દમાત્રોઽહં અખણ્ડાનન્દવિગ્રહઃ ।
સદાઽમૃતસ્વરૂપોઽહં સદા કૈવલ્યવિગ્રહઃ ॥ ૩૦.૧૨॥

બ્રહ્માનન્દમિદં સર્વં નાસ્તિ નાસ્તિ કદાચન ।
જીવત્વધર્મહીનોઽહમીશ્વરત્વવિવર્જિતઃ ॥ ૩૦.૧૩॥

વેદશાસ્ત્રસ્વરૂપોઽહં શાસ્ત્રસ્મરણકારણમ્ ।
જગત્કારણકાર્યં ચ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૩૦.૧૪॥

વાચ્યવાચકભેદં ચ સ્થૂલસૂક્ષ્મશરીરકમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્તાદ્યપ્રાજ્ઞતૈજસવિશ્વકાઃ ॥ ૩૦.૧૫॥

સર્વશાસ્ત્રસ્વરૂપોઽહં સર્વાનન્દમહં સદા ।
અતીતનામરૂપાર્થ અતીતઃ સર્વકલ્પનાત્ ॥ ૩૦.૧૬॥

દ્વૈતાદ્વૈતં સુખં દુઃખં લાભાલાભૌ જયાજયૌ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૧૭॥

સાત્ત્વિકં રાજસં ભેદં સંશયં હૃદયં ફલમ્ ।
દૃગ્દૃષ્ટં સર્વદ્રષ્ટા ચ ભૂતભૌતિકદૈવતમ્ ॥ ૩૦.૧૮॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
તુર્યરૂપમહં સાક્ષાજ્જ્ઞાનરૂપમહં સદા ॥ ૩૦.૧૯॥

અજ્ઞાનં ચૈવ નાસ્ત્યેવ તત્કાર્યં કુત્ર વિદ્યતે ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૦॥

ચિત્તવૃત્તિવિલાસં ચ બુદ્ધીનામપિ નાસ્તિ હિ ।
દેહસઙ્કલ્પહીનોઽહં બુદ્ધિસઙ્કલ્પકલ્પના ॥ ૩૦.૨૧॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
બુદ્ધિનિશ્ચયરૂપોઽહં નિશ્ચયં ચ ગલત્યહો ॥ ૩૦.૨૨॥

અહઙ્કારં બહુવિધં દેહોઽહમિતિ ભાવનમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૩॥

બ્રહ્માહમપિ કાણોઽહં બધિરોઽહં પરોઽસ્મ્યહમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૪॥

દેહોઽહમિતિ તાદાત્મ્યં દેહસ્ય પરમાત્મનઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૫॥

સર્વોઽહમિતિ તાદાત્મ્યં સર્વસ્ય પરમાત્મનઃ ।
ઇતિ ભાવય યત્નેન બ્રહ્મૈવાહમિતિ પ્રભો (સ્થિતમ્) ॥ ૩૦.૨૬॥

દૃઢનિશ્ચયમેવેદં સત્યં સત્યમહં પરમ્ ।
દૃઢનિશ્ચયમેવાત્ર સદ્ગુરોર્વાક્યનિશ્ચયમ્ ॥ ૩૦.૨૭॥

દૃઢનિશ્ચયસામ્રાજ્યે તિષ્ઠ તિષ્ઠ સદા પરઃ ।
અહમેવ પરં બ્રહ્મ આત્માનન્દપ્રકાશકઃ ॥ ૩૦.૨૮॥

શિવપૂજા શિવશ્ચાહં વિષ્ણુર્વિષ્ણુપ્રપૂજનમ્ ।
યદ્યત્સંવેદ્યતે કિઞ્ચિત્યદ્યન્નિશ્ચીયતે ક્વચિત્ ॥ ૩૦.૨૯॥

તદેવ ત્વં ત્વમેવાહં ઇત્યેવં નાસ્તિ કિઞ્ચન ।
ઇદં ચિત્તમિદં દૃશ્યં ઇત્યેવમિતિ નાસ્તિ હિ ॥ ૩૦.૩૦॥

સદસદ્ભાવશેષોઽપિ તત્તદ્ભેદં ન વિદ્યતે ।

સુખરૂપમિદં સર્વં સુખરૂપમિદં ન ચ ॥ ૩૦.૩૧॥

લક્ષભેદં સકૃદ્ભેદં સર્વભેદં ન વિદ્યતે ।
બ્રહ્માનન્દો ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૩૨॥

બ્રહ્મભેદં તુર્યભેદં જીવભેદમભેદકમ્ ।
ઇદમેવ હિ નોત્પન્નં સર્વદા નાસ્તિ કિઞ્ચન ॥ ૩૦.૩૩॥

સ દેવમિતિ નિર્દેશો નાસ્તિ નાસ્ત્યેવ સર્વદા ।
અસ્તિ ચેત્કિલ વક્તવ્યં નાસ્તિ ચેત્કથમુચ્યતે ॥ ૩૦.૩૪॥

પરં વિશેષમેવેતિ નાસ્તિ કિઞ્ચિત્સદા મયિ ।
ચઞ્ચલં મનશ્ચૈવ નાસ્તિ નાસ્તિ ન સંશયઃ ॥ ૩૦.૩૫॥

એવમેવ સદાપૂર્ણો નિરીહસ્તિષ્ઠ શાન્તધીઃ ।
સર્વં બ્રહ્માસ્મિ પૂર્ણોઽસ્મિ એવં ચ ન કદાચન ॥ ૩૦.૩૬॥

આનન્દોઽહં વરિષ્ઠોઽહં બ્રહ્માસ્મીત્યપિ નાસ્તિ હિ ।
બ્રહ્માનન્દમહાનન્દમાત્માનન્દમખણ્ડિતમ્ ॥ ૩૦.૩૭॥

ઇદં પરમહન્તા ચ સર્વદા નાસ્તિ કિઞ્ચન ।
ઇદં સર્વમિતિ ખ્યાતિ (ખ્યાતિરનિન્દન્તિતિ) આનન્દં નેતિ નો ભ્રમઃ ॥ ૩૦.૩૮॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
લક્ષ્યલક્ષણભાવં ચ દૃશ્યદર્શનદૃશ્યતા ॥ ૩૦.૩૯॥

અત્યન્તાભાવમેવેતિ સર્વદાનુભવં મહત્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૪૦॥

ગુહ્યં મન્ત્રં ગુણં શાસ્ત્રં સત્યં શ્રોત્રં કલેવરમ્ ।
મરણં જનનં કાર્યં કારણં પાવનં શુભમ્ ॥ ૩૦.૪૧॥

કામક્રોધૌ લોભમોહૌ મદો માત્સર્યમેવ હિ ।
દ્વૈતદોષં ભયં શોકં સર્વં નાસ્ત્યેવ સર્વદા ॥ ૩૦.૪૨॥

ઇદં નાસ્ત્યેવ નાસ્ત્યેવ નાસ્ત્યેવ સકલં સુખમ્ ।
ઇદં બ્રહ્મેતિ મનનમહં બ્રહ્મેતિ ચિન્તનમ્ ॥ ૩૦.૪૩॥

અહં બ્રહ્મેતિ મનનં ત્વં બ્રહ્મત્વવિનાશનમ્ ।
સત્યત્વં બ્રહ્મવિજ્ઞાનં અસત્યત્વં ન બાધ્યતે ॥ ૩૦.૪૪॥

એક એવ પરો હ્યાત્મા એકત્વશ્રાન્તિવર્જિતઃ ।
સર્વં બ્રહ્મ સદા બ્રહ્મ તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૪૫॥

જીવરૂપા જીવભાવા જીવશબ્દત્રયં ન હિ ।
ઈશરૂપં ચેશભાવં ઈશશબ્દં ચ કલ્પિતમ્ ॥ ૩૦.૪૬॥

નાક્ષરં ન ચ સર્વં વા ન પદં વાચ્યવાચકમ્ ।
હૃદયં મન્ત્રતન્ત્રં ચ ચિત્તં બુદ્ધિર્ન કિઞ્ચન ॥ ૩૦.૪૭॥

મૂઢો જ્ઞાની વિવેકી વા શુદ્ધ ઇત્યપિ નાસ્તિ હિ ।
નિશ્ચયં પ્રણવં તારં આત્માયં ગુરુશિષ્યકમ્ ॥ ૩૦.૪૮॥

તૂષ્ણીં તૂષ્ણીં મહાતૂષ્ણીં મૌનં વા મૌનભાવનમ્ ।
પ્રકાશનં પ્રકાશં ચ આત્માનાત્મવિવેચનમ્ ॥ ૩૦.૪૯॥

ધ્યાનયોગં રાજયોગં ભોગમષ્ટાઙ્ગલક્ષણમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૫૦॥

અસ્તિત્વભાષણં ચાપિ નાસ્તિત્વસ્ય ચ ભાષણમ્ ।
પઞ્ચાશદ્વર્ણરૂપોઽહં ચતુઃષષ્ટિકલાત્મકઃ ॥ ૩૦.૫૧॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
બ્રહ્મૈવાહં પ્રસન્નાત્મા બ્રહ્મૈવાહં ચિદવ્યયઃ ॥ ૩૦.૫૨॥

શાસ્ત્રજ્ઞાનવિદૂરોઽહં વેદજ્ઞાનવિદૂરકઃ ।
ઉક્તં સર્વં પરં બ્રહ્મ નાસ્તિ સન્દેહલેશતઃ ॥ ૩૦.૫૩॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
બ્રહ્મૈવાહં પ્રસન્નાત્મા બ્રહ્મૈવાહં ચિદવ્યયઃ ॥ ૩૦.૫૪॥

ઇત્યેવં બ્રહ્મતન્માત્રં તત્ર તુભ્યં પ્રિયં તતઃ ।
યસ્તુ બુદ્ધ્યેત સતતં સર્વં બ્રહ્મ ન સંશયઃ ।
નિત્યં શ‍ૃણ્વન્તિ યે મર્ત્યાસ્તે ચિન્માત્રમયામલાઃ ॥ ૩૦.૫૫॥

સન્દેહસન્દેહકરોઽર્યકાસ્વકૈઃ કરાદિસન્દોહજગદ્વિકારિભિઃ ।
યો વીતમોહં ન કરોતિ દુર્હૃદં વિદેહમુક્તિં શિવદૃક્પ્રભાવતઃ ॥ ૩૦.૫૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
બ્રહ્મૈકરૂપત્વનિરૂપણપ્રકરણં નામ ત્રિંશોઽધ્યાયઃ ॥

## ૩૧. મહાવાક્યાર્થનિરૂપણપ્રકરણં નામ એકત્રિંશોઽધ્યાયઃ

ઋભુઃ -

વક્ષ્યે રહસ્યમત્યન્તં સાક્ષાદ્બ્રહ્મપ્રકાશકમ્ ।
સર્વોપનિષદામર્થં સર્વલોકેષુ દુર્લભમ્ ॥ ૩૧.૧॥

પ્રજ્ઞાનં બ્રહ્મ નિશ્ચિત્ય પદદ્વયસમન્વિતમ્ ।
મહાવાક્યં ચતુર્વાક્યં ઋગ્યજુઃસામસમ્ભવમ્ ॥ ૩૧.૨॥

મમ પ્રજ્ઞૈવ બ્રહ્માહં જ્ઞાનમાત્રમિદં જગત્ ।
જ્ઞાનમેવ જગત્સર્વં જ્ઞાનાદન્યન્ન વિદ્યતે ॥ ૩૧.૩॥

જ્ઞાનસ્યાનન્તરં સર્વં દૃશ્યતે જ્ઞાનરૂપતઃ ।
જ્ઞાનસ્ય બ્રહ્મણશ્ચાપિ મમેવ પૃથઙ્ ન હિ ॥ ૩૧.૪॥

જીવઃ પ્રજ્ઞાનશબ્દસ્ય બ્રહ્મશબ્દસ્ય ચેશ્વરઃ ।
ઐક્યમસ્મીત્યખણ્ડાર્થમખણ્ડૈકરસં તતમ્ ॥ ૩૧.૫॥

અખણ્ડાકારવૃત્તિસ્તુ જીવન્મુક્તિરિતીરિતમ્ ।
અખણ્ડૈકરસં વસ્તુ વિદેહો મુક્તિરુચ્યતે ॥ ૩૧.૬॥

બ્રહ્મૈવાહં ન સંસારી સચ્ચિદાનન્દમસ્મ્યહમ્ ।
નિર્ગુણોઽહં નિરંશોઽહં પરમાનન્દવાનહમ્ ॥ ૩૧.૭॥

નિત્યોઽહં નિર્વિકલ્પોઽહં ચિદહં ચિદહં સદા ।
અખણ્ડાકારવૃત્ત્યાખ્યં ચિત્તં બ્રહ્માત્મના સ્થિતમ્ ॥ ૩૧.૮॥

લવણં તોયમાત્રેણ યથૈકત્વમખણ્ડિતમ્ ।
અખણ્ડૈકરસં વક્ષ્યે વિદેહો મુક્તિલક્ષણમ્ ॥ ૩૧.૯॥

પ્રજ્ઞાપદં પરિત્યજ્ય બ્રહ્મૈવ પદમેવ હિ ।
અહમસ્મિ મહાનસ્મિ સિદ્ધોઽસ્મીતિ પરિત્યજન્ ॥ ૩૧.૧૦॥

સ્મરણં ચ પરિત્યજ્ય ભાવનં ચિત્તકર્તૃકમ્ ।
સર્વમન્તઃ પરિત્યજ્ય સર્વશૂન્યં પરિસ્થિતિઃ (પરાસ્થિતિઃ) ॥ ૩૧.૧૧॥

તૂષ્ણીં સ્થિતિં ચ સન્ત્યજ્ય તતો મૌનવિકલ્પનમ્ ।
યત્તચ્ચિત્તં વિકલ્પાંશં મનસા કલ્પિતં જગત્ ॥ ૩૧.૧૨॥

દેહોઽહમિત્યહઙ્કારં દ્વૈતવૃત્તિરિતીરિતમ્ ।
સર્વં સાક્ષિરહં બ્રહ્મ ઇત્યેવં દૃઢનિશ્ચયમ્ ॥ ૩૧.૧૩॥

સર્વદાઽસંશયં બ્રહ્મ સાક્ષિવૃત્તિરિતીરિતમ્ ।
દ્વૈતવૃત્તિઃ સાક્ષવૃત્તિરખણ્ડાકારવૃત્તિકમ્ ॥ ૩૧.૧૪॥

અખણ્ડૈકરસં ચેતિ લોકે વૃત્તિત્રયં ભવેત્ ।
પ્રથમે નિશ્ચિતે દ્વૈતે દ્વિતીયે સાક્ષિસંશયઃ ॥ ૩૧.૧૫॥

તૃતીયે પદભાગે હિ દૃઢનિશ્ચયમીરિતમ્ ।
એતત્ત્રયાર્થં સંશોધ્ય તં પરિત્યજ્ય નિશ્ચિનુ ॥ ૩૧.૧૬॥

અખણ્ડૈકરસાકારો નિત્યં તન્મયતાં વ્રજ ।
અભ્યાસવાક્યમેતત્તુ સદાઽભ્યાસસ્ય કારણમ્ ॥ ૩૧.૧૭॥

મનનસ્ય પરં વાક્યં યોઽયં ચન્દનવૃક્ષવત્ ।
યુક્તિભિશ્ચિન્તનં વૃત્તં પદત્રયમુદાહૃતમ્ ॥ ૩૧.૧૮॥

અહં પદસ્ય જીવોઽર્થ ઈશો બ્રહ્મપદસ્ય હિ ।
અસ્મીતિ પદભાગસ્ય અખણ્ડાકારવૃત્તિકમ્ ॥ ૩૧.૧૯॥

પદત્રયં પરિત્યજ્ય વિચાર્ય મનસા સહ ।
અખણ્ડૈકરસં પ્રાપ્ય વિદેહો મુક્તિલક્ષણમ્ ॥ ૩૧.૨૦॥

અહં બ્રહ્માસ્મિ ચિન્માત્રં સચ્ચિદાનન્દવિગ્રહઃ ।
અહં બ્રહ્માસ્મિ વાક્યસ્ય શ્રવણાનન્તરં સદા ॥ ૩૧.૨૧॥

અહં બ્રહ્માસ્મિ નિત્યોઽસ્મિ શાન્તોઽસ્મિ પરમોઽસ્મ્યહમ્ ।
નિર્ગુણોઽહં નિરીહોઽહં નિરંશોઽસ્મિ (નિર્યશોઽસ્મિ) સદા સ્મૃતઃ ॥ ૩૧.૨૨॥

આત્મૈવાસ્મિ ન સન્દેહઃ અખણ્ડૈકરસોઽસ્મ્યહમ્ ।
એવં નિરન્તરં તજ્જ્ઞો ભાવયેત્પરમાત્મનિ ॥ ૩૧.૨૩॥

યથા ચાનુભવં વાક્યં તસ્માદનુભવેત્સદા ।
આરમ્ભાચ્ચ દ્વિતીયાત્તુ સ્મૃતમભ્યાસવાક્યતઃ ॥ ૩૧.૨૪॥

તૃતીયાન્તત્ત્વમસ્યેતિ વાક્યસામાન્યનિર્ણયમ્ ।
(તૃતીયન્તત્ત્વમસ્યેતિ વાક્યસામાન્યનિર્ણયમ્ ।)
તત્પદં ત્વમ્પદં ત્વસ્ય પદત્રયમુદાહૃતમ્ ॥ ૩૧.૨૫॥

તત્પદસ્યેશ્વરો હ્યર્થો જીવોઽર્થસ્ત્વમ્પદસ્ય હિ ।
ઐક્યસ્યાપિ પદસ્યાર્થમખણ્ડૈકરસં પદમ્ ॥ ૩૧.૨૬॥

(ઐક્યમ્ભાવપદસ્યાર્થમખણ્ડૈકરસં પદમ્) ॥ ૩૧.૨૬॥

દ્વૈતવૃત્તિઃ સાક્ષવૃત્તિરખણ્ડાકારવૃત્તિકઃ ।
અખણ્ડં સચ્ચિદાનન્દં તત્ત્વમેવાસિ નિશ્ચયઃ ॥ ૩૧.૨૭॥

ત્વં બ્રહ્માસિ ન સન્દેહસ્ત્વમેવાસિ ચિદવ્યયઃ ।
ત્વમેવ સચ્ચિદાનન્દસ્ત્વમેવાખણ્ડનિશ્ચયઃ ॥ ૩૧.૨૮॥

ઇત્યેવમુક્તો ગુરુણા સ એવ પરમો ગુરુઃ ।
અહં બ્રહ્મેતિ નિશ્ચિત્ય સચ્છિષ્યઃ (સચ્છિષ્યં) પરમાત્મવાન્ ॥ ૩૧.૨૯॥

નાન્યો ગુરુર્નાન્યશિષ્યસ્ત્વં બ્રહ્માસિ ગુરુઃ પરઃ ।
સર્વમન્ત્રોપદેષ્ટારો ગુરવઃ સ ગુરુઃ પરઃ ॥ ૩૧.૩૦॥

ત્વં બ્રહ્માસીતિ વક્તારં ગુરુરેવેતિ નિશ્ચિનુ ।
તથા તત્ત્વમસિ બ્રહ્મ ત્વમેવાસિ ચ સદ્ગુરુઃ ॥ ૩૧.૩૧॥

સદ્ગુરોર્વચને યસ્તુ નિશ્ચયં તત્ત્વનિશ્ચયમ્ ।
કરોતિ સતતમ્મુક્તેર્નાત્ર કાર્યા વિચારણા ॥ ૩૧.૩૨॥

મહાવાક્યં ગુરોર્વાક્યં તત્ત્વમસ્યાદિવાક્યકમ્ ।
શૃણોતુ (શૃણોતિ) શ્રવણં ચિત્તં નાન્યચ્શ્રવણમુચ્યતે ॥ ૩૧.૩૩॥

સર્વવેદાન્તવાક્યાનામદ્વૈતે બ્રહ્મણિ સ્થિતિઃ ।
ઇત્યેવં ચ ગુરોર્વક્ત્રાચ્છ્રુતં બ્રહ્મેતિ તચ્છ્રવઃ ॥ ૩૧.૩૪॥

ગુરોર્નાન્યો મન્ત્રવાદી એક એવ હિ સદ્ગુરુઃ ।
ત્વં બ્રહ્માસીતિ યેનોક્તં એષ એવ હિ સદ્ગુરુઃ ॥ ૩૧.૩૫॥

વેદાન્તશ્રવણં ચૈતન્નાન્યચ્છ્રવણમીરિતમ્ ।
યુક્તિભિશ્ચિન્તનં ચૈવ મનનં પરિકથ્યતે ॥ ૩૧.૩૬॥

એવં ચન્દનવૃક્ષોઽપિ શ્રુતોઽપિ પરિશોધ્યતે ।
ત્વં બ્રહ્માસીતિ ચોક્તોઽપિ સંશયં પરિપશ્યતિ ॥ ૩૧.૩૭॥

સંશોધ્ય નિશ્ચિનોત્યેવમાત્માનં પરિશોધ્યતે ।
યુક્તિર્નામ વદામ્યત્ર દેહોનાહં વિનાશતઃ ॥ ૩૧.૩૮॥

સ્થૂલદેહં સૂક્ષ્મદેહં સ્થૂલસૂક્ષ્મં ચ કારણમ્ ।
ત્રયં ચતુર્થે નાસ્તીતિ સર્વં ચિન્માત્રમેવ હિ ॥ ૩૧.૩૯॥

એતત્સર્વં જડત્વાચ્ચ દૃશ્યત્વાદ્ઘટવન્નહિ ।
અહં ચૈતન્યમેવાત્ર દૃગ્રૂપત્વાલ્લયં ન હિ ॥ ૩૧.૪૦॥

સત્યં જ્ઞાનમનન્તં યદાત્મનઃ સહજા ગુણાઃ ।
અન્તતં જડદુઃખાદિ જગતઃ પ્રથિતો ગુણઃ ॥ ૩૧.૪૧॥

તસ્માદહં બ્રહ્મ એવ ઇદં સર્વમસત્યકમ્ ।
એવં ચ મનનં નિત્યં કરોતિ બ્રહ્મવિત્તમઃ ॥ ૩૧.૪૨॥

વક્ષ્યે નિદિધ્યાસનં ચ ઉભયત્યાગલક્ષણમ્ ।
ત્વં બ્રહ્માસીતિ શ્રવણં મનનં ચાહમેવ હિ ॥ ૩૧.૪૩॥

એતત્ત્યાગં નિદિધ્યાસં સજાતીયત્વભાવનમ્ ।
વિજાતીયપરિત્યાગં સ્વગતત્વવિભાવનમ્ ॥ ૩૧.૪૪॥

સર્વત્યાગં પરિત્યજ્ય તુરીયત્વં ચ વર્જનમ્ ।
બ્રહ્મચિન્માત્રસારત્વં સાક્ષાત્કારં પ્રચક્ષતે ॥ ૩૧.૪૫॥

ઉપદેશે મહાવાક્યમસ્તિત્વમિતિ નિર્ણયઃ ।
તથૈવાનુભવં વાક્યમહં બ્રહ્માસ્મિ નિર્ણયઃ ॥ ૩૧.૪૬॥

પ્રજ્ઞાનં બ્રહ્મવાક્યોત્થમભ્યાસાર્થમિતીરિતમ્ ।
અયમાત્મેતિ વાક્યોત્થદર્શનં વાક્યમીરિતમ્ ॥ ૩૧.૪૭॥

અયમેકપદં ચૈક આત્મેતિ બ્રહ્મ ચ ત્રયમ્ ।
અયમ્પદસ્ય જીવોઽર્થ આત્મનો ઈશ્વરઃ પરઃ ॥ ૩૧.૪૮॥

તથા બ્રહ્મપદસ્યાર્થ અખણ્ડાકારવૃત્તિકમ્ ।
અખણ્ડૈકરસં સર્વં પદત્રયલયં ગતમ્ ॥ ૩૧.૪૯॥

અખણ્ડૈકરસો હ્યાત્મા નિત્યશુદ્ધવિમુક્તકઃ ।
તદેવ સર્વમુદ્ભૂતં ભવિષ્યતિ ન સંશયઃ ॥ ૩૧.૫૦॥

અખણ્ડૈકરસો દેવ અયમેકમુદીરિતમ્ ।
આત્મેતિ પદમેકસ્ય બ્રહ્મેતિ પદમેકકમ્ ॥ ૩૧.૫૧॥

અયં પદસ્ય જીવોઽર્થ આત્મેતીશ્વર ઈરિતઃ ।
અસ્યાર્થોઽસ્મીત્યખણ્ડાર્થમખણ્ડૈકરસં પદમ્ ॥ ૩૧.૫૨॥

દ્વૈતવૃત્તિઃ સાક્ષિવૃત્તિરખણ્ડાકારવૃત્તિકમ્ ।
અખણ્ડૈકરસં પશ્ચાત્સોઽહમસ્મીતિ ભાવય ॥ ૩૧.૫૩॥

ઇત્યેવં ચ ચતુર્વાક્યતાત્પર્યાર્થં સમીરિતમ્ ।
ઉપાધિસહિતં વાક્યં કેવલં લક્ષ્યમીરિતમ્ ॥ ૩૧.૫૪॥

કિઞ્ચિજ્જ્ઞત્વાદિ જીવસ્ય સર્વજ્ઞત્વાદિ ચેશ્વરઃ ।
જીવોઽપરો સચૈતન્યમીશ્વરોઽહં પરોક્ષકઃ ॥ ૩૧.૫૫॥

(જીવાપરોક્ષચૈતન્યમીશ્વરોઽહં પરોક્ષકઃ) ॥ ૩૧.૫૫॥

સર્વશૂન્યમિતિ ત્યાજ્યં બ્રહ્માસ્મીતિ વિનિશ્ચયઃ ।
અહં બ્રહ્મ ન સન્દેહઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૩૧.૫૬॥

અહમૈક્યં પરં ગત્વા સ્વસ્વભાવો ભવોત્તમ ।
એતત્સર્વં મહામિથ્યા નાસ્તિ નાસ્તિ ન સંશયઃ ॥ ૩૧.૫૭॥

સર્વં નાસ્તિ ન સન્દેહઃ સર્વં બ્રહ્મ ન સંશયઃ ।
એકાકારમખણ્ડાર્થં તદેવાહં ન સંશયઃ ।
બ્રહ્મેદં વિતતાકારં તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૧.૫૮॥

સૂતઃ -
ભવોદ્ભવમુખોદ્ભવં ભવહરાદ્યહૃદ્યં ભુવિ
પ્રકૃષ્ટરસભાવતઃ પ્રથિતબોધબુદ્ધં ભવ ।
ભજન્તિ ભસિતાઙ્ગકા ભરિતમોદભારાદરા
ભુજઙ્ગવરભૂષણં ભુવનમધ્યવૃન્દાવનમ્ ॥ ૩૧.૫૯॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
મહાવાક્યાર્થનિરૂપણપ્રકરણં નામ એકત્રિંશોઽધ્યાયઃ ॥

## ૩૨. સર્વમિથ્યાત્વનિરૂપણપ્રકરણં નામ દ્વાત્રિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે પુનરસત્ત્યાગં બ્રહ્મનિશ્ચયમેવ ચ ।
યસ્ય શ્રવણમાત્રેણ સદ્યો મુક્તો ભવેન્નરઃ ॥ ૩૨.૧॥

ચિત્તસત્તા મનઃસત્તા બ્રહ્મસત્તાઽન્યથા સ્થિતા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨॥

દેહસત્તા લિઙ્ગસત્તા ભાવસત્તાઽક્ષરા સ્થિતા ।

સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩॥

દૃશ્યં ચ દર્શનં દૃષ્ટા (દ્રષ્ટા) કર્તા કારયિતા ક્રિયા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૪॥

એકં દ્વિત્વં પૃથગ્ભાવં અસ્તિ નાસ્તીતિ નિર્ણયઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૫॥

શાસ્ત્રભેદં વેદભેદં મુક્તીનાં ભેદભાવનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૬॥

જાતિભેદં વર્ણભેદં શુદ્ધાશુદ્ધવિનિર્ણયઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૭॥

અખણ્ડાકારવૃત્તિશ્ચ અખણ્ડૈકરસં પરમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૮॥

પરાપરવિકલ્પશ્ચ પુણ્યપાપવિકલ્પનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૯॥

કલ્પનાકલ્પનાદ્વૈતં મનોકલ્પનભાવનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૦॥

સિદ્ધં સાધ્યં સાધનં ચ નાશનં (શાસનં) બ્રહ્મભાવનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૧॥

આત્મજ્ઞાનં મનોધર્મં મનોઽભાવે કુતો ભવેત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૨॥

અજ્ઞાનં ચ મનોધર્મસ્તદભાવે ચ તત્કુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૩॥

શમો દમો મનોધર્મસ્તદભાવે ચ તત્કુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૪॥

બન્ધમોક્ષૌ મનોધર્મૌ તદભાવે કુતો ભવેત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૫॥

સર્વં મિથ્યા જગન્મિથ્યા દેહો મિથ્યા જડત્વતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૬॥

બ્રહ્મલોકઃ સદા મિથ્યા બુદ્ધિરૂપં તદેવ હિ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૭॥

વિષ્ણુલોકઃ સદા મિથ્યા શિવમેવ હિ સર્વદા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૮॥

રુદ્રલોકઃ સદા મિથ્યા અહઙ્કારસ્વરૂપતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૯॥

ચન્દ્રલોકઃ સદા મિથ્યા મનોરૂપવિકલ્પનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૦॥

દિશો લોકઃ સદા મિથ્યા શ્રોત્રશબ્દસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૧॥

સૂર્યલોકઃ સદા મિથ્યા નેત્રરૂપસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૨॥

વરુણસ્ય સદા લોકો જિહ્વારસસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૩॥

ત્વચો લોકઃ સદા મિથ્યા વાયોઃ સ્પર્શસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૪॥

અશ્વિનોર્ઘ્રાણલોકશ્ચ ગન્ધદ્વૈતસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૫॥

અગ્નેર્લોકઃ સદા મિથ્યા વાગેવ વચનેન તત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૬॥

ઇન્દ્રલોકઃ સદા મિથ્યા પાણિપાદેન સંયુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૭॥

ઉપેન્દ્રસ્ય મહર્લોકો ગમનેન પદં યુતમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૮॥

મૃત્યુરેવ સદા નાસ્તિ પાયુરેવ વિસર્ગકમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૯॥

પ્રજાપતેર્મહર્લોકો ગુહ્યમાનન્દસંયુતમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩૦॥

સર્વં મિથ્યા ન સન્દેહઃ સર્વમાત્મેતિ નિશ્ચિતમ્ ।
તિતિક્ષોશ્ચ સમાધાનં શ્રદ્ધા ચાચાર્યભાષણે ॥ ૩૨.૩૧॥

મુમુક્ષુત્વં ચ મોક્ષશ્ચ મોક્ષાર્થે મમ જીવને ।
ચતુઃસાધનસમ્પન્નઃ સોઽધિકારીતિ નિશ્ચયઃ ॥ ૩૨.૩૨॥

જીવબ્રહ્મૈક્યસદ્ભાવં વિયદ્બ્રહ્મેતિ નિશ્ચયઃ ।
વેદાન્તબ્રહ્મણો બોધ્યં બોધકં બન્ધમુચ્યતે ॥ ૩૨.૩૩॥

સર્વજ્ઞાનનિર્વૃત્તિશ્ચેદાનન્દાવાપ્તિકં ફલમ્ ।
ઇત્યેવમાદિભિઃ શબ્દૈઃ પ્રોક્તં સર્વમસત્સદા ॥ ૩૨.૩૪॥

સર્વશબ્દાર્થરૂપં ચ નિશ્ચયં ભાવનં તથા ।
બ્રહ્મમાત્રં પરં સત્યમન્યત્સર્વમસત્સદા ॥ ૩૨.૩૫॥

અનેકશબ્દશ્રવણમનેકાર્થવિચારણમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩૬॥

નાનુધ્યાયાદ્બ્રહ્મશબ્દાન્ ઇત્યુક્ત્વા હ મહાનસૌ ।
બ્રહ્મોપદેશકાલે તુ સર્વં ચોક્તં ન સંશયઃ ॥ ૩૨.૩૭॥

બ્રહ્મૈવાહમિદં દ્વૈતં ચિત્તસત્તાવિભાવનમ્ ।
ચિન્માત્રોઽહમિદં દ્વૈતં જીવબ્રહ્મેતિ ભાવનમ્ ॥ ૩૨.૩૮॥

અહં ચિન્માત્રમન્ત્રં વા કાર્યકારણચિન્તનમ્ ।
અક્ષયાનન્દવિજ્ઞાનમખણ્ડૈકરસાદ્વયમ્ ॥ ૩૨.૩૯॥

પરં બ્રહ્મ ઇદં બ્રહ્મ શાન્તં બ્રહ્મ સ્વયં જગત્ ।
અન્તરિન્દ્રિયવિજ્ઞાનં બાહ્યેન્દ્રિયનિરોધનમ્ ॥ ૩૨.૪૦॥

સર્વોપદેશકાલં ચ સામ્યં શેષં મહોદયમ્ ।
ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ॥ ૩૨.૪૧॥

કારણં કાર્યભેદં ચ શાસ્ત્રમાર્ગૈકકલ્પનમ્ ।
અહં બ્રહ્મ ઇદં બ્રહ્મ સર્વં બ્રહ્મેતિ શબ્દતઃ ॥ ૩૨.૪૨॥

સત્યરૂપં ક્વચિન્નાસ્તિ સત્યં નામ કદા નહિ ।
સંશયં ચ વિપર્યાસં સઙ્કલ્પઃ કારણં ભ્રમઃ ॥ ૩૨.૪૩॥

આત્મનોઽન્યત્ક્વચિન્નાસ્તિ સર્વં મિથ્યા ન સંશયઃ ।

મહતાં હ્યધતે મન્ત્રી મેધાશુદ્ધિશુભાશુભમ્ ॥ ૩૨.૪૪॥

(મહત્વં દધતે મન્ત્રી મેધાશુદ્ધિં શુભાશુભમ્) ॥ ૩૨.૪૪॥

દેશભેદં વસ્તુભેદં ન ચ ચૈતન્યભેદકમ્ ।
આત્મનોઽન્યત્પૃથગ્ભાવમાત્મનોઽન્યન્નિરૂપણમ્ ॥ ૩૨.૪૫॥

આત્મનોઽન્યન્નામરૂપમાત્મનોઽન્યચ્છુભાશુભમ્ ।
આત્મનોઽન્યદ્વસ્તુસત્તા આત્મનોઽન્યજ્જગત્ત્રયમ્ ॥ ૩૨.૪૬॥

આત્મનોઽન્યત્સુઃખં દુઃખમાત્મનોઽન્યદ્વિચિન્તનમ્ ।
આત્મનોઽન્યત્પ્રપઞ્ચં વા આત્મનોઽન્યજ્જયાજયૌ ॥ ૩૨.૪૭॥

આત્મનોઽન્યદ્દેવપૂજા આત્મનોઽન્યચ્છિવાર્ચનમ્ ।
આત્મનોઽન્યન્મહાધ્યાનમાત્મનોઽન્યત્કલાક્રમમ્ ॥ ૩૨.૪૮॥

સર્વં મિથ્યા ન સન્દેહો બ્રહ્મ સર્વં ન સંશયઃ ।
સર્વમુક્તં ભગવતા નિદિધ્યાસસ્તુ (નિજાધ્યાસસ્તુ) સર્વદા ॥ ૩૨.૪૯॥

સકૃચ્છ્રવણમાત્રેણ હૃદયગ્રન્થિરન્તિમમ્ ।
કર્મનાશં ચ મૂઢાનાં મહતાં મુક્તિરેવ હિ ॥ ૩૨.૫૦॥

અનેકકોટિજનનપાતકં ભસ્મસાદ્ભવેત્ ।
સત્યં સત્યં પુનઃ સત્યં સત્યં સર્વં વિનશ્યતિ ।
સદ્યો મુક્તિર્ન સન્દેહો નાસ્તિ મઙ્ગલમઙ્ગલમ્ ॥ ૩૨.૫૧॥

ક્વ ભેદભાવદર્શનં ન ચૈવ શોકમોહહૃ-
ત્પ્રપશ્યતાં શ્રુતે શિખાવિશેષમૈક્યભાવનાત્ ।
યતો ભવેજ્જગાદ તં મહેશ યેન જીવિતં
યદન્તરાઽવિશત્સદા યથોર્ણનાભતન્તુવત્ ॥ ૩૨.૫૨॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સર્વમિથ્યાત્વનિરૂપણપ્રકરણં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥

## ૩૩. સચ્ચિદાનન્દરૂપતાપ્રકરણં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે પરં બ્રહ્મમાત્રમનુત્પન્નમિદં જગત્ ।
સત્પદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩.૧॥

આત્મૈવાહં પરં બ્રહ્મ નાન્યત્ સંસારદૃષ્ટયઃ ।
સત્પદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩.૨ ॥

સત્પદાનન્દમાત્રોઽહં ચિત્પદાનન્દવિગ્રહમ્ ।
અહમેવાહમેવૈકમહમેવ પરાત્પરઃ ॥ ૩૩.૩ ॥

સચ્ચિદાનદમેવૈકમહં બ્રહ્મૈવ કેવલમ્ ।
અહમસ્મિ સદા ભામિ એવં રૂપં કુતોઽપ્યસત્ ॥ ૩૩.૪ ॥

ત્વમિત્યેવં પરં બ્રહ્મ ચિન્મયાનન્દરૂપવાન્ ।
ચિદાકારં ચિદાકાશં ચિદેવ પરમં સુખમ્ ॥ ૩૩.૫ ॥

આત્મૈવાહમસન્નાહં કૂટસ્થોઽહં ગુરુઃ પરઃ ।
કાલં નાસ્તિ જગન્નાસ્તિ કલ્મષત્વાનુભાવનમ્ ॥ ૩૩.૬ ॥

અહમેવ પરં બ્રહ્મ અહમેવ સદાશિવઃ ।
શુદ્ધચૈતન્ય એવાહં શુદ્ધસત્વાનુભાવનઃ ॥ ૩૩.૭ ॥

અદ્વયાનન્દમાત્રોઽહમવ્યયોઽહં મહાનહમ્ ।
સર્વં બ્રહ્મૈવ સતતં સર્વં બ્રહ્મૈવ નિર્મલઃ ॥ ૩૩.૮ ॥

સર્વં બ્રહ્મૈવ નાન્યોઽસ્તિ સર્વં બ્રહ્મૈવ ચેતનઃ ।
સર્વપ્રકાશરૂપોઽહં સર્વપ્રિયમનો હ્યહમ્ ॥ ૩૩.૯ ॥

એકાન્તૈકપ્રકાશોઽહં સિદ્ધાસિદ્ધવિવર્જિતઃ ।
સર્વાન્તર્યામિરૂપોઽહં સર્વસાક્ષિત્વલક્ષણમ્ ॥ ૩૩.૧૦ ॥

શમો વિચારસન્તોષરૂપોઽહમિતિ નિશ્ચયઃ ।
પરમાત્મા પરં જ્યોતિઃ પરં પરવિવર્જિતઃ ॥ ૩૩.૧૧ ॥

પરિપૂર્ણસ્વરૂપોઽહં પરમાત્માઽહમચ્યુતઃ ।
સર્વવેદસ્વરૂપોઽહં સર્વશાસ્ત્રસ્ય નિર્ણયઃ ॥ ૩૩.૧૨ ॥

(સર્વદા સત્સ્વરૂપોઽહં સર્વશાસ્ત્રસ્ય નિર્ણયઃ) ॥ ૩૩.૧૨ ॥

લોકાનન્દસ્વરૂપોઽહં મુખ્યાનન્દસ્ય નિર્ણયઃ ।
સર્વં બ્રહ્મૈવ ભૂર્નાસ્તિ સર્વં બ્રહ્મૈવ કારણમ્ ॥ ૩૩.૧૩ ॥

સર્વં બ્રહ્મૈવ નાકાર્યં સર્વં બ્રહ્મ સ્વયં વરઃ ।
નિત્યાક્ષરોઽહં નિત્યોઽહં સર્વકલ્યાણકારકમ્ ॥ ૩૩.૧૪ ॥

સત્યજ્ઞાનપ્રકાશોઽહં મુખ્યવિજ્ઞાનવિગ્રહઃ ।
તુર્યાતુર્યપ્રકાશોઽહં સિદ્ધાસિદ્ધાદિવર્જિતઃ ॥ ૩૩.૧૫॥

સર્વં બ્રહ્મૈવ સતતં સર્વં બ્રહ્મ નિરન્તરમ્ ।
સર્વં બ્રહ્મ ચિદાકાશં નિત્યબ્રહ્મ નિરઞ્જનમ્ ॥ ૩૩.૧૬॥

સર્વં બ્રહ્મ ગુણાતીતં સર્વં બ્રહ્મૈવ કેવલમ્ ।
સર્વં બ્રહ્મૈવ ઇત્યેવં નિશ્ચયં કુરુ સર્વદા ॥ ૩૩.૧૭॥

બ્રહ્મૈવ સર્વમિત્યેવં સર્વદા દૃઢનિશ્ચયઃ ।
સર્વં બ્રહ્મૈવ ઇત્યેવં નિશ્ચયિત્વા સુખી ભવ ॥ ૩૩.૧૮॥

સર્વં બ્રહ્મૈવ સતતં ભાવાભાવૌ ચિદેવ હિ ।
દ્વૈતાદ્વૈતવિવાદોઽયં નાસ્તિ નાસ્તિ ન સંશયઃ ॥ ૩૩.૧૯॥

સર્વવિજ્ઞાનમાત્રોઽહં સર્વં બ્રહ્મેતિ નિશ્ચયઃ ।
ગુહ્યાદ્ગુહ્યતરં સોઽહં ગુણાતીતોઽહમદ્વયઃ ॥ ૩૩.૨૦॥

અન્વયવ્યતિરેકં ચ કાર્યાકાર્યં વિશોધય ।
સચ્ચિદાનન્દરૂપોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩.૨૧॥

બ્રહ્મૈવ સર્વમેવેદં ચિદાકાશમિદં જગત્ ।
બ્રહ્મૈવ પરમાનન્દં આકાશસદૃશં વિભુ ॥ ૩૩.૨૨॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સદા વાચામગોચરમ્ ।
બ્રહ્મૈવ સર્વમેવેદમસ્તિ નાસ્તીતિ કેચન ॥ ૩૩.૨૩॥

આનન્દભાવના કિઞ્ચિત્સદસન્માત્ર એવ હિ ।
બ્રહ્મૈવ સર્વમેવેદં સદા સન્માત્રમેવ હિ ॥ ૩૩.૨૪॥

બ્રહ્મૈવ સર્વમેવદં ચિદ્ઘનાનન્દવિગ્રહમ્ ।
બ્રહ્મૈવ સચ્ચ સત્યં ચ સનાતનમહં મહત્ ॥ ૩૩.૨૫॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ઓતપ્રોતેવ તિષ્ઠતિ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વાકારં સનાતનમ્ ॥ ૩૩.૨૬॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરમાનદમવ્યયમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં માયાતીતં નિરઞ્જનમ્ ॥ ૩૩.૨૭॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સત્તામાત્રં સુખાત્સુખમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં ચિન્માત્રૈકસ્વરૂપકમ્ ॥ ૩૩.૨૮॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વભેદવિવર્જિતમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ નાનાકારમિવ સ્થિતમ્ ॥ ૩૩.૨૯॥

બ્રહ્મૈવ સચ્ચિદાનન્દં કર્તા ચાવસરોઽસ્તિ હિ ।
સચ્ચિદાનદં બ્રહ્મૈવ પરં જ્યોતિઃ સ્વરૂપકમ્ ॥ ૩૩.૩૦॥

બ્રહ્મૈવ સચ્ચિદાનન્દં નિત્યનિશ્ચલમવ્યયમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં વાચાવધિરસાવયમ્ ॥ ૩૩.૩૧॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વયમેવ સ્વયં સદા ।
બ્રહ્મૈવ સચ્ચિદાનન્દં ન કરોતિ ન તિષ્ઠતિ ॥ ૩૩.૩૨॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન ગચ્છતિ ન તિષ્ઠતિ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૩૩.૩૩॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન શુક્લં ન ચ કૃષ્ણકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વાધિષ્ઠાનમવ્યયમ્ ॥ ૩૩.૩૪॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન તૂષ્ણીં ન વિભાષણમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સત્ત્વં નાહં ન કિઞ્ચન ॥ ૩૩.૩૫॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરાત્પરમનુદ્ભવમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં તત્ત્વાતીતં મહોત્સવમ્ ॥ ૩૩.૩૬॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરમાકાશમાતતમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વદા ગુરુરૂપકમ્ ॥ ૩૩.૩૭॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સદા નિર્મલવિગ્રહમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં શુદ્ધચૈતન્યમાતતમ્ ॥ ૩૩.૩૮॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વપ્રકાશાત્મરૂપકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં નિશ્ચયં ચાત્મકારણમ્ ॥ ૩૩.૩૯॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વયમેવ પ્રકાશતે ।
બ્રહ્મૈવ સચ્ચિદાનન્દં નાનાકાર ઇતિ સ્થિતમ્ ॥ ૩૩.૪૦॥

બ્રહ્મૈવ સચ્ચિદાકારં ભ્રાન્તાધિષ્ઠાનરૂપકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વં નાસ્તિ ન મે સ્થિતમ્ ॥ ૩૩.૪૧॥

વાચામગોચરં બ્રહ્મ સચ્ચિદાનદવિગ્રહમ્ ।

સચ્ચિદાનન્દરૂપોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩.૪૨॥

બ્રહ્મૈવેદં સદા સત્યં નિત્યમુક્તં નિરઞ્જનમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ એકમેવ સદા સુખમ્ ॥ ૩૩.૪૩॥

સચ્ચિદાનન્દં બ્રહ્મૈવ પૂર્ણાત્પૂર્ણતરં મહત્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ સર્વવ્યાપકમીશ્વરમ્ ॥ ૩૩.૪૪॥

સચ્ચિદાનન્દં બ્રહ્મૈવ નામરૂપપ્રભાસ્વરમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ અનન્તાનન્દનિર્મલમ્ ॥ ૩૩.૪૫॥

સચ્ચિદાનન્દં બ્રહ્મૈવ પરમાનન્દદાયકમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ સન્માત્રં સદસત્પરમ્ ॥ ૩૩.૪૬॥

સચ્ચિદાનન્દં બ્રહ્મૈવ સર્વેષાં પરમવ્યયમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ મોક્ષરૂપં શુભાશુભમ્ ॥ ૩૩.૪૭॥

સચ્ચિદાનન્દં બ્રહ્મૈવ પરિચ્છિન્નં ન હિ ક્વચિત્ ।
બ્રહ્મૈવ સર્વમેવેદં શુદ્ધબુદ્ધમલેપકમ્ ॥ ૩૩.૪૮॥

સચ્ચિદાનન્દરૂપોઽહમનુત્પન્નમિદં જગત્ ।
એતત્પ્રકરણં સત્યં સદ્યોમુક્તિપ્રદાયકમ્ ॥ ૩૩.૪૯॥

સર્વદુઃખક્ષયકરં સર્વવિજ્ઞાનદાયકમ્ ।
નિત્યાનન્દકરં સત્યં શાન્તિદાન્તિપ્રદાયકમ્ ॥ ૩૩.૫૦॥

યસ્ત્વન્તકાન્તકમહેશ્વરપાદપદ્મ-
    લોલમ્બસપ્રભહૃદા પરિશીલકશ્ચ ।
વૃન્દારવૃન્દવિનતામલદિવ્યપાદો
    ભાવો ભવોદ્ભવકૃપાવશતો ભવેચ્ચ ॥ ૩૩.૫૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    સચ્ચિદાનન્દરૂપતાપ્રકરણં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥

## ૩૪. દૃષ્ટાન્તૈર્બ્રહ્મસાધનપ્રકરણં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

ઋભુઃ -
શ ૃણુષ્વ બ્રહ્મ વિજ્ઞાનમદ્ભુતમ્ત્વતિદુર્લભમ્ ।
એકૈકશ્રવણેનૈવ કૈવલ્યં પરમશ્નુતે ॥ ૩૪.૧॥

સત્યં સત્યં જગન્નાસ્તિ સઙ્કલ્પકલનાદિકમ્ ।
નિત્યાનન્દમયં બ્રહ્મવિજ્ઞાનં સર્વદા સ્વયમ્ ॥ ૩૪.૨॥

આનન્દમવ્યયં શાન્તમેકરૂપમનામયમ્ ।
ચિત્તપ્રપઞ્ચં નૈવાસ્તિ નાસ્તિ કાર્યં ચ તત્ત્વતઃ ॥ ૩૪.૩॥

પ્રપઞ્ચભાવના નાસ્તિ દૃશ્યરૂપં ન કિઞ્ચન ।
અસત્યરૂપં સઙ્કલ્પં તત્કાર્યં ચ જગન્ન હિ ॥ ૩૪.૪॥

સર્વમિત્યેવ નાસ્ત્યેવ કાલમિત્યેવમીશ્વરઃ ।
વન્ધ્યાકુમારે ભીતિશ્ચ તદધીનમિદં જગત્ ॥ ૩૪.૫॥

ગન્ધર્વનગરે શ‍ૃઙ્ગે મદગ્રે દૃશ્યતે જગત્ ।
મૃગતૃષ્ણાજલં પીત્વા તૃપ્તિશ્ચેદસ્ત્વિદં જગત્ ॥ ૩૪.૬॥

નગે શ‍ૃઙ્ગે ન બાણેન નષ્ટે પુરુષમસ્ત્વિદમ્ ।
ગન્ધર્વનગરે સત્યે જગદ્ભવતુ સર્વદા ॥ ૩૪.૭॥

ગગને નીલમાસિન્ધૌ જગત્સત્યં ભવિષ્યતિ ।
શુક્તિકારજતં સત્યં ભૂષણં ચિજ્જગદ્ભવેત્ ॥ ૩૪.૮॥

રજ્જુસર્પેણ નષ્ટશ્ચેન્નરો ભવતિ સંસૃતિઃ ।
જાતિરૂપેણ બાણેન જ્વાલાગ્નૌ નાશિતે સતિ ॥ ૩૪.૯॥

રમ્ભાસ્તમ્ભેન કાષ્ઠેન પાકસિદ્ધિર્જગદ્ભવેત્ ।
નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૩૪.૧૦॥

સદ્યઃ કુમારિકારૂપૈઃ પાકે સિદ્ધે જગદ્ભવેત્ ।
નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૩૪.૧૧॥

મિથ્યાટવ્યાં વાયસાન્નં અસ્તિ ચેજ્જગદુદ્ભવમ્ ।
મૂલારોપણમન્ત્રસ્ય પ્રીતિશ્ચેદ્ભાષણં જગત્ ॥ ૩૪.૧૨॥

માસાત્પૂર્વં મૃતો મર્ત્ય આગતશ્ચેજ્જગદ્ભવેત્ ।
તક્રં ક્ષીરસ્વરૂપં ચેત્કિઞ્ચિત્કિઞ્ચિજ્જગદ્ભવેત્ ॥ ૩૪.૧૩॥

ગોસ્તનાદુદ્ભવં ક્ષીરં પુનરારોહણં જગત્ ।
ભૂરજસ્યાબ્દમુત્પન્નં જગદ્ભવતુ સર્વદા ॥ ૩૪.૧૪॥

કૂર્મરોમ્ણા ગજે બદ્ધે જગદસ્તુ મદોત્કટે ।
મૃણાલતન્તુના મેરુશ્ચલિતશ્ચેજ્જગદ્ભવેત્ ॥ ૩૪.૧૫॥

તરઙ્ગમાલયા સિન્ધુઃ બદ્ધશ્ચેદસ્ત્વિદં જગત્ ।
જ્વાલાગ્નિમણ્ડલે પદ્મં વૃદ્ધં ચેત્તજ્જગદ્ભવેત્ ॥ ૩૪.૧૬॥

મહચ્છૈલેન્દ્રનિલયં સમ્ભવશ્ચેદિદં ભવેત્ ।
નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૩૪.૧૭॥

મીન આગત્ય પદ્માક્ષે સ્થિતશ્ચેદસ્ત્વિદં જગત્ ।
નિગીર્ણશ્ચેદ્ભઙ્ગસૂનુઃ મેરુપુચ્છવદસ્ત્વિદમ્ ॥ ૩૪.૧૮॥

મશકેનાશિતે સિંહે હતે ભવતુ કલ્પનમ્ ।
અણુકોટરવિસ્તીર્ણે ત્રૈલોક્યે ચેજ્જગદ્ભવેત્ ॥ ૩૪.૧૯॥

સ્વપ્ને તિષ્ઠતિ યદ્વસ્તુ જાગરે ચેજ્જગદ્ભવેત્ ।
નદીવેગો નિશ્ચલશ્ચેજ્જગદ્ભવતુ સર્વદા ॥ ૩૪.૨૦॥

જાત્યન્ધૈ રત્નવિષયઃ સુજ્ઞાતશ્ચેજ્જગદ્ભવેત્ ।
ચન્દ્રસૂર્યાદિકં ત્યક્ત્વા રાહુશ્ચેત્ દૃશ્યતે જગત્ ॥ ૩૪.૨૧॥

ભ્રષ્ટબીજેન ઉત્પન્ને વૃદ્ધિશ્ચેચ્ચિત્તસમ્ભવઃ ।
મહાદરિદ્રૈરાઢ્યાનાં સુખે જ્ઞાતે જગદ્ભવેત્ ॥ ૩૪.૨૨॥

દુગ્ધં દુગ્ધગતક્ષીરં પુનરારોહણં પુનઃ ।
કેવલં દર્પણે નાસ્તિ પ્રતિબિમ્બં તદા જગત્ ॥ ૩૪.૨૩॥

યથા શૂન્યગતં વ્યોમ પ્રતિબિમ્બેન વૈ જગત્ ।
અજકુક્ષૌ ગજો નાસ્તિ આત્મકુક્ષૌ જગન્ન હિ ॥ ૩૪.૨૪॥

યથા તાન્ત્રે સમુત્પન્ને તથા બ્રહ્મમયં જગત્ ।
કાર્પાસકેઽગ્નિદગ્ધેન ભસ્મ નાસ્તિ તથા જગત્ ॥ ૩૪.૨૫॥

પરં બ્રહ્મ પરં જ્યોતિઃ પરસ્તાત્પરતઃ પરઃ ।
સર્વદા ભેદકલનં દ્વૈતાદ્વૈતં ન વિદ્યતે ॥ ૩૪.૨૬॥

ચિત્તવૃત્તિર્જગદ્દુઃખં અસ્તિ ચેત્કિલ નાશનમ્ ।
મનઃસઙ્કલ્પકં બન્ધ અસ્તિ ચેદ્બ્રહ્મભાવના ॥ ૩૪.૨૭॥

અવિદ્યા કાર્યદેહાદિ અસ્તિ ચેદ્વૈતભાવનમ્ ।
ચિત્તમેવ મહારોગો વ્યાપ્તશ્ચેદ્બ્રહ્મભેષજમ્ ॥ ૩૪.૨૮॥

અહં શત્રુર્યદિ ભવેદહં બ્રહ્મૈવ ભાવનમ્ ।

દેહોઽહમિતિ દુઃખં ચેદ્બ્રહ્માહમિતિ નિશ્ચિનુ ॥ ૩૪.૨૯॥

સંશયશ્ચ પિશાચશ્ચેદ્બ્રહ્મમાત્રેણ નાશય ।
દ્વૈતભૂતાવિષ્ટરેણ અદ્વૈતં ભસ્મ આશ્રય ॥ ૩૪.૩૦॥

અનાત્મત્વપિશાચશ્ચેદાત્મમન્ત્રેણ બન્ધય ।
નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૩૪.૩૧॥

ચતુઃષષ્ટિકદૃષ્ટાન્તૈરેવં બ્રહ્મૈવ સાધિતમ્ ।
યઃ શ‍ૃણોતિ નરો નિત્યં સ મુક્તો નાત્ર સંશયઃ ॥ ૩૪.૩૨॥

કૃતાર્થ એવ સતતં નાત્ર કાર્યા વિચારણા ॥ ૩૪.૩૩॥

મનોવચોવિદૂરગં ત્વરૂપગન્ધવર્જિતં
હૃદર્ભકોકસન્તતં વિજાનતાં મુદે સદા ।
સદાપ્રકાશદુજ્વલપ્રભાવિકાસસદ્યુતિ
પ્રકાશદં મહેશ્વર ત્વદીયપાદપઙ્કજમ્ ॥ ૩૪.૩૪॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
દૃષ્ટાન્તૈર્બ્રહ્મસાધનપ્રકરણં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥

## ૩૫. બ્રહ્મભાવનોપદેશપ્રકરણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

ઋભુઃ -
નિદાઘ શ‍ૃણુ ગુહ્યં મે સદ્યો મુક્તિપ્રદં નૃણામ્ ।
આત્મૈવ નાન્યદેવેદં પરમાત્માહમક્ષતઃ ॥ ૩૫.૧॥

અહમેવ પરં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ।
અહમસ્મિ મહાનસ્મિ શિવોઽસ્મિ પરમોઽસ્મ્યહમ્ ॥ ૩૫.૨॥

અદૃશ્યં પરમં બ્રહ્મ નાન્યદસ્તિ સ્વભાવતઃ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહં બ્રહ્મૈવ કેવલમ્ ॥ ૩૫.૩॥

શાન્તં બ્રહ્મ પરં ચાસ્મિ સર્વદા નિત્યનિર્મલઃ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહં બ્રહ્મૈવ કેવલમ્ ॥ ૩૫.૪॥

સર્વસઙ્કલ્પમુક્તોઽસ્મિ સર્વસન્તોષવર્જિતઃ ।
કાલકર્મજગદ્દ્વૈતદ્રષ્ટૃદર્શનવિગ્રહઃ ॥ ૩૫.૫॥

આનન્દોઽસ્મિ સદાનન્દકેવલો જગતાં પ્રિયમ્ ।

સમરૂપોઽસ્મિ નિત્યોઽસ્મિ ભૂતભવ્યમજો જયઃ ॥ ૩૫.૬॥

ચિન્માત્રોઽસ્મિ સદા ભુક્તો જીવો બન્ધો ન વિદ્યતે ।
શ્રવણં ષડ્વિધં (દ્વિવિધં) લિઙ્ગં નૈવાસ્તિ જગદીદૃશમ્ ॥ ૩૫.૭॥

ચિત્તસંસારહીનોઽસ્મિ ચિન્માત્રત્વં જગત્સદા ।
ચિત્તમેવ હિતં દેહ અવિચારઃ પરો રિપુઃ ॥ ૩૫.૮॥

અવિચારો જગદ્દુઃખમવિચારો મહદ્ભયમ્ ।
સદ્યોઽસ્મિ સર્વદા તૃપ્તઃ પરિપૂર્ણઃ પરો મહાન્ ॥ ૩૫.૯॥

નિત્યશુદ્ધોઽસ્મિ બુદ્ધોઽસ્મિ ચિદાકાશોઽસ્મિ ચેતનઃ ।
આત્મૈવ નાન્યદેવેદં પરમાત્માઽહમક્ષતઃ ॥ ૩૫.૧૦॥

સર્વદોષવિહીનોઽસ્મિ સર્વત્ર વિતતોઽસ્મ્યહમ્ ।
વાચાતીતસ્વરૂપોઽસ્મિ પરમાત્માઽહમક્ષતઃ ॥ ૩૫.૧૧॥

ચિત્રાતીતં પરં દ્વન્દ્વં સન્તોષઃ સમભાવનમ્ ।
અન્તર્બહિરનાદ્યન્તં સર્વભેદવિનિર્ણયમ્ ॥ ૩૫.૧૨॥

અહઙ્કારં બલં સર્વં કામં ક્રોધં પરિગ્રહમ્ ।
બ્રહ્મેન્દ્રોવિષ્ણુર્વરુણો ભાવાભાવવિનિશ્ચયઃ ॥ ૩૫.૧૩॥

જીવસત્તા જગત્સત્તા માયાસત્તા ન કિઞ્ચન ।
ગુરુશિષ્યાદિભેદં ચ કાર્યાકાર્યવિનિશ્ચયઃ ॥ ૩૫.૧૪॥

ત્વં બ્રહ્માસીતિ વક્તા ચ અહં બ્રહ્માસ્મિ સમ્ભવઃ (સવર્ગઃ) ।
સર્વવેદાન્તવિજ્ઞાનં સર્વામ્નાયવિચારણમ્ ॥ ૩૫.૧૫॥

ઇદં પદાર્થસદ્ભાવમહં રૂપેણ સમ્ભવમ્ ।
વેદવેદાન્તસિદ્ધાન્તજગદ્ભેદં ન વિદ્યતે ॥ ૩૫.૧૬॥

સર્વં બ્રહ્મ ન સન્દેહઃ સર્વમિત્યેવ નાસ્તિ હિ ।
કેવલં બ્રહ્મશાન્તાત્મા અહમેવ નિરન્તરમ્ ॥ ૩૫.૧૭॥

શુભાશુભવિભેદં ચ દોષાદોષં ચ મે ન હિ ।
ચિત્તસત્તા જગત્સત્તા બુદ્ધિવૃત્તિવિજૃમ્ભણમ્ ॥ ૩૫.૧૮॥

બ્રહ્મૈવ સર્વદા નાન્યત્સત્યં સત્યં નિજં પદમ્ ।
આત્માકારમિદં દ્વૈતં મિથ્યૈવ (આત્મૈવ) ન પરઃ પુમાન્ ॥ ૩૫.૧૯॥

સચ્ચિદાનન્દમાત્રોઽહં સર્વં કેવલમવ્યયમ્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ॥ ૩૫.૨૦॥

મનો જગદહં ભેદં ચિત્તવૃત્તિજગદ્ભયમ્ ।
સર્વાનન્દમહાનન્દમાત્માનન્દમનન્તકમ્ ॥ ૩૫.૨૧॥

અત્યન્તસ્વલ્પમલ્પં વા પ્રપઞ્ચં નાસ્તિ કિઞ્ચન ।
પ્રપઞ્ચમિતિ શબ્દો વા સ્મરણં વા ન વિદ્યતે ॥ ૩૫.૨૨॥

અન્તરસ્થપ્રપઞ્ચં વા ક્વચિન્નાસ્તિ ક્વચિદ્બહિઃ ।
યત્કિઞ્ચિદેવં તૂષ્ણીં વા યચ્ચ કિઞ્ચિત્સદા ક્વ વા ॥ ૩૫.૨૩॥

યેન કેન યદા કિઞ્ચિદ્યસ્ય કસ્ય ન કિઞ્ચન ।
શુદ્ધં મલિનરૂપં વા બ્રહ્મવાક્યમબોધકમ્ ॥ ૩૫.૨૪॥

ઈદૃષં તાદૃષં વેતિ ન કિઞ્ચિદ્વક્તુમર્હતિ ।
બ્રહ્મૈવ સર્વં સતતં બ્રહ્મૈવ સકલં મનઃ ॥ ૩૫.૨૫॥

આનન્દં પરમાનદં નિત્યાનન્દં સદાઽદ્વયમ્ ।
સર્વં બ્રહ્મમયં દસત્યં નેહ નાનસ્તિ કિઞ્ચન ।
ચિન્માત્રમેવ સતતં નાસ્તિ નાસ્તિ પરોઽસ્મ્યહમ્ ॥ ૩૫.૨૬॥

પ્રપઞ્ચં સર્વદા નાસ્તિ પ્રપઞ્ચં ચિત્રમેવ ચ ।
ચિત્તમેવ હિ સંસારં નાન્યત્સંસારમેવ હિ ॥ ૩૫.૨૭॥

મન એવ હિ સંસારો દેહોઽહમિતિ રૂપકમ્ ।
સઙ્કલ્પમેવ સંસારં તન્નાશેઽસૌ વિનશ્યતિ ॥ ૩૫.૨૮॥

સઙ્કલ્પમેવ જનનં તન્નાશેઽસૌ વિનશ્યતિ ।
સઙ્કલ્પમેવ દારિદ્યં તન્નાશેઽસૌ વિનશ્યતિ ॥ ૩૫.૨૯॥

સઙ્કલ્પમેવ મનનં તન્નાશેઽસૌ વિનશ્યતિ ।
આત્મૈવ નાન્યદેવેદં પરમાત્માઽહમક્ષતઃ ॥ ૩૫.૩૦॥

નિત્યમાત્મમયં બોધમહમેવ સદા મહાન્ ।
આત્મૈવ નાન્યદેવેદં પરમાત્માઽહમક્ષતઃ ॥ ૩૫.૩૧॥

ઇત્યેવં ભાવયેન્નિત્યં ક્ષિપ્રં મુક્તો ભવિષ્યતિ ।
ત્વમેવ બ્રહ્મરૂપોઽસિ ત્વમેવ બ્રહ્મવિગ્રહઃ ॥ ૩૫.૩૨॥

એવં ચ પરમાનન્દં ધ્યાત્વા ધ્યાત્વા સુખીભવ ।

સુખમાત્રં જગત્સર્વં પ્રિયમાત્રં પ્રપઞ્ચકમ્ ॥ ૩૫.૩૩॥

જડમાત્રમયં લોકં બ્રહ્મમાત્રમયં સદા ।
બ્રહ્મૈવ નાન્યદેવેદં પરમાત્માઽહમવ્યયઃ ॥ ૩૫.૩૪॥

એક એવ સદા એષ એક એવ નિરન્તરમ્ ।
એક એવ પરં બ્રહ્મ એક એવ ચિદવ્યયઃ ॥ ૩૫.૩૫॥

એક એવ ગુણાતીત એક એવ સુખાવહઃ ।
એક એવ મહાનાત્મા એક એવ નિરન્તરમ્ ॥ ૩૫.૩૬॥

એક એવ ચિદાકાર એક એવાત્મનિર્ણયઃ ।
બ્રહ્મૈવ નાન્યદેવેદં પરમાત્માઽહમક્ષતઃ ॥ ૩૫.૩૭॥

પરમાત્માહમન્યન્ન પરમાનન્દમન્દિરમ્ ।
ઇત્યેવં ભાવયન્નિત્યં સદા ચિન્મય એવ હિ ॥ ૩૫.૩૮॥

સૂતઃ -
વિરિઞ્ચિવઞ્ચનાતતપ્રપઞ્ચપઞ્ચબાણભિ-
    ત્સુકાઞ્ચનાદ્રિધારિણં કુલુઞ્ચનાં પતિં ભજે ।
અકિઞ્ચનેઽપિ સિઞ્ચકે જલેન લિઙ્ગમસ્તકે
    વિમુઞ્ચતિ ક્ષણાદઘં ન કિઞ્ચિદત્ર શિષ્યતે ॥ ૩૫.૩૯॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    બ્રહ્મભાવનોપદેશપ્રકરણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥

## ૩૬. બ્રહ્મભાવનોપદેશપ્રકરણં નામ ષટ્ત્રિંશોઽધ્યાયઃ

ઋભુઃ -
શ‍ૃણુ વક્ષ્યામિ વિપ્રેન્દ્ર સર્વં બ્રહ્મૈવ નિર્ણયમ્ ।
યસ્ય શ્રવણમાત્રેણ સદ્યો મુક્તિમવાપ્નુયાત્ ॥ ૩૬.૧॥

ઇદમેવ સદા નાસ્તિ હ્યહમેવ હિ કેવલમ્ ।
આત્મૈવ સર્વદા નાસ્તિ આત્મૈવ સુખલક્ષણમ્ ॥ ૩૬.૨॥

આત્મૈવ પરમં તત્ત્વમાત્મૈવ જગતાં ગણઃ ।
આત્મૈવ ગગનાકારમાત્મૈવ ચ નિરન્તરમ્ ॥ ૩૬.૩॥

આત્મૈવ સત્યં બ્રહ્મૈવ આત્મૈવ ગુરુલક્ષણમ્ ।

આત્મૈવ ચિન્મયં નિત્યમાત્મૈવાક્ષરમવ્યયમ્ ॥ ૩૬.૪॥

આત્મૈવ સિદ્ધરૂપં વા આત્મૈવાત્મા ન સંશયઃ ।
આત્મૈવજગદાકારં આત્મૈવાત્મા સ્વયં સ્વયમ્ ॥ ૩૬.૫॥

આત્મૈવ શાન્તિકલનમાત્મૈવ મનસા વિયત્ ।
આત્મૈવ સર્વં યત્કિઞ્ચિદાત્મૈવ પરમં પદમ્ ॥ ૩૬.૬॥

આત્મૈવ ભુવનાકારમાત્મૈવ પ્રિયમવ્યયમ્ ।
આત્મૈવાન્યન્ન ચ ક્વાપિ આત્મૈવાન્યં મનોમયમ્ ॥ ૩૬.૭॥

આત્મૈવ સર્વવિજ્ઞાનમાત્મૈવ પરમં ધનમ્ ।
આત્મૈવ ભૂતરૂપં વા આત્મૈવ ભ્રમણં મહત્ ॥ ૩૬.૮॥

આત્મૈવ નિત્યશુદ્ધં વા આત્મૈવ ગુરુરાત્મનઃ ।
આત્મૈવ હ્યાત્મનઃ શિષ્ય આત્મૈવ લયમાત્મનિ ॥ ૩૬.૯॥

આત્મૈવ હ્યાત્મનો ધ્યાનમાત્મૈવ ગતિરાત્મનઃ ।
આત્મૈવ હ્યાત્મનો હોમ આત્મૈવ હ્યાત્મનો જપઃ ॥ ૩૬.૧૦॥

આત્મૈવ તૃપ્તિરાત્મૈવ આત્મનોઽન્યન્ન કિઞ્ચન ।
આત્મૈવ હ્યાત્મનો મૂલમાત્મૈવ હ્યાત્મનો વ્રતમ્ ॥ ૩૬.૧૧॥

આત્મજ્ઞાનં વ્રતં નિત્યમાત્મજ્ઞાનં પરં સુખમ્ ।
આત્મજ્ઞાનં પરાનન્દમાત્મજ્ઞાનં પરાયણમ્ ॥ ૩૬.૧૨॥

આત્મજ્ઞાનં પરં બ્રહ્મ આત્મજ્ઞાનં મહાવ્રતમ્ ।
આત્મજ્ઞાનં સ્વયં વેદ્યમાત્મજ્ઞાનં મહાધનમ્ ॥ ૩૬.૧૩॥

આત્મજ્ઞાનં પરં બ્રહ્મ આત્મજ્ઞાનં મહત્સુખમ્ ।
આત્મજ્ઞાનં મહાનાત્મા આત્મજ્ઞાનં જનાસ્પદમ્ ॥ ૩૬.૧૪॥

આત્મજ્ઞાનં મહાતીર્થમાત્મજ્ઞાનં જયપ્રદમ્ ।
આત્મજ્ઞાનં પરં બ્રહ્મ આત્મજ્ઞાનં ચરાચરમ્ ॥ ૩૬.૧૫॥

આત્મજ્ઞાનં પરં શાસ્ત્રમાત્મજ્ઞાનમનૂપમમ્ ।
આત્મજ્ઞાનં પરો યોગ આત્મજ્ઞાનં પરા ગતિઃ ॥ ૩૬.૧૬॥

આત્મજ્ઞાનં પરં બ્રહ્મ ઇત્યેવં દૃઢનિશ્ચયઃ ।
આત્મજ્ઞાનં મનોનાશઃ આત્મજ્ઞાનં પરો ગુરુઃ ॥ ૩૬.૧૭॥

આત્મજ્ઞાનં ચિત્તનાશ આત્મજ્ઞાનં વિમુક્તિદમ્ ।
આત્મજ્ઞાનં ભયનાશમાત્મજ્ઞાનં સુખાવહમ્ ॥ ૩૬.૧૮॥

આત્મજ્ઞાનં મહાતેજ આત્મજ્ઞાનં મહાશુભમ્ ।
આત્મજ્ઞાનં સતાં રૂપમાત્મજ્ઞાનં સતાં પ્રિયમ્ ॥ ૩૬.૧૯॥

આત્મજ્ઞાનં સતાં મોક્ષમાત્મજ્ઞાનં વિવેકજમ્ ।
આત્મજ્ઞાનં પરો ધર્મ આત્મજ્ઞાનં સદા જપઃ ॥ ૩૬.૨૦॥

આત્મજ્ઞાનસ્ય સદૃશમાત્મવિજ્ઞાનમેવ હિ ।
આત્મજ્ઞાનેન સદૃશં ન ભૂતં ન ભવિષ્યતિ ॥ ૩૬.૨૧॥

આત્મજ્ઞાનં પરો મન્ત્ર આત્મજ્ઞાનં પરં તપઃ ।
આત્મજ્ઞાનં હરિઃ સાક્ષાદાત્મજ્ઞાનં શિવઃ પરઃ ॥ ૩૬.૨૨॥

આત્મજ્ઞાનં પરો ધાતા આત્મજ્ઞાનં સ્વસમ્મતમ્ ।
આત્મજ્ઞાનં સ્વયં પુણ્યમાત્મજ્ઞાનં વિશોધનમ્ ॥ ૩૬.૨૩॥

આત્મજ્ઞાનં મહાતીર્થમાત્મજ્ઞાનં શમાદિકમ્ ।
આત્મજ્ઞાનં પ્રિયં મન્ત્રમાત્મજ્ઞાનં સ્વપાવનમ્ ॥ ૩૬.૨૪॥

આત્મજ્ઞાનં ચ કિન્નામ અહં બ્રહ્મેતિ નિશ્ચયઃ ।
અહં બ્રહ્મેતિ વિશ્વાસમાત્મજ્ઞાનં મહોદયમ્ ॥ ૩૬.૨૫॥

અહં બ્રહ્માસ્મિ નિત્યોઽસ્મિ સિદ્ધોઽસ્મીતિ વિભાવનમ્ ।
આનન્દોઽહં પરાનન્દં શુદ્ધોઽહં નિત્યમવ્યયઃ ॥ ૩૬.૨૬॥

ચિદાકાશસ્વરૂપોઽસ્મિ સચ્ચિદાનન્દશાશ્વતમ્ ।
નિર્વિકારોઽસ્મિ શાન્તોઽહં સર્વતોઽહં નિરન્તરઃ ॥ ૩૬.૨૭॥

સર્વદા સુખરૂપોઽસ્મિ સર્વદોષવિવર્જિતઃ ।
સર્વસઙ્કલ્પહીનોઽસ્મિ સર્વદા સ્વયમસ્મ્યહમ્ ॥ ૩૬.૨૮॥

સર્વં બ્રહ્મેત્યનુભવં વિના શબ્દં પઠ સ્વયમ્ ।
કોટ્યશ્વમેધે યત્પુણ્યં ક્ષણાત્તત્પુણ્યમાપ્નુયાત્ ॥ ૩૬.૨૯॥

અહં બ્રહ્મેતિ નિશ્ચિત્ય મેરુદાનફલં લભેત્ ।
બ્રહ્મૈવાહમિતિ સ્થિત્વા સર્વભૂદાનમપ્યણુ ॥ ૩૬.૩૦॥

બ્રહ્મૈવાહમિતિ સ્થિત્વા કોટિશો દાનમપ્યણુ ।
બ્રહ્મૈવાહમિતિ સ્થિત્વા સર્વાનન્દં તૃણાયતે ॥ ૩૬.૩૧॥

બ્રહ્મૈવ સર્વમિત્યેવ ભાવિતસ્ય ફલં સ્વયમ્ ।
બ્રહ્મૈવાહમિતિ સ્થિત્વા સમાનં બ્રહ્મ એવ હિ ॥ ૩૬.૩૨॥

તસ્માત્સ્વપ્નેઽપિ નિત્યં ચ સર્વં સન્ત્યજ્ય યત્નતઃ ।
અહં બ્રહ્મ ન સન્દેહઃ અહમેવ ગતિર્મમ ॥ ૩૬.૩૩॥

અહમેવ સદા નાન્યદહમેવ સદા ગુરુઃ ।
અહમેવ પરો હ્યાત્મા અહમેવ ન ચાપરઃ ॥ ૩૬.૩૪॥

અહમેવ ગુરુઃ શિષ્યઃ અહમેવેતિ નિશ્ચિનુ ।
ઇદમિત્યેવ નિર્દેશઃ પરિચ્છિન્નો જગન્ન હિ ॥ ૩૬.૩૫॥

ન ભૂમિર્ન જલં નાગ્નિર્ન વાયુર્ન ચ ખં તથા ।
સર્વં ચૈતન્યમાત્રત્વાન્નાન્યત્કિઞ્ચન વિદ્યતે ॥ ૩૬.૩૬॥

ઇત્યેવં ભાવનપરો દેહમુક્તઃ સુખીભવ ।
અહમાત્મા ઇદં નાસ્તિ સર્વં ચૈતન્યમાત્રતઃ ॥ ૩૬.૩૭॥

અહમેવ હિ પૂર્ણાત્મા આનન્દાબ્ધિરનામયઃ ।
ઇદમેવ સદા નાસ્તિ જડત્વાદસદેવ હિ ।
ઇદં બ્રહ્મ સદા બ્રહ્મ ઇદં નેતિ સુખી ભવ ॥ ૩૬.૩૮॥

તુરઙ્ગશૃઙ્ગસન્નિભા શ્રુતિપરોચના ....
વિશેષકામવાસના વિનિશ્ચિતાત્મવૃત્તિતઃ ।
નરાઃ સુરા મુનીશ્વરા અસઙ્ગસઙ્ગમપ્યુમાપતિં ....
ન તે ભજન્તિ કેચન .... ॥ ૩૬.૩૯॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
બ્રહ્મભાવનોપદેશપ્રકરણં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥

## ૩૭. સર્વસિદ્ધાન્તપ્રકરણં નામ સપ્તત્રિંશોઽધ્યાયઃ

ઋભુઃ -
નિદાઘ શૃણુ વક્ષ્યામિ રહસ્યં પરમદ્ભુતમ્ ।
શ્લોકૈકશ્રવણેનૈવ સદ્યો મોક્ષમવાપ્નુયાત્ ॥ ૩૭.૧॥

ઇદં દૃષ્ટં પરં બ્રહ્મ દૃશ્યવદ્ભાતિ ચિત્તતઃ ।

સર્વં ચૈતન્યમાત્રત્વાન્નાન્યત્કિઞ્ચન વિદ્યતે ॥ ૩૭.૨॥

ઇદમેવ હિ નાસ્ત્યેવ અયમિત્યપિ નાસ્તિ હિ ।
એક એવાપ્યણુર્વાપિ નાસ્તિ નાસ્તિ ન સંશયઃ ॥ ૩૭.૩॥

વ્યવહારમિદં ક્વાપિ વાર્તામાત્રમપિ ક્વ વા ।
બન્ધરૂપં બન્ધવાર્તા બન્ધકાર્યં પરં ચ વા ॥ ૩૭.૪॥

સન્માત્રકાર્યં સન્માત્રમહં બ્રહ્મેતિ નિશ્ચયમ્ ।
દુઃખં સુખં વા બોધો વા સાધકં સાધ્યનિર્ણયઃ ॥ ૩૭.૫॥

આત્મેતિ પરમાત્મેતિ જીવાત્મેતિ પૃથઙ્ ન હિ ।
દેહોઽહમિતિ મૂર્તોઽહં જ્ઞાનવિજ્ઞાનવાનહમ્ ॥ ૩૭.૬॥

કાર્યકારણરૂપોઽહમન્તઃકરણકાર્યકમ્ ।
એકમિત્યેકમાત્રં વા નાસ્તિ નાસ્તીતિ ભાવય ॥ ૩૭.૭॥

સર્વસઙ્કલ્પમાત્રેતિ સર્વં બ્રહ્મેતિ વા જગત્ ।
તત્ત્વજ્ઞાનં પરં બ્રહ્મ ઓઙ્કારાર્થં સુખં જપમ્ ॥ ૩૭.૮॥

દ્વૈતાદ્વૈતં સદાદ્વૈતં તથા માનાવમાનકમ્ ।
સર્વં ચૈતન્યમાત્રત્વાન્નાન્યત્કિઞ્ચન વિદ્યતે ॥ ૩૭.૯॥

આત્માનન્દમહં બ્રહ્મ પ્રજ્ઞાનં બ્રહ્મ એવ હિ ।
ઇદં રૂપમહં રૂપં પ્રિયાપ્રિયવિચારણમ્ ॥ ૩૭.૧૦॥

યદ્યત્સમ્ભાવ્યતે લોકે યદ્યત્સાધનકલ્પનમ્ ।
યદ્યન્તરહિતં બ્રહ્મભાવનં ચિત્તનિર્મિતમ્ ॥ ૩૭.૧૧॥

સ્થૂલદેહોઽહમેવાત્ર સૂક્ષ્મદેહોઽહમેવ હિ ।
બુદ્ધેર્ભેદં મનોભેદં અહઙ્કારં જડં ચ તત્ ॥ ૩૭.૧૨॥

સર્વં ચૈતન્યમાત્રત્વાન્નાન્યત્કિઞ્ચન વિદ્યતે ।
શ્રવણં મનનં ચૈવ સાક્ષાત્કારવિચારણમ્ ॥ ૩૭.૧૩॥

આત્મૈવાહં પરં ચૈવ નાહં મોહમયં સ્વયમ્ ।
બ્રહ્મૈવ સર્વમેવેદં બ્રહ્મૈવ પરમં પદમ્ ॥ ૩૭.૧૪॥

બ્રહ્મૈવ કારણં કાર્યં બ્રહ્મૈવ જગતાં જયઃ ।
બ્રહ્મૈવ સર્વ ચૈતન્યં બ્રહ્મૈવ મનસાયતે ॥ ૩૭.૧૫॥

બ્રહ્મૈવ જીવવદ્ભાતિ બ્રહ્મૈવ ચ હરીયતે ।
બ્રહ્મૈવ શિવવદ્ભાતિ બ્રહ્મૈવ પ્રિયમાત્મનઃ ॥ ૩૭.૧૬॥

બ્રહ્મૈવ શાન્તિવદ્ભાતિ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
નાહં ન ચાયં નૈવાન્યન્નોત્પન્નં ન પરાત્પરમ્ ॥ ૩૭.૧૭॥

ન ચેદં ન ચ શાસ્ત્રાર્થં ન મીમાંસં ન ચોદ્ભવમ્ ।
ન લક્ષણં ન વેદાદિ નાપિ ચિત્તં ન મે મનઃ ॥ ૩૭.૧૮॥

ન મે નાયં નેદમિદં ન બુદ્ધિનિશ્ચયં સદા ।
કદાચિદપિ નાસ્ત્યેવ સત્યં સત્યં ન કિઞ્ચન ॥ ૩૭.૧૯॥

નૈકમાત્રં ન ચાયં વા નાન્તરં ન બહિર્ન હિ ।
ઈષણમાત્રં ચ ન દ્વૈતં ન જન્યં ન ચ દૃશ્યકમ્ ॥ ૩૭.૨૦॥

ન ભાવનં ન સ્મરણં ન વિસ્મરણમણ્વપિ ।
ન કાલદેશકલનં ન સઙ્કલ્પં ન વેદનમ્ ॥ ૩૭.૨૧॥

ન વિજ્ઞાનં ન દેહાન્યં ન વેદોઽહં ન સંસૃતિઃ ।
ન મે દુઃખં ન મે મોક્ષં ન ગતિર્ન ચ દુર્ગતિઃ ॥ ૩૭.૨૨॥

નાત્મા નાહં ન જીવોઽહં ન કૂટસ્થો ન જાયતે ।
ન દેહોઽહં ન ચ શ્રોત્રં ન ત્વગિન્દ્રિયદેવતા ॥ ૩૭.૨૩॥

સર્વં ચૈતન્યમાત્રત્વાત્સર્વં નાસ્ત્યેવ સર્વદા ।
અખણ્ડાકારરૂપત્વાત્સર્વં નાસ્ત્યેવ સર્વદા ॥ ૩૭.૨૪॥

હુઙ્કારસ્યાવકાશો વા હુઙ્કારજનનં ચ વા ।
નાસ્ત્યેવ નાસ્તિ નાસ્ત્યેવ નાસ્તિ નાસ્તિ કદાચન ॥ ૩૭.૨૫॥

અન્યત્પદાર્થમલ્પં વા અન્યદેવાન્યભાષણમ્ ।
આત્મનોઽન્યદસત્યં વા સત્યં વા ભ્રાન્તિરેવ ચ ॥ ૩૭.૨૬॥

નાસ્ત્યેવ નાસ્તિ નાસ્ત્યેવ નાસ્તિ શબ્દોઽપિ નાસ્તિ હિ ।
સર્વં ચૈતન્યમાત્રત્વાત્સર્વં નાસ્ત્યેવ સર્વદા ॥ ૩૭.૨૭॥

સર્વં બ્રહ્મ ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ।
વાક્યં ચ વાચકં સર્વં વક્તા ચ ત્રિપુટીદ્વયમ્ ॥ ૩૭.૨૮॥

જ્ઞાતા જ્ઞાનં જ્ઞેયભેદં માતૃમાનમિતિ પ્રિયમ્ ।
યદ્યચ્છાસ્ત્રેષુ નિર્ણીતં યદ્યદ્વેદેષુ નિશ્ચિતમ્ ॥ ૩૭.૨૯॥

પરાપરમતીતં ચ અતીતોઽહમવેદનમ્ ।
ગુરુર્ગુરૂપદેશશ્ચ ગુરું વક્ષ્યે ન કસ્યચિત્ ॥ ૩૭.૩૦॥

ગુરુરૂપા ગુરુશ્રદ્ધા સદા નાસ્તિ ગુરુઃ સ્વયમ્ ।
આત્મૈવ ગુરુરાત્મૈવ અન્યાભાવાન્ન સંશયઃ ॥ ૩૭.૩૧॥

આત્મનઃ શુભમાત્મૈવ અન્યાભાવાન્ન સંશયઃ ।
આત્મનો મોહમાત્મૈવ આત્મનોઽસ્તિ ન કિઞ્ચન ॥ ૩૭.૩૨॥

આત્મનઃ સુખમાત્મૈવ અન્યન્નાસ્તિ ન સંશયઃ ।
આત્મન્યેવાત્મનઃ શક્તિઃ આત્મન્યેવાત્મનઃ પ્રિયમ્ ॥ ૩૭.૩૩॥

આત્મન્યેવાત્મનઃ સ્નાનં આત્મન્યેવાત્મનો રતિઃ ।
આત્મજ્ઞાનં પરં શ્રેયઃ આત્મજ્ઞાનં સુદુર્લભમ્ ॥ ૩૭.૩૪॥

આત્મજ્ઞાનં પરં બ્રહ્મ આત્મજ્ઞાનં સુખાત્સુખમ્ ।
આત્મજ્ઞાનાત્પરં નાસ્તિ આત્મજ્ઞાનાત્સ્મૃતિર્ન હિ ॥ ૩૭.૩૫॥

બ્રહ્મૈવાત્મા ન સન્દેહ આત્મૈવ બ્રહ્મણઃ સ્વયમ્ ।
સ્વયમેવ હિ સર્વત્ર સ્વયમેવ હિ ચિન્મયઃ ॥ ૩૭.૩૬॥

સ્વયમેવ ચિદાકાશઃ સ્વયમેવ નિરન્તરમ્ ।
સ્વયમેવ ચ નાનાત્મા સ્વયમેવ ચ નાપરઃ ॥ ૩૭.૩૭॥

સ્વયમેવ ગુણાતીતઃ સ્વયમેવ મહત્સુખમ્ ।
સ્વયમેવ હિ શાન્તાત્મા સ્વયમેવ હિ નિષ્કલઃ ॥ ૩૭.૩૮॥

સ્વયમેવ ચિદાનન્દઃ સ્વયમેવ મહત્પ્રભુઃ ।
સ્વયમેવ સદા સાક્ષી સ્વયમેવ સદાશિવઃ ॥ ૩૭.૩૯॥

સ્વયમેવ હરિઃ સાક્ષાત્સ્વયમેવ પ્રજાપતિઃ ।
સ્વયમેવ પરં બ્રહ્મ બ્રહ્મ એવ સ્વયં સદા ॥ ૩૭.૪૦॥

સર્વં બ્રહ્મ સ્વયં બ્રહ્મ સ્વયં બ્રહ્મ ન સંશયઃ ।
દૃઢનિશ્ચયમેવ ત્વં સર્વથા કુરુ સર્વદા ॥ ૩૭.૪૧॥

વિચારયન્સ્વયં બ્રહ્મ બ્રહ્મમાત્રં સ્વયં ભવેત્ ।
એતદેવ પરં બ્રહ્મ અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૪૨॥

એષ એવ પરો મોક્ષ અહં બ્રહ્મેતિ નિશ્ચયઃ ।

એષ એવ કૃતાર્થો હિ એષ એવ સુખં સદા ॥ ૩૭.૪૩॥

એતદેવ સદા જ્ઞાનં સ્વયં બ્રહ્મ સ્વયં મહત્ ।
અહં બ્રહ્મ એતદેવ સદા જ્ઞાનં સ્વયં મહત્ ॥ ૩૭.૪૪॥

અહં બ્રહ્મ એતદેવ સ્વભાવં સતતં નિજમ્ ।
અહં બ્રહ્મ એતદેવ સદાનિત્યં સ્વયં સદા ॥ ૩૭.૪૫॥

અહં બ્રહ્મ એતદેવ બન્ધનાશં ન સંશયઃ ।
અહં બ્રહ્મ એતદેવ સર્વસિદ્ધાન્તનિશ્ચયમ્ ॥ ૩૭.૪૬॥

એષ વેદાન્તસિદ્ધાન્ત અહં બ્રહ્મ ન સંશયઃ ।
સર્વોપનિષદામર્થઃ સર્વાનન્દમયં જગત્ ॥ ૩૭.૪૭॥

મહાવાક્યસ્ય સિદ્ધાન્ત અહં બ્રહ્મેતિ નિશ્ચયઃ ।
સાક્ષાચ્છિવસ્ય સિદ્ધાન્ત અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૪૮॥

નારાયણસ્ય સિદ્ધાન્ત અહં બ્રહ્મેતિ નિશ્ચયઃ ।
ચતુર્મુખસ્ય સિદ્ધાન્ત અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૪૯॥

ઋષીણાં હૃદયં હ્યેતદ્દેવાનામુપદેશકમ્ ।
સર્વદેશિકસિદ્ધાન્ત અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૫૦॥

યચ્ચ યાવચ્ચ ભૂતાનાં મહોપદેશ એવ તત્ ।
અહં બ્રહ્મ મહામોક્ષં પરં ચૈતદહં સ્વયમ્ ॥ ૩૭.૫૧॥

અહં ચાનુભવં ચૈતન્મહાગોપ્યમિદં ચ તત્ ।
અહં બ્રહ્મ એતદેવ સદાજ્ઞાનં સ્વયં મહત્ ॥ ૩૭.૫૨॥

મહાપ્રકાશમેવૈતત્ અહં બ્રહ્મ એવ તત્ ।
એતદેવ મહામન્ત્રં એતદેવ મહાજપઃ ॥ ૩૭.૫૩॥

એતદેવ મહાસ્નાનમહં બ્રહ્મેતિ નિશ્ચયઃ ।
એતદેવ મહાતીર્થમહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૫૪॥

એતદેવ મહાગઙ્ગા અહં બ્રહ્મેતિ નિશ્ચયઃ ।
એષ એવ પરો ધર્મ અહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૫૫॥

એષ એવ મહાકાશ અહં બ્રહ્મેતિ નિશ્ચયઃ ।
એતદેવ હિ વિજ્ઞાનમહં બ્રહ્માસ્મિ કેવલમ્ ।
સર્વસિદ્ધાન્તમેવૈતદહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૭.૫૬॥

સવ્યાસવ્યતયાધ્યવજ્ઞહૃદયા ગોપોદહાર્યઃ સ્રિયઃ
 પશ્યન્ત્યમ્બુજમિત્રમણ્ડલગતં શમ્ભું હિરણ્યાત્મકમ્ ।
સર્વત્ર પ્રસૃતૈઃ કરૈર્જગદિદં પુષ્ણાતિ મુષ્ણન્ધનૈઃ
 ધૃષ્ટં ચૌષધિજાલમમ્બુનિકરૈર્વિશ્વોત્થધૂતં હરઃ ॥ ૩૭.૫૭॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
 સર્વસિદ્ધાન્તપ્રકરણં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥

## ૩૮. પ્રપઞ્ચશૂન્યત્વપ્રકરણં નામ અષ્ટત્રિંશોઽધ્યાયઃ

ઋભુઃ -
વક્ષ્યે અત્યદ્ભુતં વ્યક્તં સચ્ચિદાનન્દમાત્રકમ્ ।
સર્વપ્રપઞ્ચશૂન્યત્વં સર્વમાત્મેતિ નિશ્ચિતમ્ ॥ ૩૮.૧॥

આત્મરૂપપ્રપઞ્ચં વા આત્મરૂપપ્રપઞ્ચકમ્ ।
સર્વપ્રપઞ્ચં નાસ્ત્યેવ સર્વં બ્રહ્મેતિ નિશ્ચિતમ્ ॥ ૩૮.૨॥

નિત્યાનુભવમાનન્દં નિત્યં બ્રહ્મેતિ ભાવનમ્ ।
ચિત્તરૂપપ્રપઞ્ચં વા ચિત્તસંસારમેવ વા ॥ ૩૮.૩॥

ઇદમસ્તીતિ સત્તાત્વમહમસ્તીતિ વા જગત્ ।
સ્વાન્તઃકરણદોષં વા સ્વાન્તઃકરણકાર્યકમ્ ॥ ૩૮.૪॥

સ્વસ્ય જીવભ્રમઃ કશ્ચિત્સ્વસ્ય નાશં સ્વજન્મના ।
ઈશ્વરઃ કશ્ચિદસ્તીતિ જીવોઽહમિતિ વૈ જગત્ ॥ ૩૮.૫॥

માયાસત્તા મહાસત્તા ચિત્તસત્તા જગન્મયમ્ ।
યદ્યચ્ચ દૃશ્યતે શાસ્ત્રૈર્યદ્યદ્વેદે ચ ભાષણમ્ ॥ ૩૮.૬॥

એકમિત્યેવ નિર્દેશં દ્વૈતમિત્યેવ ભાષણમ્ ।
શિવોઽસ્મીતિ ભ્રમઃ કશ્ચિદ્બ્રહ્માસ્મીતિ વિભ્રમઃ ॥ ૩૮.૭॥

વિષ્ણુરસ્મીતિ વિભ્રાન્તિર્જગદસ્તી(સ્મી)તિ વિભ્રમઃ ।
ઈષદસ્તીતિ વા ભેદં ઈષદસ્તીતિ વા દ્વયમ્ ॥ ૩૮.૮॥

સર્વમસ્તીતિ નાસ્તીતિ સર્વં બ્રહ્મેતિ નિશ્ચયમ્ ।
આત્મધ્યાનપ્રપઞ્ચં વા સ્મરણાદિપ્રપઞ્ચકમ્ ॥ ૩૮.૯॥

દુઃખરૂપપ્રપઞ્ચં વા સુખરૂપપ્રપઞ્ચકમ્ ।
દ્વૈતાદ્વૈતપ્રપઞ્ચં વા સત્યાસત્યપ્રપઞ્ચકમ્ ॥ ૩૮.૧૦॥

જાગ્રત્પ્રપઞ્ચમેવાપિ તથા સ્વપ્નપ્રપઞ્ચકમ્ ।
સુપ્તિજ્ઞાનપ્રપઞ્ચં વા તુર્યજ્ઞાનપ્રપઞ્ચકમ્ ॥ ૩૮.૧૧॥

વેદજ્ઞાનપ્રપઞ્ચં વા શાસ્ત્રજ્ઞાનપ્રપઞ્ચકમ્ ।
પાપબુદ્ધિપ્રપઞ્ચં વા પુણ્યભેદપ્રપઞ્ચકમ્ ॥ ૩૮.૧૨॥

જ્ઞાનરૂપપ્રપઞ્ચં વા નિર્ગુણજ્ઞાનપ્રપઞ્ચકમ્ ।
ગુણાગુણપ્રપઞ્ચં વા દોષાદોષવિનિર્ણયમ્ ॥ ૩૮.૧૩॥

સત્યાસત્યવિચારં વા ચરાચરવિચારણમ્ ।
એક આત્મેતિ સદ્ભાવં મુખ્ય આત્મેતિ ભાવનમ્ ॥ ૩૮.૧૪॥

સર્વપ્રપઞ્ચં નાસ્ત્યેવ સર્વં બ્રહ્મેતિ નિશ્ચયમ્ ।
દ્વૈતાદ્વૈતસમુદ્ભેદં નાસ્તિ નાસ્તીતિ ભાષણમ્ ॥ ૩૮.૧૫॥

અસત્યં જગદેવેતિ સત્યં બ્રહ્મેતિ નિશ્ચયમ્ ।
કાર્યરૂપં કારણં ચ નાનાભેદવિજૃમ્ભણમ્ ॥ ૩૮.૧૬॥

સર્વમન્ત્રપ્રદાતારં દૂરે દૂરં તથા તથા ।
સર્વં સન્ત્યજ્ય સતતં સ્વાત્મન્યેવ સ્થિરો ભવ ॥ ૩૮.૧૭॥

મૌનભાવં મૌનકાર્યં મૌનયોગં મનઃપ્રિયમ્ ।
પઞ્ચાક્ષરોપદેષ્ટારં તથા ચાષ્ટાક્ષરપ્રદમ્ ॥ ૩૮.૧૮॥

યદ્યદ્યદ્વેદશાસ્ત્રં યદ્યદ્ભેદો ગુરોઽપિ વા ।
સર્વદા સર્વલોકેષુ સર્વસઙ્કલ્પકલ્પનમ્ ॥ ૩૮.૧૯॥

સર્વવાક્યપ્રપઞ્ચં હિ સર્વચિત્તપ્રપઞ્ચકમ્ ।
સર્વાકારવિકલ્પં ચ સર્વકારણકલ્પનમ્ ॥ ૩૮.૨૦॥

સર્વદોષપ્રપઞ્ચં ચ સુખદુઃખપ્રપઞ્ચકમ્ ।
સહાદેયમુપાદેયં ગ્રાહ્યં ત્યાજ્યં ચ ભાષણમ્ ॥ ૩૮.૨૧॥

વિચાર્ય જન્મમરણં વાસનાચિત્તરૂપકમ્ ।
કામક્રોધં લોભમોહં સર્વડમ્ભં ચ હુઙ્કૃતિમ્ ॥ ૩૮.૨૨॥

ત્રૈલોક્યસમ્ભવં દ્વૈતં બ્રહ્મેન્દ્રવરુણાદિકમ્ ।
જ્ઞાનેન્દ્રિયં ચ શબ્દાદિ દિગ્વાય્વર્કાદિદૈવતમ્ ॥ ૩૮.૨૩॥

કર્મેન્દ્રિયાદિસદ્ભાવં વિષયં દેવતાગણમ્ ।
અન્તઃકરણવૃત્તિં ચ વિષયં ચાધિદૈવતમ્ ॥ ૩૮.૨૪॥

ચિત્તવૃત્તિં વિભેદં ચ બુદ્ધિવૃત્તિનિરૂપણમ્ ।
માયામાત્રમિદં દ્વૈતં સદસત્તાદિનિર્ણયમ્ ॥ ૩૮.૨૫॥

કિઞ્ચિદ્વૈતં બહુદ્વૈતં જીવદ્વૈતં સદા હ્યસત્ ।
જગદુત્પત્તિમોહં ચ ગુરુશિષ્યત્વનિર્ણયમ્ ॥ ૩૮.૨૬॥

ગોપનમ્તત્પદાર્થસ્ય ત્વમ્પદાર્થસ્ય મેલનમ્ ।
તથા ચાસિપદાર્થસ્ય ઐક્યબુદ્ધ્યાનુભાવનમ્ ॥ ૩૮.૨૭॥

ભેદેષુ ભેદાભેદં ચ નાન્યત્કિઞ્ચિચ્ચ વિદ્યતે ।
એતત્પ્રપઞ્ચં નાસ્ત્યેવ સર્વં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૩૮.૨૮॥

સર્વં ચૈતન્યમાત્રત્વાત્કેવલં બ્રહ્મ એવ સઃ ।
આત્માકારમિદં સર્વમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૩૮.૨૯॥

તુર્યાતીતં બ્રહ્મણોઽન્યત્સત્યાસત્યં ન વિદ્યતે ।
સર્વં ત્યક્ત્વા તુ સતતં સ્વાત્મન્યેવ સ્થિરો ભવ ॥ ૩૮.૩૦॥

ચિત્તં કાલં વસ્તુભેદં સઙ્કલ્પં ભાવનં સ્વયમ્ ।
સર્વં સન્ત્યજ્ય સતતં સર્વં બ્રહ્મૈવ ભાવય ॥ ૩૮.૩૧॥

યદ્યદ્ભેદપરં શાસ્ત્રં યદ્યદ્ભેદપરં મનઃ ।
સર્વં સન્ત્યજ્ય સતતં સ્વાત્મન્યેવ સ્થિરો ભવ ॥ ૩૮.૩૨॥

મનઃ કલ્પિતકલ્પં વા આત્માકલ્પનવિભ્રમમ્ ।
અહઙ્કારપરિચ્છેદં દેહોઽહં દેહભાવના ॥ ૩૮.૩૩॥

સર્વં સન્ત્યજ્ય સતતમાત્મન્યેવ સ્થિરો ભવ ।
પ્રપઞ્ચસ્ય ચ સદ્ભાવં પ્રપઞ્ચોદ્ભવમન્યકમ્ ॥ ૩૮.૩૪॥

બન્ધસદ્ભાવકલનં મોક્ષસદ્ભાવભાષણમ્ ।
દેવતાભાવસદ્ભાવં દેવપૂજાવિનિર્ણયમ્ ॥ ૩૮.૩૫॥

પઞ્ચાક્ષરેતિ યદ્વૈતમષ્ટાક્ષરસ્ય દૈવતમ્ ।
પ્રાણાદિપઞ્ચકાસ્તિત્વમુપપ્રાણાદિપઞ્ચકમ્ ॥ ૩૮.૩૬॥

પૃથિવીભૂતભેદં ચ ગુણા યત્કુણ્ઠનાદિકમ્ ।

વેદાન્તશાસ્ત્રસિદ્ધાન્તં શૈવાગમનમેવ ચ ॥ ૩૮.૩૭॥

લૌકિકં વાસ્તવં દોષં પ્રવૃત્તિં ચ નિવૃત્તિકમ્ ।
સર્વં સન્ત્યજ્ય સતતમાત્મન્યેવ સ્થિરો ભવ ॥ ૩૮.૩૮॥

આત્મજ્ઞાનસુખં બ્રહ્મ અનાત્મજ્ઞાનદૂષણમ્ ।
રેચકં પૂરકં કુમ્ભં ષડાધારવિશોધનમ્ ॥ ૩૮.૩૯॥

દ્વૈતવૃત્તિશ્ચ દેહોઽહં સાક્ષિવૃત્તિશ્ચિદંશકમ્ ।
અખણ્ડાકારવૃત્તિશ્ચ અખણ્ડાકારસમ્મતમ્ ॥ ૩૮.૪૦॥

અનન્તાનુભવં ચાપિ અહં બ્રહ્મેતિ નિશ્ચયમ્ ।
ઉત્તમં મધ્યમં ચાપિ તથા ચૈવાધમાધમમ્ ॥ ૩૮.૪૧॥

દૂષણં ભૂષણં ચૈવ સર્વવસ્તુવિનિન્દનમ્ ।
અહં બ્રહ્મ ઇદં બ્રહ્મ સર્વં બ્રહ્મૈવ તત્ત્વતઃ ॥ ૩૮.૪૨॥

અહં બ્રહ્માસ્મિ મુગ્ધોઽસ્મિ વૃદ્ધોઽસ્મિ સદસત્પરઃ ।
વૈશ્વાનરો વિરાટ્સ્થૂલપ્રપઞ્ચમિતિ ભાવનમ્ ॥ ૩૮.૪૩॥

આનન્દસ્ફારણેનાહં પરાપરવિવર્જિતઃ ।
નિત્યાનન્દમયં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૩૮.૪૪॥

દૃગ્રૂપં દૃશ્યરૂપં ચ મહાસત્તાસ્વરૂપકમ્ ।
કૈવલ્યં સર્વનિધનં સર્વભૂતાન્તરં ગતમ્ ॥ ૩૮.૪૫॥

ભૂતભવ્યં ભવિષ્યચ્ચ વર્તમાનમસત્ સદા ।
કાલભાવં દેહભાવં સત્યાસત્યવિનિર્ણયમ્ ॥ ૩૮.૪૬॥

પ્રજ્ઞાનઘન એવાહં શાન્તાશાન્તં નિરઞ્જનમ્ ।
પ્રપઞ્ચવાર્તાસ્મરણં દ્વૈતાદ્વૈતવિભાવનમ્ ॥ ૩૮.૪૭॥

શિવાગમસમાચારં વેદાન્તશ્રવણં પદમ્ ।
અહં બ્રહ્માસ્મિ શુદ્ધોઽસ્મિ ચિન્માત્રોઽસ્મિ સદાશિવઃ ॥ ૩૮.૪૮॥

સર્વં બ્રહ્મેતિ સન્ત્યજ્ય સ્વાત્મન્યેવ સ્થિરો ભવ ।
અહં બ્રહ્મ ન સન્દેહ ઇદં બ્રહ્મ ન સંશયઃ ॥ ૩૮.૪૯॥

સ્થૂલદેહં સૂક્ષ્મદેહં કારણં દેહમેવ ચ ।
એવં જ્ઞાતું ચ સતતં બ્રહ્મૈવેદં ક્ષણે ક્ષણે ॥ ૩૮.૫૦॥

શિવો હ્યાત્મા શિવો જીવઃ શિવો બ્રહ્મ ન સંશયઃ ।
એતત્પ્રકરણં યસ્તુ સકૃદ્વા સર્વદાપિ વા ॥ ૩૮.૫૧॥

પઠેદ્વા શ‍ૃણુયાદ્વાપિ સ ચ મુક્તો ન સંશયઃ ।
નિમિષં નિમિષાર્ધં વા શ્રુત્વૈતબ્રહ્મભાગ્ભવેત્ ॥ ૩૮.૫૨॥

લોકાલોકજગત્સ્થિતિપ્રવિલયપ્રોદ્ભાવસત્તાત્મિકા
ભીતિઃ શઙ્કરનામરૂપમસ્કૃદ્વ્યાકુર્વતે કેવલમ્ ।
સત્યાસત્યનિરઙ્કુશશ્રુતિવચોવીચીભિરામૃશ્યતે
યસ્ત્વેતત્સદિતીવ તત્ત્વવચનૈર્મીમાંસ્યતેઽયં શિવઃ ॥ ૩૮.૫૩॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
પ્રપઞ્ચશૂન્યત્વપ્રકરણં નામ અષ્ટત્રિંશોઽધ્યાયઃ ॥

## ૩૯. સર્વલયપ્રકરણં નામ એકોનચત્વારિંશોઽધ્યાયઃ

ઋભુઃ -
પરં બ્રહ્મ પ્રવક્ષ્યામિ નિર્વિકલ્પં નિરામયમ્ ।
તદેવાહં ન સન્દેહઃ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૯.૧॥

ચિન્માત્રમમલં શાન્તં સચ્ચિદાનન્દવિગ્રહમ્ ।
આનન્દં પરમાનન્દં નિર્વિકલ્પં નિરઞ્જનમ્ ॥ ૩૯.૨॥

ગુણાતીતં જનાતીતમવસ્થાતીતમવ્યયમ્ ।
એવં ભાવય ચૈતન્યમહં બ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ॥ ૩૯.૩॥

સર્વાતીતસ્વરૂપોઽસ્મિ સર્વશબ્દાર્થવર્જિતઃ ।
સત્યોઽહં સર્વહન્તાહં શુદ્ધોઽહં પરમોઽસ્મ્યહમ્ ॥ ૩૯.૪॥

અજોઽહં શાન્તરૂપોઽહં અશરીરોઽહમાન્તરઃ ।
સર્વહીનોઽહમેવાહં સ્વયમેવ સ્વયં મહઃ ॥ ૩૯.૫॥

આત્મૈવાહં પરાત્માહં બ્રહ્મૈવાહં શિવોઽસ્મ્યહમ્ ।
ચિત્તહીનસ્વરૂપોઽહં બુદ્ધિહીનોઽહમસ્મ્યહમ્ ॥ ૩૯.૬॥

વ્યાપકોઽહમહં સાક્ષી બ્રહ્માહમિતિ નિશ્ચયઃ ।
નિષ્પ્રપઞ્ચગજારૂઢો નિષ્પ્રપઞ્ચાશ્વવાહનઃ ॥ ૩૯.૭॥

નિષ્પ્રપઞ્ચમહારાજ્યો નિષ્પ્રપઞ્ચાયુધાદિમાન્ ।

નિષ્પ્રપઞ્ચમહાવેદો નિષ્પ્રપઞ્ચાત્મભાવનઃ ॥ ૩૯.૮॥

નિષ્પ્રપઞ્ચમહાનિદ્રો નિષ્પ્રપઞ્ચસ્વભાવકઃ ।
નિષ્પ્રપઞ્ચસ્તુ જીવાત્મા નિષ્પ્રપઞ્ચકલેવરઃ ॥ ૩૯.૯॥

નિષ્પ્રપઞ્ચપરીવારો નિષ્પ્રપઞ્ચોત્સવો ભવઃ ।
નિષ્પ્રપઞ્ચસ્તુ કલ્યાણો નિષ્પ્રપઞ્ચસ્તુ દર્પણઃ ॥ ૩૯.૧૦॥

નિષ્પ્રપઞ્ચરથારૂઢો નિષ્પ્રપઞ્ચવિચારણમ્ ।
નિષ્પ્રપઞ્ચગુહાન્તસ્થો નિષ્પ્રપઞ્ચપ્રદીપકમ્ ॥ ૩૯.૧૧॥

નિષ્પ્રપઞ્ચપ્રપૂર્ણાત્મા નિષ્પ્રપઞ્ચોઽરિમર્દનઃ ।
ચિત્તમેવ પ્રપઞ્ચો હિ ચિત્તમેવ જગત્ત્રયમ્ ॥ ૩૯.૧૨॥

ચિત્તમેવ મહામોહશ્ચિત્તમેવ હિ સંસૃતિઃ ।
ચિત્તમેવ મહાપાપં ચિત્તમેવ હિ પુણ્યકમ્ ॥ ૩૯.૧૩॥

ચિત્તમેવ મહાબન્ધશ્ચિત્તમેવ વિમોક્ષદમ્ ।
બ્રહ્મભાવનયા ચિત્તં નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૪॥

બ્રહ્મભાવનયા દુઃખં નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા દ્વૈતં નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૫॥

બ્રહ્મભાવનયા કામઃ નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા ક્રોધઃ નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૬॥

બ્રહ્મભાવનયા લોભઃ નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા ગ્રન્થિઃ નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૭॥

બ્રહ્મભાવનયા સર્વં બ્રહ્મભાવનયા મદઃ ।
બ્રહ્મભાવનયા પૂજા નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૮॥

બ્રહ્મભાવનયા ધ્યાનં નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા સ્નાનં નાશમેતિ ન સંશયઃ ॥ ૩૯.૧૯॥

બ્રહ્મભાવનયા મન્ત્રો નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા પાપં નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૦॥

બ્રહ્મભાવનયા પુણ્યં નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા દોષો નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૧॥

બ્રહ્મભાવનયા ભ્રાન્તિઃ નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા દૃશ્યં નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૨॥

બ્રહ્મભાવનયા સઙ્ગો નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા તેજો નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૩॥

બ્રહ્મભાવનયા પ્રજ્ઞા નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા સત્તા નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૪॥

બ્રહ્મભાવનયા ભીતિઃ નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા વેદઃ નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૫॥

બ્રહ્મભાવનયા શાસ્ત્રં નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા નિદ્રા નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૬॥

બ્રહ્મભાવનયા કર્મ નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા તુર્યં નાશમેતિ ન સંશયઃ ॥ ૩૯.૨૭॥

બ્રહ્મભાવનયા દ્વન્દ્વં નાશમેતિ ન સંશયઃ ।
બ્રહ્મભાવનયા પૃચ્છેદહં બ્રહ્મેતિ નિશ્ચયમ્ ॥ ૩૯.૨૮॥

નિશ્ચયં ચાપિ સન્ત્યજ્ય સ્વસ્વરૂપાન્તરાસનમ્ ।
અહં બ્રહ્મ પરં બ્રહ્મ ચિદ્બ્રહ્મ બ્રહ્મમાત્રકમ્ ॥ ૩૯.૨૯॥

જ્ઞાનમેવ પરં બ્રહ્મ જ્ઞાનમેવ પરં પદમ્ ।
દિવિ બ્રહ્મ દિશો બ્રહ્મ મનો બ્રહ્મ અહં સ્વયમ્ ॥ ૩૯.૩૦॥

કિઞ્ચિદ્બ્રહ્મ બ્રહ્મ તત્ત્વં તત્ત્વં બ્રહ્મ તદેવ હિ ।
અજો બ્રહ્મ શુભં બ્રહ્મ આદિબ્રહ્મ બ્રવીમિ તમ્ ॥ ૩૯.૩૧॥

અહં બ્રહ્મ હવિર્બ્રહ્મ કાર્યબ્રહ્મ ત્વહં સદા ।
નાદો બ્રહ્મ નદં બ્રહ્મ તત્ત્વં બ્રહ્મ ચ નિત્યશઃ ॥ ૩૯.૩૨॥

એતદ્બ્રહ્મ શિખા બ્રહ્મ તદ્બ્રહ્મ બ્રહ્મ શાશ્વતમ્ ।
નિજં બ્રહ્મ સ્વતો બ્રહ્મ નિત્યં બ્રહ્મ ત્વમેવ હિ ॥ ૩૯.૩૩॥

સુખં બ્રહ્મ પ્રિયં બ્રહ્મ મિત્રં બ્રહ્મ સદામૃતમ્ ।
ગુહ્યં બ્રહ્મ ગુરુર્બ્રહ્મ ઋતં બ્રહ્મ પ્રકાશકમ્ ॥ ૩૯.૩૪॥

સત્યં બ્રહ્મ સમં બ્રહ્મ સારં બ્રહ્મ નિરઞ્જનમ્ ।
એકં બ્રહ્મ હરિર્બ્રહ્મ શિવો બ્રહ્મ ન સંશયઃ ॥ ૩૯.૩૫॥

ઇદં બ્રહ્મ સ્વયં બ્રહ્મ લોકં બ્રહ્મ સદા પરઃ ।
આત્મબ્રહ્મ પરં બ્રહ્મ આત્મબ્રહ્મ નિરન્તરઃ ॥ ૩૯.૩૬॥

એકં બ્રહ્મ ચિરં બ્રહ્મ સર્વં બ્રહ્માત્મકં જગત્ ।
બ્રહ્મૈવ બ્રહ્મ સદ્બ્રહ્મ તત્પરં બ્રહ્મ એવ હિ ॥ ૩૯.૩૭॥

ચિદ્બ્રહ્મ શાશ્વતં બ્રહ્મ જ્ઞેયં બ્રહ્મ ન ચાપરઃ ।
અહમેવ હિ સદ્બ્રહ્મ અહમેવ હિ નિર્ગુણમ્ ॥ ૩૯.૩૮॥

અહમેવ હિ નિત્યાત્મા એવં ભાવય સુવ્રત ।
અહમેવ હિ શાસ્ત્રાર્થ ઇતિ નિશ્ચિત્ય સર્વદા ॥ ૩૯.૩૯॥

આત્મૈવ નાન્યદ્ભેદોઽસ્તિ સર્વં મિથ્યેતિ નિશ્ચિનુ ।
આત્મૈવાહમહં ચાત્મા અનાત્મા નાસ્તિ નાસ્તિ હિ ॥ ૩૯.૪૦॥

(આત્મૈવ સ્ફુરતે લોકે જગદેતશ્ચરાચરમ્) ॥ ૩૯.૪૦॥

વિશ્વં વસ્તુતયા વિભાતિ હૃદયે મૂઢાત્મનાં બોધતો-
ઽપ્યજ્ઞાનં ન નિવર્તતે શ્રુતિશિરોવાર્તાનુવૃત્ત્યાઽપિ ચ ।
વિશ્વેશસ્ય સમર્ચનેન સુમહાલિઙ્ગાર્ચનાદ્ભસ્મધૃ-
ક્રુદ્રાક્ષામલધારણેન ભગવદ્ધ્યાનેન ભાત્યાત્મવત્ ॥ ૩૯.૪૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સર્વલયપ્રકરણં નામ એકોનચત્વારિંશોઽધ્યાયઃ ॥

## ૪૦. ચિત્તવૃત્તિનિરોધપ્રકરણં નામ ચત્વારિંશોઽધ્યાયઃ

ઋભુઃ -
સર્વસારાત્સારતરં તતઃ સારતરાન્તરમ્ ।
ઇદમન્તિમત્યન્તં શ ૃણુ પ્રકરણં મુદા ॥ ૪૦.૧॥

બ્રહ્મૈવ સર્વમેવેદં બ્રહ્મૈવાન્યન્ન કિઞ્ચન ।
નિશ્ચયં દૃઢમાશ્રિત્ય સર્વત્ર સુખમાસ્વ હ ॥ ૪૦.૨॥

બ્રહ્મૈવ સર્વભુવનં ભુવનં નામ સન્ત્યજ ।
અહં બ્રહ્મેતિ નિશ્ચિત્ય અહં ભાવં પરિત્યજ ॥ ૪૦.૩॥

સર્વમેવં લયં યાતિ સ્વયમેવ પતત્રિવત્ ।

સ્વયમેવ લયં યાતિ સુમહસ્તસ્થપદ્મવત્ ॥ ૪૦.૪॥

ન ત્વં નાહં ન પ્રપઞ્ચઃ સર્વં બ્રહ્મૈવ કેવલમ્ ।
ન ભૂતં ન ચ કાર્યં ચ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૪૦.૫॥

ન દૈવં ન ચ કાર્યાણિ ન દેહં નેન્દ્રિયાણિ ચ ।
ન જાગ્રન્ન ચ વા સ્વપ્નો ન સુષુપ્તિર્ન તુર્યકમ્ ॥ ૪૦.૬॥

ઇદં પ્રપઞ્ચં નાસ્ત્યેવ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સર્વં મિથ્યા સદા મિથ્યા સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૭॥

સદા બ્રહ્મવિચારં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
તથા દ્વૈતપ્રતીતિશ્ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૮॥

સદાહં ભાવરૂપં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
નિત્યાનિત્યવિવેકં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૯॥

ભાવાભાવપ્રતીતિં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
ગુણદોષવિભાગં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૦॥

કાલાકાલવિભાગં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
અહં જીવેત્યનુભવં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૧॥

અહં મુક્તોઽસ્મ્યનુભવં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સર્વં બ્રહ્મેતિ કલનં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૨॥

સર્વં નાસ્તીતિ વાર્તા ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
દેવતાન્તરસત્તાકં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૩॥

દેવતાન્તરપૂજા ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
દેહોઽહમિતિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૪॥

બ્રહ્માહમિતિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
ગુરુશિષ્યાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૫॥

તુલ્યાતુલ્યાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
વેદશાસ્ત્રાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૬॥

ચિત્તસત્તાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
બુદ્ધિનિશ્ચયસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૭॥

મનોવિકલ્પસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
અહઙ્કારાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૮॥

પઞ્ચભૂતાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
શબ્દાદિસત્તાસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૯॥

દૃગ્વાર્તાદિકસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
કર્મેન્દ્રિયાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૦॥

વચનાદાનસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
મુનીન્દ્રોપેન્દ્રસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૧॥

મનોબુદ્ધ્યાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સઙ્કલ્પાધ્યાસ ઇત્યાદિ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૨॥

રુદ્રક્ષેત્રાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
પ્રાણાદિદશસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૩॥

માયા વિદ્યા દેહજીવાઃ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સ્થૂલવ્યષ્ટાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૪॥

સૂક્ષ્મવ્યષ્ટિસમષ્ટ્યાદિ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
વ્યષ્ટ્યજ્ઞાનાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૫॥

વિશ્વવૈશ્વાનરત્વં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
તૈજસપ્રાજ્ઞભેદં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૬॥

વાચ્યાર્થં ચાપિ લક્ષ્યાર્થં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
જહલ્લક્ષણયાનૈક્યં અજહલ્લક્ષણા ધ્રુવમ્ ॥ ૪૦.૨૭॥

ભાગત્યાગેન નિત્યૈક્યં સર્વં બ્રહ્મ ઉપાધિકમ્ ।
લક્ષ્યં ચ નિરુપાધ્યૈક્યં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૮॥

એવમાહુર્મહાત્માનઃ સર્વં બ્રહ્મેતિ કેવલમ્ ।
સર્વમન્તઃ પરિત્યજ્ય અહં બ્રહ્મેતિ ભાવય ॥ ૪૦.૨૯॥

અસઙ્કુલિતકાપિલૈર્મધુહરાક્ષિપૂજ્યામ્બુજ-
    પ્રભાડ્દ્વિજનિમોત્તમો પરિષિચેદ્યદિન્દુપ્રભમ્ ।
તં ડિણ્ડીરનિભોત્તમોત્તમ મહાખણ્ડાજ્યદધ્ના પરં
    ક્ષીરાદ્યૈરભિષિચ્ય મુક્તિપરમાનન્દં લભે શામ્ભવમ્ ॥ ૪૦.૩૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
ચિત્તવૃત્તિનિરોધપ્રકરણં નામ ચત્વારિંશોઽધ્યાયઃ ॥

## ૪૧. ગ્રન્થપ્રશસ્તિનિરૂપણં નામ એકચત્વારિંશોઽધ્યાયઃ

ઋભુઃ -
અહં બ્રહ્મ ન સન્દેહઃ અહં બ્રહ્મ ન સંશયઃ ।
અહં બ્રહ્મૈવ નિત્યાત્મા અહમેવ પરાત્પરઃ ॥ ૪૧.૧॥

ચિન્માત્રોઽહં ન સન્દેહ ઇતિ નિશ્ચિત્ય તં ત્યજ ।
સત્યં સત્યં પુનઃ સત્યમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૪૧.૨॥

શિવપાદદ્વયં સ્પૃષ્ટ્વા વદામીદં ન કિઞ્ચન ।
ગુરુપાદદ્વયં સ્પૃષ્ટ્વા વદામીદં ન કિઞ્ચન ॥ ૪૧.૩॥

જિહ્વયા પરશું તપ્તં ધારયામિ ન સંશયઃ ।
વેદશાસ્ત્રાદિકં સ્પૃષ્ટ્વા વદામીદં વિનિશ્ચિતમ્ ॥ ૪૧.૪॥

નિશ્ચયાત્મન્નિશ્ચયસ્ત્વં નિશ્ચયેન સુખી ભવ ।
ચિન્મયસ્ત્વં ચિન્મયત્વં ચિન્મયાનન્દ એવ હિ ॥ ૪૧.૫॥

બ્રહ્મૈવ બ્રહ્મભૂતાત્મા બ્રહ્મૈવ ત્વં ન સંશયઃ ।
સર્વમુક્તં ભગવતા યોગિનામપિ દુર્લભમ્ ॥ ૪૧.૬॥

દેવાનાં ચ ઋષીણાં ચ અત્યન્તં દુર્લભં સદા ।
ઐશ્વરં પરમં જ્ઞાનમુપદિષ્ટં શિવેન હિ ॥ ૪૧.૭॥

એતજ્જ્ઞાનં સમાનીતં કૈલાસાચ્છઙ્કરાન્તિકાત્ ।
દેવાનાં દક્ષિણામૂર્તિર્દશસાહસ્રવત્સરાન્ ॥ ૪૧.૮॥

વિઘ્નેશો બહુસાહસ્રં વત્સરં ચોપદિષ્ટવાન્ ।
સાક્ષાચ્છિવોઽપિ પાર્વત્યૈ વત્સરં ચોપદિષ્ટવાન્ ॥ ૪૧.૯॥

ક્ષીરાબ્ધૌ ચ મહાવિષ્ણુર્બ્રહ્મણે ચોપદિષ્ટવાન્ ।
કદાચિત્બ્રહ્મલોકે તુ મત્પિતુશ્ચોક્તવાનહમ્ ॥ ૪૧.૧૦॥

નારદાદિ ઋષીણાં ચ ઉપદિષ્ટં મહદ્બહુ ।
અયાતયામં વિસ્તારં ગૃહીત્વાઽહમિહાગતઃ ॥ ૪૧.૧૧॥

ન સમં પાદમેકં ચ તીર્થકોટિફલં લભેત્ ।

ન સમં ગ્રન્થમેતસ્ય ભૂમિદાનફલં લભેત્ ॥ ૪૧.૧૨॥

એકાનુભવમાત્રસ્ય ન સર્વં સર્વદાનકમ્ ।
શ્લોકાર્ધશ્રવણસ્યાપિ ન સમં કિઞ્ચિદેવ હિ ॥ ૪૧.૧૩॥

તાત્પર્યશ્રવણાભાવે પઠંસ્તૂષ્ણીં સ મુચ્યતે ।
સર્વં સન્ત્યજ્ય સતતમેતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૪॥

સર્વમન્ત્રં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વદેવાંશ્ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૫॥

સર્વસ્નાનં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વભાવં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૬॥

સર્વહોમં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વદાનં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૭॥

સર્વપૂજાં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વગુહ્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૮॥

સર્વસેવાં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વાસ્તિત્વં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૯॥

સર્વપાઠં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વાભ્યાસં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૦॥

દેશિકં ચ પરિત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
ગુરું વાપિ પરિત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૧॥

સર્વલોકં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વૈશ્વર્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૨॥

સર્વસઙ્કલ્પકં ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વપુણ્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૩॥

એતદ્ગ્રન્થં પરં બ્રહ્મ એતદ્ગ્રન્થં સમભ્યસેત્ ।
અત્રૈવ સર્વવિજ્ઞાનં અત્રૈવ પરમં પદમ્ ॥ ૪૧.૨૪॥

અત્રૈવ પરમો મોક્ષ અત્રૈવ પરમં સુખમ્ ।
અત્રૈવ ચિત્તવિશ્રાન્તિરત્રૈવ ગ્રન્થિભેદનમ્ ॥ ૪૧.૨૫॥

અત્રૈવ જીવન્મુક્તિશ્ચ અત્રૈવ સકલો જપઃ ।
એતદ્ગ્રન્થં પઠંસ્તૂષ્ણીં સદ્યો મુક્તિમવાપ્નુયાત્ ॥ ૪૧.૨૬॥

સર્વશાસ્ત્રં ચ સન્ત્યજ્ય એતન્માત્રં સદાભ્યસેત્ ।
દિને દિને ચૈકવારં પઠેચ્ચેન્મુક્ત એવ સઃ ॥ ૪૧.૨૭॥

જન્મમધ્યે સકૃદ્વાપિ શ્રુતં ચેત્સોઽપિ મુચ્યતે ।
સર્વશાસ્ત્રસ્ય સિદ્ધાન્તં સર્વવેદસ્ય સઙ્ગ્રહમ્ ॥ ૪૧.૨૮॥

સારાત્સારતરં સારં સારાત્સારતરં મહત્ ।
એતદ્ગ્રન્થસ્ય ન સમં ત્રૈલોક્યેઽપિ ભવિષ્યતિ ॥ ૪૧.૨૯॥

ન પ્રસિદ્ધિં ગતે લોકે ન સ્વર્ગેઽપિ ચ દુર્લભમ્ ।
બ્રહ્મલોકેષુ સર્વેષુ શાસ્ત્રેષ્વપિ ચ દુર્લભમ્ ॥ ૪૧.૩૦॥

એતદ્ગ્રન્થં કદાચિત્તુ ચૌર્યં કૃત્વા પિતામહઃ ।
ક્ષીરાબ્ધૌ ચ પરિત્યજ્ય સર્વે મુઞ્ચન્તુ નો ઇતિ ॥ ૪૧.૩૧॥

જ્ઞાત્વા ક્ષીરસમુદ્રસ્ય તીરે પ્રાપ્તં ગૃહીતવાન્ ।
ગૃહીતં ચાપ્યસૌ દૃષ્ટ્વા શપથં ચ પ્રદત્તવાન્ ॥ ૪૧.૩૨॥

તદારભ્ય તલ્લોકં ત્યક્ત્વાહમિમમાગતઃ ।
અત્યદ્ભુતમિદં જ્ઞાનં ગ્રન્થં ચૈવ મહાદ્ભુતમ્ ॥ ૪૧.૩૩॥

તજ્જ્ઞો વક્તા ચ નાસ્ત્યેવ ગ્રન્થશ્રોતા ચ દુર્લભઃ ।
આત્મનિષ્ઠૈકલભ્યોઽસૌ સદ્ગુરુર્નૈષ લભ્યતે ॥ ૪૧.૩૪॥

ગ્રન્થવન્તો ન લભ્યન્તે તેન ન ખ્યાતિરાગતા ।
ભવતે દર્શિતં હ્યેતદ્ગમિષ્યામિ યથાગતમ્ ॥ ૪૧.૩૫॥

એતાવદુક્તમાત્રેણ નિદાઘ ઋષિસત્તમઃ ।
પતિત્વા પાદયોસ્તસ્ય આનન્દાશ્રુપરિપ્લુતઃ ॥ ૪૧.૩૬॥

ઉવાચ વાક્યં સાનન્દં સાષ્ટાઙ્ગં પ્રણિપત્ય ચ ।
નિદાઘઃ -
અહો બ્રહ્મન્ કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ ન સંશયઃ ।
ભવતાં દર્શનેનૈવ મજ્જન્મ સફલં કૃતમ્ ॥ ૪૧.૩૭॥

એકવાક્યસ્ય મનને મુક્તોઽહં નાત્ર સંશયઃ ।
નમસ્કરોમિ તે પાદૌ સોપચારં ન વાસ્તવૌ ॥ ૪૧.૩૮॥

તસ્યાપિ નાવકાશોઽસ્તિ અહમેવ ન વાસ્તવમ્ ।
ત્વમેવ નાસ્તિ મે નાસ્તિ બ્રહ્મેતિ વચનં ન ચ ॥ ૪૧.૩૯॥

બ્રહ્મેતિ વચનં નાસ્તિ બ્રહ્મભાવં ન કિઞ્ચન ।
એતદ્ગ્રન્થં ન મે નાસ્તિ સર્વં બ્રહ્મેતિ વિદ્યતે ॥ ૪૧.૪૦॥

સર્વં બ્રહ્મેતિ વાક્યં ન સર્વં બ્રહ્મેતિ તં ન હિ ।
તદિતિ દ્વૈતભિન્નં તુ ત્વમિતિ દ્વૈતમપ્યલમ્ ॥ ૪૧.૪૧॥

એવં કિઞ્ચિત્ક્વચિન્નાસ્તિ સર્વં શાન્તં નિરામયમ્ ।
એકમેવ દ્વયં નાસ્તિ એકત્વમપિ નાસ્તિ હિ ॥ ૪૧.૪૨॥

ભિન્નદ્વન્દ્વં જગદ્દોષં સંસારદ્વૈતવૃત્તિકમ્ ।
સાક્ષિવૃત્તિપ્રપઞ્ચં વા અખણ્ડાકારવૃત્તિકમ્ ॥ ૪૧.૪૩॥

અખણ્ડૈકરસો નાસ્તિ ગુરુર્વા શિષ્ય એવ વા ।
ભવદ્દર્શનમાત્રેણ સર્વમેવં ન સંશયઃ ॥ ૪૧.૪૪॥

બ્રહ્મજ્યોતિરહં પ્રાપ્તો જ્યોતિષાં જ્યોતિરસ્મ્યહં (જ્યોતિરસ્મ્યહો) ।
નમસ્તે સુગુરો બ્રહ્મન્નમસ્તે ગુરુનન્દન ।
એવં કૃત્ય નમસ્કારં તૂષ્ણીમાસ્તે સુખી સ્વયમ્ ॥ ૪૧.૪૫॥

કિં ચણ્ડભાનુકરમણ્ડલદણ્ડિતાનિ
કાષ્ઠામુખેષુ ગલિતાનિ નમસ્તતીતિ ।
યાદૃક્ચ્ય તાદૃગથ શઙ્કરલિઙ્ગસઙ્ગ-
ભઙ્ગીનિ પાપકલશૈલકુલાનિ સદ્યઃ ।
શ્રીમૃત્યુઞ્જય રઞ્જય ત્રિભુવનાધ્યક્ષ પ્રભો પાહિ નઃ ॥ ૪૧.૪૬॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
ગ્રન્થપ્રશસ્તિનિરૂપણં નામ એકચત્વારિંશોઽધ્યાયઃ ॥

## ૪૨. નિદાઘાનુભવવર્ણનપ્રકરણં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

ઋભુઃ -
શ્રુતં કિઞ્ચિન્મયા પ્રોક્તં બ્રહ્મજ્ઞાનં સુદુર્લભમ્ ।
મનસા ધારિતં બ્રહ્મ ચિત્તં કીદૃક્સ્થિતં વદ ॥ ૪૨.૧॥

નિદાઘઃ -

શ઼ૃણુ ત્વં સુગુરો બ્રહ્મંસ્ત્વત્પ્રસાદાદ્વદામ્યહમ્ ।
મમાજ્ઞાનં મહાદોષં મહાજ્ઞાનનિરોધકમ્ ॥ ૪૨.૨॥

સદા કર્મણિ વિશ્વાસં પ્રપઞ્ચે સત્યભાવનમ્ ।
નષ્ટં સર્વં ક્ષણાદેવ ત્વત્પ્રસાદાન્મહદ્ભયમ્ ॥ ૪૨.૩॥

એતાવન્તમિમં કાલમજ્ઞાનરિપુણા હૃતમ્ ।
મહદ્ભયં ચ નષ્ટં મે કર્મતત્ત્વં ચ નાશિતમ્ ॥ ૪૨.૪॥

અજ્ઞાનં મનસા પૂર્વમિદાનીં બ્રહ્મતાં ગતમ્ ।
પુરાહં ચિત્તવદ્ભૂતઃ ઇદાનીં સન્મયોઽભવમ્ ॥ ૪૨.૫॥

પૂર્વમજ્ઞાનવદ્ભાવં ઇદાનીં સન્મયં ગતમ્ ।
અજ્ઞાનવત્સ્થિતોઽહં વૈ બ્રહ્મૈવાહં પરં ગતઃ ॥ ૪૨.૬॥

પુરાઽહં ચિત્તવદ્ભ્રાન્તો બ્રહ્મૈવાહં પરં ગતઃ ।
સર્વો વિગલિતો દોષઃ સર્વો ભેદો લયં ગતઃ ॥ ૪૨.૭॥

સર્વઃ પ્રપઞ્ચો ગલિતશ્ચિત્તમેવ હિ સર્વગમ્ ।
સર્વાન્તઃકરણં લીનં બ્રહ્મસદ્ભાવભાવનાત્ ॥ ૪૨.૮॥

અહમેવ ચિદાકાશ અહમેવ હિ ચિન્મયઃ ।
અહમેવ હિ પૂર્ણાત્મા અહમેવ હિ નિર્મલઃ ॥ ૪૨.૯॥

અહમેવાહમેવેતિ ભાવનાપિ વિનિર્ગતા ।
અહમેવ ચિદાકાશો બ્રાહ્મણત્વં ન કિઞ્ચન ॥ ૪૨.૧૦॥

શૂદ્રોઽહં શ્વપચોઽહં વૈ વર્ણી ચાપિ ગૃહસ્થકઃ ।
વાનપ્રસ્થો યતિરહમિત્યયં ચિત્તવિભ્રમઃ ॥ ૪૨.૧૧॥

તત્તદાશ્રમકર્માણિ ચિત્તેન પરિકલ્પિતમ્ ।
અહમેવ હિ લક્ષ્યાત્મા અહમેવ હિ પૂર્ણકઃ ॥ ૪૨.૧૨॥

અહમેવાન્તરાત્મા હિ અહમેવ પરાયણમ્ ।
અહમેવ સદાધાર અહમેવ સુખાત્મકઃ ॥ ૪૨.૧૩॥

ત્વત્પ્રસાદાદહં બ્રહ્મા ત્વત્પ્રસાદાજ્જનાર્દનઃ ।
ત્વત્પ્રસાદાચ્ચિદાકાશઃ શિવોઽહં નાત્ર સંશયઃ ॥ ૪૨.૧૪॥

ત્વત્પ્રસાદાદહં ચિદ્વૈ ત્વત્પ્રસાદાન્ન મે જગત્ ।
ત્વત્પ્રસાદાદ્વિમુક્તોઽસ્મિ ત્વત્પ્રસાદાત્પરં ગતઃ ॥ ૪૨.૧૫॥

ત્વત્પ્રસાદાદ્વ્યાપકોઽહં ત્વત્પ્રસાદાન્નિરઙ્કુશઃ ।
ત્વત્પ્રસાદેન તીર્ણોઽહં ત્વત્પ્રસાદાન્મહત્સુખમ્ ॥ ૪૨.૧૬॥

ત્વત્પ્રસાદાદહં બ્રહ્મ ત્વત્પ્રસાદાત્ત્વમેવ ન ।
ત્વત્પ્રસાદાદિદં નાસ્તિ ત્વત્પ્રસાદાન્ન કિઞ્ચન ॥ ૪૨.૧૭॥

ત્વત્પ્રસાદાન્ન મે કિઞ્ચિત્ત્વત્પ્રસાદાન્ન મે વિપત્ ।
ત્વત્પ્રસાદાન્ન મે ભેદસ્ત્વત્પ્રસાદાન્ન મે ભયમ્ ॥ ૪૨.૧૮॥

ત્વત્પ્રસાદાન્નમે રોગસ્ત્વત્પ્રસાદાન્ન મે ક્ષતિઃ ।
યત્પાદામ્બુજપૂજયા હરિરભૂદર્ચ્યો યદઙ્ઘ્ર્યર્ચના-
 દર્ચ્યાઽભૂત્ કમલા વિધિપ્રભૃતયો હ્યર્ચ્યા યદાજ્ઞાવશાત્ ।
તં કાલાન્તકમન્તકાન્તકમુમાકાન્તં મુહુઃ સન્તતં
 સન્તઃ સ્વાન્તસરોજરાજચરણામ્ભોજં ભજન્ત્યાદરાત્ ॥ ૪૨.૧૯॥

કિં વા ધર્મશતાયુતાર્જિતમહાસૌખ્યૈકસીમાયુતં
 નાકં પાતમહોગ્રદુઃખનિકરં દેવેષુ તુષ્ટિપ્રદમ્ ।
તસ્માચ્છઙ્કરલિઙ્ગપૂજનમુમાકાન્તપ્રિયં મુક્તિદં
 ભૂમાનન્દઘનૈકમુક્તિપરમાનન્દૈકમોદં મહઃ ॥ ૪૨.૨૦॥

યે શામ્ભવાઃ શિવરતાઃ શિવનામમાત્ર-
 શબ્દાક્ષરજ્ઞહૃદયા ભસિતત્રિપુણ્ડ્રાઃ ।
યાં પ્રાપ્નુવન્તિ ગતિમીશપદામ્બુજોઘ-
 દ્ધ્યાનાનુરક્તહૃદયા ન હિ યોગસાઙ્ખ્યૈઃ ॥ ૪૨.૨૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
 નિદાઘાનુભવવર્ણનપ્રકરણં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥

## ૪૩. નિદાઘાનુભવવર્ણનપ્રકરણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

નિદાઘઃ -
ન પશ્યામિ શરીરં વા લિઙ્ગં કરણમેવ વા ।
ન પશ્યામિ મનો વાપિ ન પશ્યામિ જડં તતઃ ॥ ૪૩.૧॥

ન પશ્યામિ ચિદાકાશં ન પશ્યામિ જગત્ક્વચિત્ ।
ન પશ્યામિ હરિં વાપિ ન પશ્યામિ શિવં ચ વા ॥ ૪૩.૨॥

આનન્દસ્યાન્તરે લગ્નં તન્મયત્વાન્ન ચોત્થિતઃ ।
ન પશ્યામિ સદા ભેદં ન જડં ન જગત્ક્વચિત્ ॥ ૪૩.૩॥

ન દ્વૈતં ન સુખં દુઃખં ન ગુરુર્ન પરાપરમ્ ।
ન ગુણં વા ન તુર્યં વા ન બુદ્ધિર્ન ચ સંશયઃ ॥ ૪૩.૪॥

ન ચ કાલં ન ચ ભયં ન ચ શોકં શુભાશુભમ્ ।
ન પશ્યામિ સન્દીનં ન બન્ધં ન ચ સમ્ભવમ્ ॥ ૪૩.૫॥

ન દેહેન્દ્રિયસદ્ભાવો ન ચ સદ્વસ્તુ સન્મનઃ ।
ન પશ્યામિ સદા સ્થૂલં ન કૃશં ન ચ કુબ્જકમ્ ॥ ૪૩.૬॥

ન ભૂમિર્ન જલં નાગ્નિર્ન મોહો ન ચ મન્ત્રકમ્ ।
ન ગુરુર્ન ચ વાક્યં વા ન દૃઢં ન ચ સર્વકમ્ ॥ ૪૩.૭॥

ન જગચ્છ્રવણં ચૈવ નિદિધ્યાસં ન ચાપરઃ ।
આનન્દસાગરે મગ્નસ્તન્મયત્વાન્ન ચોત્થિતઃ ॥ ૪૩.૮॥

આનન્દોઽહમશેષોઽહમજોઽહમમૃતોસ્મ્યહમ્ ।
નિત્યોઽહમિતિ નિશ્ચિત્ય સદા પૂર્ણોઽસ્મિ નિત્યધીઃ ॥ ૪૩.૯॥

પૂર્ણોઽહં પૂર્ણચિત્તોઽહં પુણ્યોઽહં જ્ઞાનવાનહમ્ ।
શુદ્ધોઽહં સર્વમુક્તોઽહં સર્વાકારોઽહમવ્યયઃ ॥ ૪૩.૧૦॥

ચિન્માત્રોઽહં સ્વયં સોઽહં તત્ત્વરૂપોઽહમીશ્વરઃ ।
પરાપરોઽહં તુર્યોઽહં પ્રસન્નોઽહં રસોઽસ્મ્યહમ્ ॥ ૪૩.૧૧॥

બ્રહ્માઽહં સર્વલક્ષ્યોઽહં સદા પૂર્ણોઽહમક્ષરઃ ।
મમાનુભવરૂપં યત્સર્વમુક્તં ચ સદ્ગુરો ॥ ૪૩.૧૨॥

નમસ્કરોમિ તે નાહં સર્વં ચ ગુરુદક્ષિણા ।
મદ્દેહં ત્વત્પદે દત્તં ત્વયા ભસ્મીકૃતં ક્ષણાત્ ॥ ૪૩.૧૩॥

મમાત્મા ચ મયા દત્તઃ સ્વયમાત્મનિ પૂરિતઃ ।
ત્વમેવાહમહં ચ ત્વમહમેવ ત્વમેવ હિ ॥ ૪૩.૧૪॥

ઐક્યાર્ણવનિમગ્નોઽસ્મિ ઐક્યજ્ઞાનં ત્વમેવ હિ ।
એકં ચૈતન્યમેવાહં ત્વયા ગન્તું ન શક્યતે ॥ ૪૩.૧૫॥

ગન્તવ્યદેશો નાસ્ત્યેવ એકાકારં ન ચાન્યતઃ ।

ત્વયા ગન્તવ્યદેશો ન મયા ગન્તવ્યમસ્તિ ન ॥ ૪૩.૧૬॥

એકં કારણમેકં ચ એકમેવ દ્વયં ન હિ ।
ત્વયા વક્તવ્યકં નાસ્તિ મયા શ્રોતવ્યમપ્યલમ્ ॥ ૪૩.૧૭॥

ત્વમેવ સદ્ગુરુર્નાસિ અહં નાસ્મિ સશિષ્યકઃ ।
(ત્વમેવ સદ્ગુરુર્નાસિ ન ચ સચ્છિષ્યકોઽસ્મ્યહમ્) ।
બ્રહ્મમાત્રમિદં સર્વમસ્મિન્માનોઽસ્મિ તન્મયઃ ॥ ૪૩.૧૮॥

ભેદાભેદં ન પશ્યામિ કાર્યાકાર્યં ન કિઞ્ચન ।
મમૈવ ચેન્નમસ્કારો નિષ્પ્રયોજન એવ હિ ॥ ૪૩.૧૯॥

તવૈવ ચેન્નમસ્કારો ભિન્નત્વાન્ન ફલં ભવેત્ ।
તવ ચેન્મમ ચેદ્ભેદઃ ફલાભાવો ન સંશયઃ ॥ ૪૩.૨૦॥

નમસ્કૃતોઽહં યુષ્માકં ભવાનઙ્ગીતિ વક્ષ્યતિ ।
મમૈવાપકરિષ્યામિ પરિચ્છિન્નો ભવામ્યહમ્ ॥ ૪૩.૨૧॥

મમૈવ ચેન્નમસ્કારઃ ફલં નાસ્તિ સ્વતઃ સ્થિતે ।
કસ્યાપિ ચ નમસ્કારઃ કદાચિદપિ નાસ્તિ હિ ॥ ૪૩.૨૨॥

સદા ચૈતન્યમાત્રત્વાન્નાહં ન ત્વં ન હિ દ્વયમ્ ।
ન બન્ધં ન પરો નાન્યે નાહં નેદં ન કિઞ્ચન ॥ ૪૩.૨૩॥

ન દ્વયં નૈકમદ્વૈતં નિશ્ચિતં ન મનો ન તત્ ।
ન બીજં ન સુખં દુઃખં નાશં નિષ્ઠા ન સત્સદા ॥ ૪૩.૨૪॥

નાસ્તિ નાસ્તિ ન સન્દેહઃ કેવલાત્પરમાત્મનિ ।
ન જીવો નેશ્વરો નૈકો ન ચન્દ્રો નાગ્નિલક્ષણઃ ॥ ૪૩.૨૫॥

ન વાર્તા નેન્દ્રિયો નાહં ન મહત્ત્વં ગુણાન્તરમ્ ।
ન કાલો ન જગન્નાન્યો ન વા કારણમદ્વયમ્ ॥ ૪૩.૨૬॥

નોન્નતોઽત્યન્તહીનોઽહં ન મુક્તસ્ત્વત્પ્રસાદતઃ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૪૩.૨૭॥

અહં બ્રહ્મ ઇદં બ્રહ્મ આત્મ બ્રહ્માહમેવ હિ ।
સર્વં બ્રહ્મ ન સન્દેહસ્ત્વત્પ્રસાદાન્મહેશ્વરઃ ॥ ૪૩.૨૮॥

ત્વમેવ સદ્ગુરુર્બ્રહ્મ ન હિ સદ્ગુરુરન્યતઃ ।
આત્મૈવ સદ્ગુરુર્બ્રહ્મ શિષ્યો હ્યાત્મૈવ સદ્ગુરુઃ ॥ ૪૩.૨૯॥

ગુરુઃ પ્રકલ્પતે શિષ્યો ગુરુહીનો ન શિષ્યકઃ ।
શિષ્યે સતિ ગુરુઃ કલ્પ્યઃ શિષ્યાભાવે ગુરુર્ન હિ ॥ ૪૩.૩૦॥

ગુરુશિષ્યવિહીનાત્મા સર્વત્ર સ્વયમેવ હિ ।
ચિન્માત્રાત્મનિ કલ્પ્યોઽહં ચિન્માત્રાત્મા ન ચાપરઃ ॥ ૪૩.૩૧॥

ચિન્માત્રાત્માહમેવૈકો નાન્યત્કિઞ્ચિન્ન વિદ્યતે ।
સર્વસ્થિતોઽહં સતતં નાન્યં પશ્યામિ સદ્ગુરોઃ ॥ ૪૩.૩૨॥

નાન્યત્પશ્યામિ ચિત્તેન નાન્યત્પશ્યામિ કિઞ્ચન ।
સર્વાભાવાન્ન પશ્યામિ સર્વં ચેદ્દૃશ્યતાં પૃથક્ ॥ ૪૩.૩૩॥

એવં બ્રહ્મ પ્રપશ્યામિ નાન્યદસ્તીતિ સર્વદા ।
અહો ભેદં પ્રકુપિતં અહો માયા ન વિદ્યતે ॥ ૪૩.૩૪॥

અહો સદ્ગુરુમાહાત્મ્યમહો બ્રહ્મસુખં મહત્ ।
અહો વિજ્ઞાનમાહાત્મ્યમહો સજ્જનવૈભવઃ ॥ ૪૩.૩૫॥

અહો મોહવિનાશશ્ચ અહો પશ્યામિ સત્સુખમ્ ।
અહો ચિત્તં ન પશ્યામિ અહો સર્વં ન કિઞ્ચન ॥ ૪૩.૩૬॥

અહમેવ હિ નાન્યત્ર અહમાનન્દ એવ હિ ।
મમાન્તઃકરણે યદ્યન્નિશ્ચિતં ભવદીરિતમ્ ॥ ૪૩.૩૭॥

સર્વં બ્રહ્મ પરં બ્રહ્મ ન કિઞ્ચિદન્યદૈવતમ્ ।
એવં પશ્યામિ સતતં નાન્યત્પશ્યામિ સદ્ગુરો ॥ ૪૩.૩૮॥

એવં નિશ્ચિત્ય તિષ્ઠામિ સ્વસ્વરૂપે મમાત્મનિ ॥ ૪૩.૩૯॥

અગાધ(બોધ)વેદવાક્યતો ન ચાધિભેષજં ભવે-
દુમાધવાઙ્ઘ્રિપઙ્કજસ્મૃતિઃ પ્રબોધમોક્ષદા ।
પ્રબુદ્ધભેદવાસનાનિરુદ્ધહૃત્તમોભિદે
મહારુજાદ્યવૈદ્યમીશ્વરં હૃદમ્બુજે ભજે ॥ ૪૩.૪૦॥

દ્યતત્પ્રદગ્ધકામદેહ દુગ્ધસન્નિભં પ્રમુગ્ધસામિ ।
સોમધારિણં શ્રુતીડ્યગદ્યસંસ્તુતં ત્વભેદ્યમેકશઙ્કરમ્ ॥ ૪૩.૪૧॥

વરઃ કઙ્કઃ કાકો ભવદ્ભયજાતેષુ નિયતં
મહાશઙ્કાતઙ્કૈર્વિધિવિહિતશાન્તેન મનસા ।

યદિ સ્વૈરં ધ્યાયન્નગપતિસુતાનાયકપદં
    સ એવાયં ધુર્યો ભવતિ મુનિજાતેષુ નિયતમ્ ॥ ૪૩.૪૨॥

કઃ કાલાન્તકપાદપદ્મભજનાદન્યદ્વદા કષ્ટદાં
    ધર્માભાસપરમ્પરાં પ્રથયતે મૂર્ખો ખરીં તૌરગીમ્ ।
કર્તું યત્નશતૈરશક્યકરણૈર્વિન્દેત દુઃખાદિકં (દુઃખાધિકં)
    તદ્વત્સામ્બપદામ્બુજાર્ચનરતિં ત્યક્ત્વા વૃથા દુઃખભાક્ ॥ ૪૩.૪૩॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    નિદાઘાનુભવવર્ણનપ્રકરણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥

## ૪૪. નિદાઘાનુભવવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

નિદાઘઃ -
શ્ૃણુષ્વ સદ્ગુરો બ્રહ્મંસ્ત્વત્પ્રસાદાન્વિનિશ્ચિતમ્ ।
અહમેવ હિ તદ્બ્રહ્મ અહમેવ હિ કેવલમ્ ॥ ૪૪.૧॥

અહમેવ હિ નિત્યાત્મા અહમેવ સદાઽજરઃ ।
અહમેવ હિ શાન્તાત્મા અહમેવ હિ નિષ્કલઃ ॥ ૪૪.૨॥

અહમેવ હિ નિશ્ચિન્તઃ અહમેવ સુખાત્મકઃ ।
અહમેવ ગુરુસ્ત્વં હિ અહં શિષ્યોઽસ્મિ કેવલમ્ ॥ ૪૪.૩॥

અહમાનન્દ એવાત્મા અહમેવ નિરઞ્જનઃ ।
અહં તુર્યાતિગો હ્યાત્મા અહમેવ ગુણોજ્ઝિતઃ ॥ ૪૪.૪॥

અહં વિદેહ એવાત્મા અહમેવ હિ શઙ્કરઃ ।
અહં વૈ પરિપૂર્ણાત્મા અહમેવેશ્વરઃ પરઃ ॥ ૪૪.૫॥

અહમેવ હિ લક્ષ્યાત્મા અહમેવ મનોમયઃ ।
અહમેવ હિ સર્વાત્મા અહમેવ સદાશિવઃ ॥ ૪૪.૬॥

અહં વિષ્ણુરહં બ્રહ્મા અહમિન્દ્રસ્ત્વહં સુરાઃ ।
અહં વૈ યક્ષરક્ષાંસિ પિશાચા ગુહ્યકાસ્તથા ॥ ૪૪.૭॥

અહં સમુદ્રાઃ સરિત અહમેવ હિ પર્વતાઃ ।
અહં વનાનિ ભુવનં અહમેવેદમેવ હિ ॥ ૪૪.૮॥

નિત્યતૃપ્તો હ્યહં શુદ્ધબુદ્ધોઽહં પ્રકૃતેઃ પરઃ ।

અહમેવ હિ સર્વત્ર અહમેવ હિ સર્વગઃ ॥ ૪૪.૯॥

અહમેવ મહાનાત્મા સર્વમઙ્ગલવિગ્રહઃ ।
અહમેવ હિ મુક્તોઽસ્મિ શુદ્ધોઽસ્મિ પરમઃ શિવઃ ॥ ૪૪.૧૦॥

અહં ભૂમિરહં વાયુરહં તેજો હ્યહં નભઃ ।
અહં જલમહં સૂર્યશ્ચન્દ્રમા ભગણા હ્યહમ્ ॥ ૪૪.૧૧॥

અહં લોકા અલોકાશ્ચ અહં લોક્યા અહં સદા ।
અહમાત્મા પારદૃશ્ય અહં પ્રજ્ઞાનવિગ્રહઃ ॥ ૪૪.૧૨॥

અહં શૂન્યો અશૂન્યોઽહં સર્વાનન્દમયોઽસ્મ્યહમ્ ।
શુભાશુભફલાતીતો હ્યહમેવ હિ કેવલમ્ ॥ ૪૪.૧૩॥

અહમેવ ઋતં સત્યમહં સચ્ચિત્સુખાત્મકઃ ।
અહમાનન્દ એવાત્મા બહુધા ચૈકધા સ્થિતઃ ॥ ૪૪.૧૪॥

અહં ભૂતભવિષ્યં ચ વર્તમાનમહં સદા ।
અહમેકો દ્વિધાહં ચ બહુધા ચાહમેવ હિ ॥ ૪૪.૧૫॥

અહમેવ પરં બ્રહ્મ અહમેવ પ્રજાપતિઃ ।
સ્વરાટ્સંરાડ્ જગદ્યોનિરહમેવ હિ સર્વદા ॥ ૪૪.૧૬॥

અહં વિશ્વસ્તૈજસશ્ચ પ્રાજ્ઞોઽહં તુર્ય એવ હિ ।
અહં પ્રાણો મનશ્ચાહમહમિન્દ્રિયવર્ગકઃ ॥ ૪૪.૧૭॥

અહં વિશ્વં હિ ભુવનં ગગનાત્માહમેવ હિ ।
અનુપાધિ ઉપાધ્યં યત્તત્સર્વમહમેવ હિ ॥ ૪૪.૧૮॥

ઉપાધિરહિતશ્ચાહં નિત્યાનન્દોઽહમેવ હિ ।
એવં નિશ્ચયવાનન્તઃ સર્વદા સુખમશ્નુતે ।
એવં યઃ શ઼ૃણુયાન્નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪૪.૧૯॥

નિત્યોઽહં નિર્વિકલ્પો જનવનભુવને પાવનોઽહં મનીષી
વિશ્વો વિશ્વાતિગોઽહં પ્રકૃતિવિનિકૃતો એકધા સંસ્થિતોઽહમ્ ।
નાનાકારવિનાશજન્મરહિતસ્વજ્ઞાનકાર્યોજ્ઝિતૈઃ
ભૂમાનન્દઘનોઽસ્મ્યહં પરશિવઃ સત્યસ્વરૂપોઽસ્મ્યહમ્ ॥ ૪૪.૨૦॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
નિદાઘાનુભવવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥

## ૪૫. નિદાઘકૃતગુરુસ્તુતિવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

નિદાઘઃ -
પુણ્યે શિવરહસ્યેઽસ્મિન્નિતિહાસે શિવોદિતે ।
દેવ્યૈ શિવેન કથિતે દેવ્યા સ્કન્દાય મોદતઃ ॥ ૪૫.૧॥

તદેતસ્મિન્હિ ષષ્ઠાંશે ષડાસ્યકમલોદિતે ।
પારમેશ્વરવિજ્ઞાનં શ્રુતમેતન્મહાઘભિત્ ॥ ૪૫.૨॥

મહામાયાતમસ્તોમવિનિવારણભાસ્કરમ્ ।
અસ્યાધ્યાયૈકકથનાદ્વિજ્ઞાનં મહદશ્નુતે ॥ ૪૫.૩॥

શ્લોકસ્ય શ્રવણેનાપિ જીવન્મુક્તો ન સંશયઃ ।
એતદ્ગ્રન્થપ્રવક્તા હિ ષણ્મુખઃ શિવ એવ હિ ॥ ૪૫.૪॥

જૈગીષવ્યો મહાયોગી સ એવ શ્રવણેઽર્હતિ ।
ભસ્મરુદ્રાક્ષધૃઙ્નિત્યં સદા હ્યત્યાશ્રમી મુનિઃ ॥ ૪૫.૫॥

એતદ્ગ્રન્થપ્રવક્તા હિ સ ગુરુર્નાત્ર સંશયઃ ।
એતદ્ગ્રન્થપ્રવક્તા હિ પરં બ્રહ્મ ન સંશયઃ ॥ ૪૫.૬॥

એતદ્ગ્રન્થપ્રવક્તા હિ શિવ એવ ન ચાપરઃ ।
એતદ્ગ્રન્થપ્રવક્તા હિ સાક્ષાદ્દેવી ન સંશયઃ ॥ ૪૫.૭॥

એતદ્ગ્રન્થપ્રવક્તા હિ ગણેશો નાત્ર સંશયઃ ।
એતદ્ગ્રન્થપ્રવક્તા હિ સ્કન્દઃ સ્કન્દિતતારકઃ ॥ ૪૫.૮॥

એતદ્ગ્રન્થપ્રવક્તા હિ નન્દિકેશો ન સંશયઃ ।
એતદ્ગ્રન્થપ્રવક્તા હિ દત્તાત્રેયો મુનિઃ સ્વયમ્ ॥ ૪૫.૯॥

એતદ્ગ્રન્થપ્રવક્તા હિ દક્ષિણામૂર્તિરેવ હિ ।
એતદ્ગ્રન્થાર્થકથને ભાવને મુનયઃ સુરાઃ ॥ ૪૫.૧૦॥

ન શક્તા મુનિશાર્દૂલ ત્વદૃતેઽહં શિવં શપે ।
એતદ્ગ્રન્થાર્થવક્તારં ગુરું સર્વાત્મના યજેત્ ॥ ૪૫.૧૧॥

એતદ્ગ્રન્થપ્રવક્તા તુ શિવો વિઘ્નેશ્વરઃ સ્વયમ્ ।
પિતા હિ જન્મદો દાતા ગુરુર્જન્મવિનાશકઃ ॥ ૪૫.૧૨॥

એતદ્ગ્રન્થં સમભ્યસ્ય ગુરોર્વાક્યાદ્વિશેષતઃ ।

ન દુહ્યેત ગુરું શિષ્યો મનસા કિઞ્ચ કાયતઃ ॥ ૪૫.૧૩॥

ગુરુરેવ શિવઃ સાક્ષાદ્ગુરુરેવ શિવઃ સ્વયમ્ ।
શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ॥ ૪૫.૧૪॥

એતદ્ગ્રન્થપદાભ્યાસે શ્રદ્ધા વૈ કારણં પરમ્ ।
અશ્રદ્ધધાનઃ પુરુષો નૈતલ્લેશમિહાર્હતિ ॥ ૪૫.૧૫॥

શ્રદ્ધૈવ પરમં શ્રેયો જીવબ્રહ્મૈક્યકારણમ્ ।
અસ્તિ બ્રહ્મેતિ ચ શ્રુત્વા ભાવયન્સન્ત એવ હિ ॥ ૪૫.૧૬॥

શિવપ્રસાદહીનો યો નૈતદ્ગ્રન્થાર્થવિદ્ભવેત્ ।
ભાવગ્રાહ્યોઽયમાત્માયં પર એકઃ શિવો ધ્રુવઃ ॥ ૪૫.૧૭॥

સર્વમન્યત્પરિત્યજ્ય ધ્યાયીતેશાનમવ્યયમ્ ।
શિવજ્ઞાનમિદં શુદ્ધં દ્વૈતાદ્વૈતવિનાશનમ્ ॥ ૪૫.૧૮॥

અન્યેષુ ચ પુરાણેષુ ઇતિહાસેષુ ન ક્વચિત્ ।
એતાદૃશં શિવજ્ઞાનં શ્રુતિસારમહોદયમ્ ॥ ૪૫.૧૯॥

ઉક્તં સાક્ષાચ્છિવેનૈતદ્યોગસાઙ્ખ્યવિવર્જિતમ્ ।
ભાવનામાત્રસુલભં ભક્તિગમ્યમનામયમ્ ॥ ૪૫.૨૦॥

મહાનન્દપ્રદં સાક્ષાત્પ્રસાદેનૈવ લભ્યતે ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૪૫.૨૧॥

એતદ્ગ્રન્થં ગુરોઃ શ્રુત્વા ન પૂજાં કુરુતે યદિ ।
શ્વાનયોનિશતં પ્રાપ્ય ચણ્ડાલઃ કોટિજન્મસુ ॥ ૪૫.૨૨॥

એતદ્ગ્રન્થસ્ય માહાત્મ્યં ન યજન્તીશ્વરં હૃદા ।
સ સૂકરો ભવત્યેવ સહસ્રપરિવત્સરાન્ ॥ ૪૫.૨૩॥

એતદ્ગ્રન્થાર્થવક્તારમભ્યસૂયેત યો દ્વિજઃ ।
અનેકબ્રહ્મકલ્પં ચ વિષ્ઠાયાં જાયતે ક્રિમિઃ ॥ ૪૫.૨૪॥

એતદ્ગ્રન્થાર્થવિદ્બ્રહ્મા સ બ્રહ્મ ભવતિ સ્વયમ્ ।
કિં પુનર્બહુનોક્તેન જ્ઞાનમેતદ્વિમુક્તિદમ્ ॥ ૪૫.૨૫॥

યસ્ત્વેતચ્છૃણુયાચ્છિવોદિમહાવેદાન્તામ્બુધિ (?)
 વીચિજાતપુણ્યં નાપેક્ષત્યનિશં ન ચાબ્દકલ્પૈઃ ।
શબ્દાનાં નિખિલો રસો હિ સ શિવઃ કિં વા તુષાદ્રિ

પરિખણ્ડનતો ભવેત્સ્યાત્તણ્ડુલોઽપિ સ મૃષા ભવમોહજાલમ્ ॥ ૪૫.૨૬॥

તદ્વત્સર્વમશાસ્ત્રમિત્યેવ હિ સત્યં
દ્વૈતાત્થં (દ્વૈતોત્થં) પરિહાય વાક્યજાલમ્ ।
એવં ત્વં ત્વનિશં ભજસ્વ નિત્યં
શાન્તોઘખિલવાક્સમૂહભાવના ॥ ૪૫.૨૭॥

સત્યત્વાભાવભાવિતોઽનુરૂપશીલઃ ।
સમ્પશ્યઞ્જગદિદમાસમઞ્જસં સદા હિ ॥ ૪૫.૨૮॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
નિદાઘકૃતગુરુસ્તુતિવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥

## ૪૬. જ્ઞાનોપાયભૂતશિવવ્રતનિરુપણં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

નિદાઘઃ -
એતદ્ગ્રન્થં સદા શ્રુત્વા ચિત્તજાડ્યમકુર્વતઃ ।
યાવદ્દેહં સદાવિત્તૈઃ શુશ્રૂષેત્પૂજયેદ્ગુરુમ્ ॥ ૪૬.૧॥

તત્પૂજયૈવ સતતં અહં બ્રહ્મેતિ નિશ્ચિનુ ।
નિત્યં પૂર્ણોઽસ્મિ નિત્યોઽસ્મિ સર્વદા શાન્તવિગ્રહઃ ॥ ૪૬.૨॥

એતદેવાત્મવિજ્ઞાનં અહં બ્રહ્મેતિ નિર્ણયઃ ।
નિરઙ્કુશસ્વરૂપોઽસ્મિ અતિવર્ણાશ્રમી ભવ ॥ ૪૬.૩॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ સર્વદા ભસ્મધારણમ્ ।
ત્રિયાયુષૈસ્ત્ર્યમ્બકૈશ્ચ કુર્વન્તિ ચ ત્રિપુણ્ડ્રકમ્ ॥ ૪૬.૪॥

ત્રિપુણ્ડ્રધારિણામેવ સર્વદા ભસ્મધારણમ્ ।
શિવપ્રસાદસમ્પત્તિર્ભવિષ્યતિ ન સંશયઃ ॥ ૪૬.૫॥

શિવપ્રસાદાદેતદ્ધૈ જ્ઞાનં સમ્પ્રાપ્યતે ધ્રુવમ્ ।
શિરોવ્રતમિદં પ્રોક્તં કેવલં ભસ્મધારણમ્ ॥ ૪૬.૬॥

ભસ્મધારણમાત્રેણ જ્ઞાનમેતદ્ભવિષ્યતિ ।
અહં વત્સરપર્યન્તં કૃત્વા વૈ ભસ્મધારણમ્ ॥ ૪૬.૭॥

ત્વત્પાદાબ્જં પ્રપન્નોઽસ્મિ ત્વત્તો લબ્ધાત્મનિર્વૃતિઃ ।
સર્વાધારસ્વરૂપોઽહં સચ્ચિદાનન્દમાત્રકમ્ ॥ ૪૬.૮॥

બ્રહ્માત્માહં સુલક્ષણ્યો બ્રહ્મલક્ષણપૂર્વકમ્ ।
આનન્દાનુભવં પ્રાપ્તઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૪૬.૯॥

ગુણરૂપાદિમુક્તોઽસ્મિ જીવન્મુક્તો ન સંશયઃ ।
મૈત્ર્યાદિગુણસમ્પન્નો બ્રહ્મૈવાહં પરો મહાન્ ॥ ૪૬.૧૦॥

સમાધિમાનહં નિત્યં જીવન્મુક્તેષુ સત્તમઃ ।
અહં બ્રહ્માસ્મિ નિત્યોઽસ્મિ સમાધિરિતિ કથ્યતે ॥ ૪૬.૧૧॥

પ્રારબ્ધપ્રતિબન્ધશ્ચ જીવન્મુક્તેષુ વિદ્યતે ।
પ્રારબ્ધવશતો યદ્યત્પ્રાપ્યં ભુઞ્જે સુખં વસ ॥ ૪૬.૧૨॥

દૂષણં ભૂષણં ચૈવ સદા સર્વત્ર સમ્ભવેત્ ।
સ્વસ્વનિશ્ચયતો બુદ્ધ્યા મુક્તોઽહમિતિ મન્યતે ॥ ૪૬.૧૩॥

અહમેવ પરં બ્રહ્મ અહમેવ પરા ગતિઃ ।
એવં નિશ્ચયવાન્નિત્યં જીવન્મુક્તેતિ કથ્યતે ॥ ૪૬.૧૪॥

એતદ્ભેદં ચ સન્ત્યજ્ય સ્વરૂપે તિષ્ઠતિ પ્રભુઃ ।
ઇન્દ્રિયાર્થવિહીનોઽહમિન્દ્રિયાર્થવિવર્જિતઃ ॥ ૪૬.૧૫॥

સર્વેન્દ્રિયગુણાતીતઃ સર્વેન્દ્રિયવિવર્જિતઃ ।
સર્વસ્ય પ્રભુરેવાહં સર્વં મય્યેવ તિષ્ઠતિ ॥ ૪૬.૧૬॥

અહં ચિન્માત્ર એવાસ્મિ સચ્ચિદાન્દવિગ્રહઃ ।
સર્વં ભેદં સદા ત્યક્ત્વા બ્રહ્મભેદમપિ ત્યજેત્ ॥ ૪૬.૧૭॥

અજસ્રં ભાવયન્નિત્યં વિદેહો મુક્ત એવ સઃ ।
અહં બ્રહ્મ પરં બ્રહ્મ અહં બ્રહ્મ જગત્પ્રભુઃ ॥ ૪૬.૧૮॥

અહમેવ ગુણાતીતઃ અહમેવ મનોમયઃ ।
અહં મય્યો મનોમેયઃ પ્રાણમેયઃ સદામયઃ ॥ ૪૬.૧૯॥

સદ્બ્રહ્મયો બ્રહ્મમયોઽમૃતમયઃ
સભૂતોમૃતમેવ (સમ્ભૂતોઽમૃતેવ) હિ ।
અહં સદાનન્દઘનોઽવ્યયઃ સદા ।
સ વેદમય્યો પ્રણવોઽહમીશઃ ॥ ૪૬.૨૦॥

અપાણિપાદો જવનો ગૃહીતા અપશ્યઃ પશ્યામ્યાત્મવત્સર્વમેવ ।
યત્તદ્ભૂતં યચ્ચ ભવ્યોઽહમાત્મા સર્વાતીતો વર્તમાનોઽહમેવ ॥ ૪૬.૨૨॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
જ્ઞાનોપાયભૂતશિવવ્રતનિરૂપણં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥

## ૪૭. ઋભુકૃતસઙ્ગ્રહોપદેશવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ

ઋભુઃ -

નિદાઘ શ‍ૃણુ વક્ષ્યામિ દૃઢીકરણમસ્તુ તે ।
શિવપ્રસાદપર્યન્તમેવં ભાવય નિત્યશઃ ॥ ૪૭.૧॥

અહમેવ પરં બ્રહ્મ અહમેવ સદાશિવઃ ।
અહમેવ હિ ચિન્માત્રમહમેવ હિ નિર્ગુણઃ ॥ ૪૭.૨॥

અહમેવ હિ ચૈતન્યમહમેવ હિ નિષ્કલઃ ।
અહમેવ હિ શૂન્યાત્મા અહમેવ હિ શાશ્વતઃ ॥ ૪૭.૩॥

અહમેવ હિ સર્વાત્મા અહમેવ હિ ચિન્મયઃ ।
અહમેવ પરં બ્રહ્મ અહમેવ મહેશ્વરઃ ॥ ૪૭.૪॥

અહમેવ જગત્સાક્ષી અહમેવ હિ સદ્ગુરુઃ ।
અહમેવ હિ મુક્તાત્મા અહમેવ હિ નિર્મલઃ ॥ ૪૭.૫॥

અહમેવાહમેવોક્તઃ અહમેવ હિ શઙ્કરઃ ।
અહમેવ હિ મહાવિષ્ણુરહમેવ ચતુર્મુખઃ ॥ ૪૭.૬॥

અહમેવ હિ શુદ્ધાત્મા હ્યહમેવ હ્યહં સદા ।
અહમેવ હિ નિત્યાત્મા અહમેવ હિ મત્પરઃ ॥ ૪૭.૭॥

અહમેવ મનોરૂપં અહમેવ હિ શીતલઃ ।
અહમેવાન્તર્યામી ચ અહમેવ પરેશ્વરઃ ॥ ૪૭.૮॥

એવમુક્તપ્રકારેણ ભાવયિત્વા સદા સ્વયમ્ ।
દ્રવ્યોઽસ્તિ ચેન્ન કુર્યાત્તુ વઞ્ચકેન ગુરું પરમ્ ॥ ૪૭.૯॥

કુમ્ભીપાકે સુઘોરે તુ તિષ્ઠત્યેવ હિ કલ્પકાન્ ।
શ્રુત્વા નિદાઘશ્ચોથાય પુત્રદારાન્પ્રદત્તવાન્ ॥ ૪૭.૧૦॥

સ્વશરીરં ચ પુત્રત્વે દત્વા સાદરપૂર્વકમ્ ।
ધનધાન્યં ચ વસ્ત્રાદીન્દત્વાઽતિષ્ઠત્સમીપતઃ ॥ ૪૭.૧૧॥

ગુરોસ્તુ દક્ષિણાં દત્વા નિદાઘસ્તુષ્ટવાનૃભુમ્ ।

સન્તુષ્ટોઽસ્મિ મહાભાગ તવ શુશ્રૂષયા સદા ॥ ૪૭.૧૨॥

બ્રહ્મવિજ્ઞાનમાપ્તોઽસિ સુકૃતાર્થો ન સંશયઃ ।
બ્રહ્મરૂપમિદં ચેતિ નિશ્ચયં કુરુ સર્વદા ॥ ૪૭.૧૩॥

નિશ્ચયાદપરો મોક્ષો નાસ્તિ નાસ્તીતિ નિશ્ચિનુ ।
નિશ્ચયં કારણં મોક્ષો નાન્યત્કારણમસ્તિ વૈ ॥ ૪૭.૧૪॥

સકલભુવનસારં સર્વવેદાન્તસારં
    સમરસગુરુસારં સર્વવેદાર્થસારમ્ ।
સકલભુવનસારં સચ્ચિદાનન્દસારં
    સમરસજયસારં સર્વદા મોક્ષસારમ્ ॥ ૪૭.૧૫॥

સકલજનનમોક્ષં સર્વદા તુર્યમોક્ષં
    સકલસુલભમોક્ષં સર્વસામ્રાજ્યમોક્ષમ્ ।
વિષયરહિતમોક્ષં વિત્તસંશોષમોક્ષં
    શ્રવણમનનમાત્રાદેતદત્યન્તમોક્ષમ્ ॥ ૪૭.૧૬॥

તચ્છુશ્રૂષા ચ ભવતઃ તચ્છુત્વા ચ પ્રપેદિરે ।
એવં સર્વવચઃ શ્રુત્વા નિદાઘઋષિદર્શિતમ્ ।
શુકાદયો મહાન્તસ્તે પરં બ્રહ્મમવાપ્નુવન્ ॥ ૪૭.૧૭॥

શ્રુત્વા શિવજ્ઞાનમિદં ઋભુસ્તદા નિદાઘમાહેત્થં મુનીન્દ્રમધ્યે ।
મુદા હિ તેઽપિ શ્રુતિશબ્દસારં શ્રુત્વા પ્રણમ્યાહુરતીવ હર્ષાત્ ॥ ૪૭.૧૮॥

મુનયઃ -
પિતા માતા ભ્રાતા ગુરુરસિ વયસ્યોઽથ હિતકૃ-
    દવિદ્યાબ્ધેઃ પારં ગમયસિ ભવાનેવ શરણમ્ ।
બલેનાસ્માન્નીત્વા મમ વચનબલેનૈવ સુગમં
    પથં પ્રાપ્યૈવાર્થૈઃ શિવવચનતોઽસ્માન્સુખયસિ ॥ ૪૭.૧૯॥
(બલેનાસ્માંસ્ત્વં વૈ શિવ વચનબલેનૈવ સુગમં
પથં પ્રાપ્યૈવાર્થૈઃ શિવવચનતોઽસ્માન્સુખયસિ) ॥ ૪૭.૧૯॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
    ઋભુકૃતસઙ્ગ્રહોપદેશવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥

## ૪૮. સ્કન્દકૃતશિવવ્રતોપદેશવર્ણનં નામ અષ્ટચત્વારિંશોઽધ્યાયઃ

સ્કન્દઃ -

જ્ઞાનાઙ્ગસાધનં વક્ષ્યે શ‍ૃણુ વક્ષ્યામિ તે હિતમ્ ।
યત્કૃત્વા જ્ઞાનમાપ્નોતિ તત્પ્રસાદાત્પરમેષ્ઠિનઃ
(તત્પ્રાદાત્પરમેષ્ઠિનઃ) ॥ ૪૮.૧॥

જૈગીષવ્ય શ‍ૃણુષ્વૈતત્સાવધાનેન ચેતસા ।
પ્રથમં વેદસમ્પ્રોક્તં કર્માચરણમિષ્યતે ॥ ૪૮.૨॥

ઉપનીતો દ્વિજો વાપિ વૈશ્યઃ ક્ષત્રિય એવ વા ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મધૃક્પૂયતે ત્વઘૈઃ ॥ ૪૮.૩॥

ત્રિયાયુષૈસ્ત્ર્યમ્બકૈશ્ચ ત્રિપુણ્ડ્રં ભસ્મનાઽઽચરેત્ ।
લિઙ્ગાર્ચનપરો નિત્યં રુદ્રાક્ષાન્ધારયન્ક્રમૈઃ ॥ ૪૮.૪॥

કણ્ઠે બાહ્વોર્વક્ષસી ચ માલાભિઃ શિરસા તથા ।
ત્રિપુણ્ડ્રવદ્ધારયેત રુદ્રાક્ષાન્ક્રમશો મુને ॥ ૪૮.૫॥

એકાનનં દ્વિવક્ત્રં વા ત્રિવક્ત્રં ચતુરાસ્યકમ્ ।
પઞ્ચવક્ત્રં ચ ષટ્સપ્ત તથાષ્ટદશકં નવ ॥ ૪૮.૬॥

એકાદશં દ્વાદશં વા તથોર્ધ્વં ધારયેત્ક્રમાત્ ।
ભસ્મધારણમાત્રેણ પ્રસીદતિ મહેશ્વરઃ ॥ ૪૮.૭॥

રુદ્રાક્ષધારણાદેવ નરો રુદ્રત્વમાપ્નુયાત્ ।
ભસ્મરુદ્રાક્ષધૃઙ્મર્ત્યો જ્ઞાનાઙ્ગી ભવતિ પ્રિયઃ ॥ ૪૮.૮॥

રુદ્રાધ્યાયી ભસ્મનિષ્ઠઃ પઞ્ચાક્ષરજપાદરઃ ।
ભસ્મોદ્ધૂલિતદેહોઽયં શ્રીરુદ્રં પ્રજપન્દ્વિજઃ ॥ ૪૮.૯॥

સર્વપાપૈર્વિમુક્તશ્ચ જ્ઞાનનિષ્ઠો ભવેન્મુને ।
ભસ્મસઞ્છન્નસર્વાઙ્ગો ભસ્મભાલત્રિપુણ્ડ્રકઃ ॥ ૪૮.૧૦॥

વેદમૌલિજવાક્યેષુ વિચારાધિકૃતો ભવેત્ ।
નાન્યપુણ્ડ્રધરો વિપ્રો યતિર્વા વિપ્રસત્તમ ॥ ૪૮.૧૧॥

શમાદિનિયમોપેતઃ ક્ષમાયુક્તોઽપ્યસંસ્કૃતઃ ।
શિરોવ્રતમિદં પ્રોક્તં ભસ્મધારણમેવ હિ ॥ ૪૮.૧૨॥

શિરોવ્રતં ચ વિધિવદ્યૈશ્ચીર્ણં મુનિસત્તમ ।

તેષામેવ બ્રહ્મવિદ્યાં વદેત ગુરુરાસ્તિકઃ ॥ ૪૮.૧૩॥

શામ્ભવા એવ વેદેષુ નિષ્ઠા નષ્ટાશુભાઃ પરમ્ ।
શિવપ્રસાદસમ્પન્નો ભસ્મરુદ્રાક્ષધારકઃ ॥ ૪૮.૧૪॥

રુદ્રાધ્યાયજપાસક્તઃ પઞ્ચાક્ષરપરાયણઃ ।
સ એવ વેદવેદાન્તશ્રવણેઽધિકૃતો ભવેત્ ॥ ૪૮.૧૫॥

નાન્યપુણ્ડ્રધરો વિપ્રઃ કૃત્વાપિ શ્રવણં બહુ ।
નૈવ લભ્યેત તજ્જ્ઞાનં પ્રસાદેન વિનેશિતુઃ ॥ ૪૮.૧૬॥

પ્રસાદજનકં શમ્ભોર્ભસ્મધારણમેવ હિ ।
શિવપ્રસાદહીનાનાં જ્ઞાનં નૈવોપજાયતે ॥ ૪૮.૧૭॥

પ્રસાદે સતિ દેવસ્ય વિજ્ઞાનસ્ફુરણં ભવેત્ ।
રુદ્રાધ્યાયજાપિનાં તુ ભસ્મધારણપૂર્વકમ્ ॥ ૪૮.૧૮॥

પ્રસાદો જાયતે શમ્ભોઃ પુનરાવૃત્તિવર્જિતઃ ।
પ્રસાદે સતિ દેવસ્ય વેદાન્તસ્ફુરણં ભવેત્ ॥ ૪૮.૧૯॥

તસ્યૈવાકથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ।
પઞ્ચાક્ષરજપાદેવ પઞ્ચાસ્યધ્યાનપૂર્વકમ્ ॥ ૪૮.૨૦॥

તસ્યૈવ ભવતિ જ્ઞાનં શિવપ્રોક્તમિદં ધ્રુવમ્ ।
સર્વં શિવાત્મકં ભાતિ જગદેતચ્ચરાચરમ્ ॥ ૪૮.૨૧॥

સ પ્રસાદો મહેશસ્ય વિજ્ઞેયઃ શામ્ભવોત્તમૈઃ ।
શિવલિઙ્ગાર્ચનાદેવ પ્રસાદઃ શામ્ભવોત્તમે ॥ ૪૮.૨૨॥

નિયમાદ્બિલ્વપત્રૈશ્ચ ભસ્મધારણપૂર્વકમ્ ।
પ્રસાદો જાયતે શમ્ભોઃ સાક્ષાજ્જ્ઞાનપ્રકાશકઃ ॥ ૪૮.૨૩॥

શિવક્ષેત્રનિવાસેન જ્ઞાનં સમ્યગ્દૃઢં ભવેત્ ।
શિવક્ષેત્રનિવાસે તુ ભસ્મધાર્યધિકારવાન્ ॥ ૪૮.૨૪॥

નક્તાશનાર્ચનાદેવ પ્રીયેત ભગવાન્ભવઃ ।
પ્રદોષપૂજનં શમ્ભોઃ પ્રસાદજનકં પરમ્ ॥ ૪૮.૨૫॥

સોમવારે નિશીથેષુ પૂજનં પ્રિયમીશિતુઃ ।
ભૂતાયાં ભૂતનાથસ્ય પૂજનં પરમં પ્રિયમ્ ॥ ૪૮.૨૬॥

શિવશબ્દોચ્ચારણં ચ પ્રસાદજનકં મહત્ ।
જ્ઞાનાઙ્ગસાધનેષ્વેવં શિવભક્તાર્ચનં મહત્ ॥ ૪૮.૨૭॥

ભક્તાનામર્ચનાદેવ શિવઃ પ્રીતો ભવિષ્યતિ ।
ઇત્યેતત્તં સમાસેન જ્ઞાનાઙ્ગં કથિતં મયા ।
અકૈતવેન ભાવેન શ્રવણીયો મહેશ્વરઃ ॥ ૪૮.૨૮॥

સૂતઃ -
યઃ કોઽપિ પ્રસભં પ્રદોષસમયે બિલ્વીદલાલઙ્કૃતં
લિઙ્ગં તુઙ્ગમપારપુણ્યવિભવૈઃ પશ્યેદથાર્ચેત વા ।
પ્રાપ્તં રાજ્યમવાપ્ય કામહૃદયસ્તુષ્યેદકામો યદિ
મુક્તિદ્વારમપાવૃતં સ તુ લભેચ્છમ્ભોઃ કટાક્ષાઙ્કુરૈઃ ॥ ૪૮.૨૯॥

અચલાતુલરાજકન્યકાકુચલીલામલબાહુજાલમીશમ્ ।
ભજતામનલાક્ષિપાદપદ્મં ભવલીલં ન ભવેત ચિત્તબાલમ્ ॥ ૪૮.૩૦॥

ભસ્મત્રિપુણ્ડ્રરચિતાઙ્ગકબાહુભાલ-
રુદ્રાક્ષજાલકવચાઃ શ્રુતિસૂક્તિમાલાઃ ।
વેદોરુરત્નપદકાઙ્કિતશમ્ભુનામ-
લોલા હિ શામ્ભવવરાઃ પરિશીલયન્તિ ॥ ૪૮.૩૧॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે ઋભુનિદાઘસંવાદે
સ્કન્દકૃતશિવવ્રતોપદેશવર્ણનં નામ અષ્ટચત્વારિંશોઽધ્યાયઃ ॥

## ૪૯. શિવસ્ય જ્ઞાનદાતૃત્વનિરૂપણં નામ એકોનપઞ્ચાશોઽધ્યાયઃ

સ્કન્દઃ -
પુરા મગધદેશીયો બ્રાહ્મણો વેદપારગઃ ।
ઉચથ્યતનયો વાગ્મી વેદાર્થપ્રવણે ધૃતઃ ॥ ૪૯.૧॥

નામ્ના સુદર્શનો વિપ્રાન્પાઠયઞ્શાસ્ત્રમુત્તમમ્ ।
વેદાન્તપરયા ભક્ત્યા વર્ણાશ્રમરતઃ સદા ॥ ૪૯.૨॥

મોક્ષમિચ્છેદપિ સદા વિપ્રોઽપિ ચ જનાર્દનાત્ ।
વિષ્ણુપૂજાપરો નિત્યં વિષ્ણુક્ષેત્રેષુ સંવસન્ ॥ ૪૯.૩॥

ગોપીચન્દનફાલોસૌ તુલસ્યૈવાર્ચયદ્ધરિમ્ ।

ઉવાસ નિયતં વિપ્રો વિષ્ણુધ્યાનપરાયણઃ ॥ ૪૯.૪॥

દશવર્ષમિદં તસ્ય કૃત્યં દૃષ્ટ્વા જનાર્દનઃ ।
મોક્ષેચ્છોરાજુહાવૈનં પુરતોદ્ભૂય તં દ્વિજમ્ ॥ ૪૯.૫॥

વિષ્ણુઃ -
ઔચથ્ય મુનિશાર્દૂલ તપસ્યભિરતઃ સદા ।
વૃણુ કામં દદામ્યેવ વિના જ્ઞાનં દ્વિજોત્તમ ॥ ૪૯.૬॥

સૂતઃ -
ઇતિ વિષ્ણોર્ગિરં શ્રુત્વા વિપ્રઃ કિઞ્ચિદ્ભયાન્વિતઃ ।
પ્રણિપત્યાહ તં વિષ્ણું સ્તુવન્નારાયણેતિ તમ્ ॥ ૪૯.૭॥

સુદર્શનઃ -
વિષ્ણો જિષ્ણો નમસ્તેઽસ્તુ શઙ્ખચક્રગદાધર ।
ત્વત્પાદનલિનં પ્રાપ્તો જ્ઞાનાયાનર્હણઃ કિમુ ॥ ૪૯.૮॥

કિમન્યૈર્ધર્મકામાર્થૈર્નશ્વરૈરિહ શઙ્ખભૃત્ ।
ઇત્યુક્તં તદ્વચઃ શ્રુત્વા વિષ્ણુ પ્રાહ સુદર્શનમ્ ॥ ૪૯.૯॥

વિષ્ણુઃ -
સુદર્શન શૃણુષ્વૈતન્મત્તો નાન્યમના દ્વિજ ।
વદામિ તે હિતં સત્યં મયા પ્રાપ્તં યથા તવ ॥ ૪૯.૧૦॥

મદર્ચનેન ધ્યાનેન મોક્ષેચ્છા જાયતે નૃણામ્ ।
મોક્ષદાતા મહાદેવો જ્ઞાનવિજ્ઞાનદાયકઃ ॥ ૪૯.૧૧॥

તદર્ચનેન સમ્પ્રાપ્તં મયા પૂર્વં સુદર્શનમ્ ।
સહસ્રારં દૈત્યહન્તૃ સાક્ષાત્ર્યક્ષપ્રપૂજયા ॥ ૪૯.૧૨॥

તમારાધય યત્નેન ભસ્મધારણપૂર્વકમ્ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈસ્ત્રિયાયુષત્રિપુણ્ડ્રકૈઃ ॥ ૪૯.૧૩॥

રુદ્રાક્ષધારકો નિત્યં રુદ્રપઞ્ચાક્ષરાદરઃ ।
શિવલિઙ્ગં બિલ્વપત્રૈઃ પૂજયંજ્ઞાનવાન્ભવ ॥ ૪૯.૧૪॥

વસન્ક્ષેત્રે મહેશસ્ય સ્નાહિ તીર્થે ચ શાઙ્કરે ।
અહં બ્રહ્માદયો દેવાઃ પૂજયૈવ પિનાકિનઃ ॥ ૪૯.૧૫॥

બલિનઃ શિવલિઙ્ગસ્ય પૂજયા વિપ્રસત્તમ ।

યસ્ય ભાલતલં મેઽદ્ય ત્રિપુણ્ડ્રપરિચિન્હિતમ્ ॥ ૪૯.૧૬॥

બ્રહ્મેન્દ્રદેવમુનિભિસ્ત્રિપુણ્ડ્રં ભસ્મના ધૃતમ્ ।
પશ્ય વક્ષસિ બાહ્વોર્મે રુદ્રાક્ષાણાં સ્રજં શુભામ્ ॥ ૪૯.૧૭॥

પઞ્ચાક્ષરજપાસક્તો રુદ્રાધ્યાયપરાયણઃ ।
ત્રિકાલમર્ચયામીશં બિલ્વપત્રૈરહં શિવમ્ ॥ ૪૯.૧૮॥

કમલા વિમલા નિત્યં કોમલૈર્બિલ્વપલ્લવૈઃ ।
પૂજયત્યનિશં લિઙ્ગે તથા બ્રહ્માદયઃ સુરાઃ ॥ ૪૯.૧૯॥

મુનયો મનવોઽપ્યેવં તથાન્યે દ્વિજસત્તમાઃ ।
નૃપાસુરાસ્તથા દૈત્યા બલિનઃ શિવપૂજયા ॥ ૪૯.૨૦॥

જ્ઞાનં મોક્ષસ્તથા ભાગ્યં લભ્યતે શઙ્કરાર્ચનાત્ ।
તસ્માત્ત્વમપિ ભક્ત્યૈવ સમારાધય શઙ્કરમ્ ॥ ૪૯.૨૧॥

પશવો વિષ્ણુવિધયસ્તથાન્યે મુનયઃ સુરાઃ ।
સર્વેષાં પતિરીશાનસ્તત્પ્રસાદાદ્વિમુક્તિભાક્ ॥ ૪૯.૨૨॥

પ્રસાદજનકં તસ્ય ભસ્મધારણમેવ હિ ।
પ્રસાદજનકં તસ્ય મુને રુદ્રાક્ષધારણમ્ ॥ ૪૯.૨૩॥

પ્રસાદજનકસ્તસ્ય રુદ્રાધ્યાયજપઃ સદા ।
પ્રસાદજનકસ્તસ્ય પઞ્ચાક્ષરજપો દ્વિજ ॥ ૪૯.૨૪॥

પ્રસાદજનકં તસ્ય શિવલિઙ્ગૈકપૂજનમ્ ।
પ્રસાદે શામ્ભવે જાતે ભુક્તિમુક્તી કરે સ્થિતે ॥ ૪૯.૨૫॥

તસ્ય ભક્ત્યૈવ સર્વેષાં મોચનં ભવપાશતઃ ।
તસ્ય પ્રીતિકરં સાક્ષાદ્બિલ્વૈર્લિઙ્ગસ્ય પૂજનમ્ ॥ ૪૯.૨૬॥

તસ્ય પ્રીતિકરં સાક્ષાચ્છિવક્ષેત્રેષુ વર્તનમ્ ।
તસ્ય પ્રીતિકરં સાક્ષાત્ શિવતીર્થનિષેવણમ્ ॥ ૪૯.૨૭॥

તસ્ય પ્રીતિકરં સાક્ષાદ્ભસ્મરુદ્રાક્ષધારણમ્ ।
તસ્ય પ્રીતિકરં સાક્ષાત્પ્રદોષે શિવપૂજનમ્ ॥ ૪૯.૨૮॥

તસ્ય પ્રીતિકરં સાક્ષાદ્રુદ્રપઞ્ચાક્ષરાવૃતિઃ ।
તસ્ય પ્રીતિકરં સાક્ષાચ્છિવભક્તજનાર્ચનમ્ ॥ ૪૯.૨૯॥

તસ્ય પ્રીતિકરં સાક્ષાત્સોમે સાયન્તનાર્ચનમ્ ।
તસ્ય પ્રીતિકરં સાક્ષાત્તન્નિર્માલ્યૈકભોજનમ્ ॥ ૪૯.૩૦ ॥

તસ્ય પ્રીતિકરં સાક્ષાદષ્ટમીષ્વર્ચનં નિશિ ।
તસ્ય પ્રીતિકરં સાક્ષાચ્ચતુર્દશ્યર્ચનં નિશિ ॥ ૪૯.૩૧ ॥

તસ્ય પ્રીતિકરં સાક્ષાત્તન્નામ્નાં સ્મૃતિરેવ હિ ।
એતાવાનેન ધર્મો હિ શમ્ભોઃ પ્રિયકરો મહાન્ ॥ ૪૯.૩૨ ॥

અન્યદભ્યુદયં વિપ્ર શ્રુતિસ્મૃતિષુ કીર્તિતમ્ ।
ધર્મો વર્ણાશ્રમપ્રોક્તો મુનિભિઃ કથિતો મુને ॥ ૪૯.૩૩ ॥

અવિમુક્તે વિશેષેણ શિવો નિત્યં પ્રકાશતે ।
તસ્માત્કાશીતિ તત્પ્રોક્તં યતો હીશઃ પ્રકાશતે ॥ ૪૯.૩૪ ॥

તત્રૈવામરણં તિષ્ઠેદિતિ જાબાલિકી શ્રુતિઃ ।
તત્ર વિશ્વેશ્વરે લિઙ્ગે નિત્યં બ્રહ્મ પ્રકાશતે ॥ ૪૯.૩૫ ॥

તત્રાન્નપૂર્ણા સર્વેષાં ભુક્ત્યન્નં સમ્પ્રયચ્છતિ ।
તત્રાસ્તિ મણિકર્ણાખ્યં મણિકુણ્ડં વિનિર્મિતમ્ ॥ ૪૯.૩૬ ॥

જ્ઞાનોદયોઽપિ તત્રાસ્તિ સર્વેષાં જ્ઞાનદાયકઃ ।
તત્ર યાહિ મયા સાર્ધં તત્રૈવ વસ વૈ મુને ॥ ૪૯.૩૭ ॥

તત્રાન્તે મોક્ષદં જ્ઞાનં દદાતીશ્વર એવ હિ ।
ઇત્યુક્ત્વા તેન વિપ્રેણ યયૌ કાશીં હરિઃ સ્વયમ્ ॥ ૪૯.૩૮ ॥

સ્નાત્વા તીર્થે ચક્રસંજ્ઞે જ્ઞાનવાપ્યાં હરિદ્વિજઃ ।
તં દ્વિજં સ્નાપયામાસ ભસ્મનાપાદમસ્તકમ્ ॥ ૪૯.૩૯ ॥

ધૃતત્રિપુણ્ડ્રરુદ્રાક્ષં કૃત્વા તં ચ સુદર્શનમ્ ।
પૂજયચ્ચાથ વિશ્વેશં પૂજયામાસ ચ દ્વિજાન્ ॥ ૪૯.૪૦ ॥

બિલ્વૈર્ગન્ધાક્ષતૈર્દીપૈર્નૈવેદ્યૈશ્ચ મનોહરૈઃ ।
તુષ્ટાવ પ્રણિપત્યૈવં સ દ્વિજો મધુસૂદનઃ ॥ ૪૯.૪૧ ॥

સુદર્શનવિષ્ણૂ -
ભજ ભજ ભસિતાનલોજ્વલાક્ષં ભુજગાભોગભુજઙ્ગસઙ્ગહસ્તમ્ ।
ભવભીમમહોગ્રરુદ્રમીડ્યં ભવભર્જકતર્જકં મહૈનસામ્ ॥ ૪૯.૪૨ ॥

વેદઘોષભટખાટકાવધૃગ્દેહદાહદહનામલ કાલ ।

જૂટકોટિસુજટાતટિદુધદ્રાગરઞ્જિતટિનીશશિમૌલે ॥ ૪૯.૪૩॥

શમ્બરાઙ્ગવરભૂષ પાહિ મામમ્બરાન્તરચરસ્ફુટવાહ ।
વારિજાદ્યઘનઘોષ શઙ્કર ત્રાહિ વારિજભવેડ્ય મહેશ ॥ ૪૯.૪૪॥

મદગજવરકૃત્તિવાસ શમ્ભો મધુમદનાક્ષિસરોરુહાર્ચ્યપાદ ।
યમમદદમનાન્ધશિક્ષ શમ્ભો પુરહર પાહિ દયાકટાક્ષસારૈઃ ॥ ૪૯.૪૫॥

અપાં પુષ્પં મૌલૌ હિમભયહરઃ ભાલનયનઃ
    જટાજૂટે ગઙ્ગાડમ્બુજવિકસનઃ સવ્યનયનઃ ।
ગરં કણ્ઠે યસ્ય ત્રિભુવનગુરોઃ શમ્બરહર
    મતઙ્ગોદ્યત્કૃત્તેર્ભવહરણપાદાબ્જભજનમ્ ॥ ૪૯.૪૬॥

શ્રીબિલ્વમૂલશિતિકણ્ઠમહેશલિઙ્ગં
    બિલ્વામ્બુજોત્તમવરૈઃ પરિપૂજ્ય ભક્ત્યા ।
સ્તમ્બેરમાઙ્ગવદનોત્તમસઙ્ગભઙ્ગ
    રાજદ્વિષાઙ્ગપરિસઙ્ગમહેશશાઙ્ગમ્ ॥ ૪૯.૪૭॥

યો ગૌરીરમણાર્ચનોદ્યતમતિર્ભૂયો ભવેચ્છામ્ભવો
    ભક્તો જન્મપરમ્પરાસુ તુ ભવેન્મુક્તોડથ મુક્ત્યઙ્ગના-
    કાન્તસ્વાન્તનિતાન્તશાન્તહૃદયે કાર્તાન્તવાર્તોજ્ઝિતઃ ।
વિષ્ણુબ્રહ્મસુરેન્દ્રરઞ્જિતમુમાકાન્તાઙ્ઘ્રિપઙ્કેરુહ-
    ધ્યાનાનન્દનિમગ્નસર્વહૃદયઃ કિઞ્ચિન્ન જાનાત્યપિ ॥ ૪૯.૪૮॥

કામારાતિપદામ્બુજાર્ચનરતઃ પાપાનુતાપાધિક-
    વ્યાપારપ્રવણપ્રકીર્ણમનસા પુણ્યૈરગણ્યૈરપિ ।
નો દૂયેત વિશેષસન્તતિમહાસારાનુકારાદરા-
    દારાગ્રાહકુમારમારસુશરાઘાઘાતભીતૈરપિ ॥ ૪૯.૪૯॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે વિષ્ણૂચથ્યસંવાદે
    શિવસ્ય જ્ઞાનદાતૃત્વનિરૂપણં નામ એકોનપઞ્ચાશોડધ્યાયઃ ॥

## ૫૦. સુદર્શનસ્ય મુક્તિલાભવર્ણનં અંશશ્રવણફલનિરૂપણં ચ નામ પઞ્ચાશોડધ્યાયઃ

સ્કન્દઃ -
વિષ્ણુસ્તવાન્તે વિપ્રોડસૌ સુદર્શનસમાહ્વયઃ ।
સ્નાત્વાડથ મણિકર્ણ્યાં સ ભસ્મરુદ્રાક્ષભૂષણઃ ॥ ૫૦.૧॥

સઞ્જપઞ્શતરુદ્રીયં પઞ્ચાક્ષરપરાયણઃ ।
સમ્પાદ્ય બિલ્વપત્રાણિ કમલાન્યમલાન્યપિ ॥ ૫૦.૨॥

ગન્ધાક્ષતૈર્ધૂપદીપૈર્નૈવેદ્યૈર્વિવિધૈરપિ ।
વિષ્ણૂપદિષ્ટમાર્ગેણ નિત્યમન્તર્ગૃહસ્ય હિ ॥ ૫૦.૩॥

પ્રદક્ષિણં ચકારાસૌ લિઙ્ગાન્યભ્યર્ચયંસ્તથા ।
વિશ્વેશ્વરાવિમુક્તેશૌ વીરેશં ચ ત્રિલોચનમ્ ॥ ૫૦.૪॥

કૃત્તિવાસં વૃદ્ધકાલે કેદારં શૂલટઙ્કકમ્ ।
રત્નેશં ભારભૂતેશં ચન્દ્રેશં સિદ્ધકેશ્વરમ્ ॥ ૫૦.૫॥

ઘણ્ટાકર્ણેશ્વરં ચૈવ નારદેશં યમેશ્વરમ્ ।
પુલસ્તિપુલહેશં ચ વિકર્ણેશં ફલેશ્વરમ્ ॥ ૫૦.૬॥

કદ્રુદ્રેશમખણ્ડેશં કેતુમાલિં ગભસ્તિકમ્ ।
યમુનેશં વર્ણકેશં ભદ્રેશં જ્યેષ્ઠશઙ્કરમ્ ॥ ૫૦.૭॥

નન્દિકેશં ચ રામેશં કરમર્દેશ્વરં તથા ।
આવર્દેશં મતઙ્ગેશં વાસુકીશં દ્રુતીશ્વરમ્ ॥ ૫૦.૮॥

સૂર્યેશમર્યમેશં ચ તૂણીશં ગાલવેશ્વરમ્ ।
કણ્વકાત્યાયનેશં ચ ચન્દ્રચૂડેશ્વરં તથા ॥ ૫૦.૯॥

ઉદાવર્તેશ્વરં ચૈવ તૃણજ્યોતીશ્વરં સદા ।
કઙ્કણેશં તઙ્કણેશં સ્કન્દેશં તારકેશ્વરમ્ ॥ ૫૦.૧૦॥

જમ્બુકેશં ચ જ્ઞાનેશં નન્દીશં ગણપેશ્વરમ્ ।
એતાન્યન્તર્ગૃહે વિપ્રઃ પૂજયન્પરયા મુદા ॥ ૫૦.૧૧॥

ઢુણ્ઢ્યાદિગણપાંશ્ચૈવ ભૈરવં ચાપિ નિત્યશઃ ।
અન્નપૂર્ણામન્નદાત્રીં સાક્ષાલ્લોકૈકમાતરમ્ ॥ ૫૦.૧૨॥

દણ્ડપાણિં ક્ષેત્રપાલં સમ્યગભ્યર્ચ્ય તસ્થિવાન્ ।
તીર્થાન્યન્યાન્યપિ મુનિર્મણિકર્ણ્યાદિ સત્તમ ॥ ૫૦.૧૩॥

જ્ઞાનોદં સિદ્ધકૂપં ચ વૃદ્ધકૂપં પિશાચકમ્ ।
ઋણમોચનતીર્થં ચ ગર્ગતીર્થં મહત્તરમ્ ॥ ૫૦.૧૪॥

સ્નાત્વા સનિયમં વિપ્રો નિત્યં પઞ્ચનદે હૃદે ।

કિરણાં ધૂતપાપાં ચ પઞ્ચગઙ્ગામપિ દ્વિજઃ ॥ ૫૦.૧૫॥

ગઙ્ગાં મનોરમાં તુઙ્ગાં સર્વપાપપ્રણાશિનીમ્ ।
મુક્તિમણ્ટપમાસ્થાય સ જપઞ્શતરુદ્રિયમ્ ॥ ૫૦.૧૬॥

અષ્ટોત્તરસહસ્રં વૈ જપન્પઞ્ચાક્ષરં દ્વિજઃ ।
પક્ષે પક્ષે તથા કુર્વન્પઞ્ચક્રોશપ્રદક્ષિણમ્ ॥ ૫૦.૧૭॥

અન્તર્ગૃહાદ્બહિર્દેશે ચકારાવસથં તદા ।
એવં સંવસતસ્તસ્ય કાલો ભૂયાનવર્તત ॥ ૫૦.૧૮॥

તત્ર દૃષ્ટ્વા તપોનિષ્ઠં સુદર્શનસમાહ્વયમ્ ।
વિષ્ણુસ્તદા વૈ તં વિપ્રં સમાહૂય શિવાર્ચકમ્ ॥ ૫૦.૧૯॥

પુનઃ પ્રાહ પ્રસન્નેન ચેતસા મુનિસત્તમમ્ ।
વિષ્ણુઃ -
ભોઃ સુદર્શનવિપ્રેન્દ્ર શિવાર્ચનપરાયણ ।
જ્ઞાનપાત્રં ભવાનેવ વિશ્વેશકૃપયાઽધુના ॥ ૫૦.૨૦॥

ત્વયા તપાંસિ તપ્તાનિ ઇષ્ટા યજ્ઞાસ્ત્વયૈવ હિ ।
અધીતાશ્ચ ત્વયા વેદાઃ કાશ્યાં વાસો યતસ્તવ ॥ ૫૦.૨૧॥

બહુભિર્જન્મભિર્યેન કૃતં ક્ષેત્રે મહત્તપઃ ।
તસ્યૈવ સિદ્ધ્યત્યમલા કાશીયં મુક્તિકાશિકા ॥ ૫૦.૨૨॥

તવ ભાગ્યસ્ય નાન્તોઽસ્તિ મુને ત્વં ભાગ્યવાનસિ ।
કિઞ્ચૈકં તવ વક્ષ્યામિ હિતમાત્યન્તિકં શ‍ૃણુ ॥ ૫૦.૨૩॥

વિશ્વેશકૃપયા તેઽદ્ય મુક્તિરન્તે ભવિષ્યતિ ।
રુદ્રાક્ષનામપુણ્યં યન્નામ્નાં સાહસ્રમુત્તમમ્ ॥ ૫૦.૨૪॥

ઉપદેક્ષ્યામિ તે વિપ્ર નામસાહસ્રમીશિતુઃ ।
તેનાર્ચયેશં વિશ્વેશં બિલ્વપત્રૈર્મનોહરૈઃ ॥ ૫૦.૨૫॥

વર્ષમેકં નિરાહારો વિશ્વેશં પૂજયન્સદા ।
સંવત્સરાન્તે મુક્તસ્ત્વં ભવિષ્યતિ ન સંશયઃ ॥ ૫૦.૨૬॥

ત્વદ્દેહાપગમે મન્ત્રં પઞ્ચાક્ષરમનુત્તમમ્ ।
દદાતિ દેવો વિશ્વેશસ્તેન મુક્તો ભવિષ્યતિ ॥ ૫૦.૨૭॥

શૈવેભ્યઃ સન્નજીવેભ્યો દદાતીમં મહામનુમ્ ।

સ્કન્દઃ -
ઇતિ વિષ્ણુવચઃ શ્રુત્વા પ્રણમ્યાહ હરિં તદા ।
સુદર્શનો યથાચેત્થં નામ્નાં સાહસ્રમુત્તમમ્ ॥ ૫૦.૨૮॥

ભગવન્દૈત્યવૃન્દઘ્ન વિષ્ણો જિષ્ણો નમોઽસ્તુ તે ।
સહસ્રનામ્નાં યદ્દિવ્યં વિશ્વેશસ્યાશુ તદ્વદ ॥ ૫૦.૨૯॥

યેન જપ્તેન દેવેશઃ પૂજિતો બિલ્વપત્રકૈઃ ।
દદાતિ મોક્ષસામ્રાજ્યં દેહાન્તે તદ્વદાશુ મે ॥ ૫૦.૩૦॥

તદા વિપ્રવચઃ શ્રુત્વા તસ્મૈ ચોપાદિશત્સ્વયમ્ ।
સહસ્રનામ્નાં દેવસ્ય હિરણ્યસ્યેત્યાદિ સત્તમ ॥ ૫૦.૩૧॥

તેન સમ્પૂજ્ય વિશ્વેશં વર્ષમેકમતન્દ્રિતઃ ।
કોમલારક્તબિલ્વૈશ્ચ સ્તોત્રેણાનેન તુષ્ટુવે ॥ ૫૦.૩૨॥

સુદર્શનઃ -
આશીવિષાઙ્ગપરિમણ્ડલકણ્ઠભાગ-
    રાજત્સુસાગરભવોગ્રવિષોરુશોભ ।
ભાલસ્ફુરજ્જ્વલનદીપ્તિવિદીપિતાશા-
    શોકાવકાશ તપનાક્ષ મૃગાઙ્કમૌલે ॥ ૫૦.૩૩॥

ક્રુદ્ધોડુજાયાપતિધૃતાર્ધશરીરશોભ
    પાહ્યાશુ શાસિતમખાન્ધકદક્ષશત્રો ।
સુત્રામવજ્રકરદણ્ડવિખણ્ડિતોરુપક્ષા-
    દ્યક્ષિતિધરોર્ધ્વશયાવ શમ્ભો ॥ ૫૦.૩૪॥

ઉત્ફુલ્લહલ્લકલસત્કરવીરમાલા-
    ભ્રાજત્સુકન્ધરશરીર પિનાકપાણે ।
ચઞ્ચત્સુચન્દ્રકલિકોત્તમચારુમૌલિં
    લિઙ્ગે કુલુઞ્ચપતિમમ્બિકયા સમેતમ્ ॥ ૫૦.૩૫॥

છાયાધવાનુજલસચ્છદનૈઃ પરિપૂજ્ય ભક્ત્યા
    મુક્તેન સ્વસ્ય ચ વિરાજિતવંશકોટ્યા ।
સાયં સઙ્ગવપુઙ્ગવોરુવહનં શ્રીતુઙ્ગલિઙ્ગાર્ચકઃ
    શાઙ્ગઃ પાતકસઙ્ગભઙ્ગચતુરશ્ચાસઙ્ગનિત્યાન્તરઃ ॥ ૫૦.૩૬॥

ભાલાક્ષસ્ફુરદક્ષિજસ્ફુરદુરુસ્ફૂલિઙ્ગદગ્ધાઙ્ગકા-

નઙ્ગોત્તુઙ્ગમતઙ્ગકૃત્તિવસનં લિઙ્ગં ભજે શાઙ્કરમ્ ।
અચ્છાચ્છાગવહાં સુરતામીક્ષાશિનાન્તે વિભો
વૃષ્યં શાઙ્કરવાહનામનિરતાઃ સોમં તથા વાજિનમ્ ॥ ૫૦.૩૭॥

ત્યક્ત્વા જન્મવિનાશનં ત્વિતિ મુહુસ્તે જિહ્વયા સત્તમાઃ ।
યે શમ્ભોઃ સકૃદેવ નામનિરતાઃ શાઙ્ગાઃ સ્વતઃ પાવનાઃ ॥ ૫૦.૩૮॥

મૃગાઙ્ક મૌલિમીશ્વરં મૃગેન્દ્રશત્રુજત્વચમ્ ।
વસાનમિન્દુસપ્રભં મૃગાદ્યબાલસત્કરમ્ ।
ભજે મૃગેન્દ્રસપ્રભં .... ॥ ૫૦.૩૯॥

સ્કન્દઃ -
એવં સ્તુવન્તં વિશ્વેશં સુદર્શનમતન્દ્રિતમ્ ।
પ્રાહેત્થં શૌરિમાભાષ્ય શમ્ભોર્ભક્તિવિવર્ધનમ્ ॥ ૫૦.૪૦॥

વિષ્ણુઃ -
અત્રૈવામરણં વિપ્ર વસ ત્વં નિયતાશનઃ ।
નામ્નાં સહસ્રં પ્રજપઞ્શતરુદ્રીયમેવ ચ ॥ ૫૦.૪૧॥

અન્તર્ગૃહાદ્બહિઃ સ્થિત્વા પૂજયાશુ મહેશ્વરમ્ ।
તવાન્તે ભૂરિકરુણો મોક્ષં દાસ્યત્યસંશયમ્ ॥ ૫૦.૪૨॥

સ પ્રણમ્યાહ વિશ્વેશં દૃષ્ટ્વા પ્રાહ સુદર્શનમ્ ।
ધન્યસ્ત્વં લિઙ્ગેઽપ્યનુદિનગલિતસ્વાન્તરઙ્ગાઘસઙ્ઘઃ
પુંસાં વર્યાદ્યભક્ત્યા યમનિયમવરૈર્વિશ્વવન્દ્યં પ્રભાતે ।
દત્વા બિલ્વવરં સદમ્બુજદલં કિઞ્ચિજ્જલં વા મુહુઃ
પ્રાપ્નોતીશ્વરપાદપઙ્કજમુમાનાથાદ્ય મુક્તિપ્રદમ્ ॥ ૫૦.૪૩॥

કો વા ત્વત્સદૃશો ભવેદગપતિપ્રેમૈકલિઙ્ગાર્ચકો
મુક્તાનાં પ્રવરોર્ધ્વકેશવિલસચ્છ્રીભક્તિબીજાઙ્કુરૈઃ ।
દેવા વાપ્યસુરાઃ સુરા મુનિવરા ભારા ભુવઃ કેવલં
વીરા વા કરવીરપુષ્પવિલસન્માલાપ્રદે નો સમઃ ॥ ૫૦.૪૪॥

વને વા રાજ્યે વાપ્યગપતિસુતાનાયકમહો
સ્ફુરલ્લિઙ્ગાર્ચાયાં નિયમમતભાવેન મનસા ।
હરં ભક્ત્યા સાધ્ય ત્રિભુવનતૃણાડમ્બરવર-
પ્રરૂઢૈર્ભાગ્યૈર્વા ન હિ ખલુ સ સજ્જેત ભુવને ॥ ૫૦.૪૫॥

ન દાનૈર્યોગૈર્વા વિધિવિહિતવર્ણાશ્રમભરૈ-
રપારૈર્વેદાન્તપ્રતિવચનવાક્યાનુસરણૈઃ ।
ન મન્યેઽહં સ્વાન્તે ભવભજનભાવેન મનસા
મુહુર્લિઙ્ગં શાઙ્ગં ભજતિ પરમાનન્દકુહરઃ ॥ ૫૦.૪૬॥

શર્વં પરવતનન્દિનીપતિમહાનન્દામ્બુધેઃ પારગા
રાગત્યાગહૃદા વિરાગપરમા ભસ્માઙ્ગરાગાદરાઃ ।
મારાપારશરાભિઘાતરહિતા ધીરોરુધારારસૈઃ
પારાવારમહાઘસંસૃતિભરં તીર્ણાઃ શિવાભ્યર્ચનાત્ ॥ ૫૦.૪૭॥

માર્કણ્ડેયસુતં પુરાઽન્તકભયાદ્યોઽરક્ષદીશો હર-
સ્તત્પાદામ્બુજરાગરઞ્જિતમના નાપ્નોતિ કિં વા ફલમ્ ।
તં મૃત્યુઞ્જયમઞ્જસા પ્રણમતામોજોજિમધ્યે જયં
જેતારોતપરાજયો (જેતાવેત્યપરાજિતો)
જનિજરારોગૈર્વિમુક્તિં લભેત્ ॥ ૫૦.૪૮॥

ભૂતાયાં ભૂતનાથં ત્વઘમતિતિલકાકારભિલ્લોત્થશલ્યૈઃ
ધાવન્ભલ્લૂકપૃષ્ઠે નિશિ કિલ સુમહદ્વ્યાઘ્રભીત્યાઽરુરોહ ।
બિલ્વં નલ્વપ્રભં તચ્છદઘનમસકૃત્પાતયામાસ મૂલે
નિદ્રાતન્દ્રોજ્ઝિતોઽસૌ મૃગગણકલને
મૂલલિઙ્ગેઽથ શાઙ્ગે ॥ ૫૦.૪૯॥

તેનાભૂદ્ભગવાન્ ગણોત્તમવરો મુક્તાઘસઙ્ઘસ્તદા
ચણ્ડાંશોસ્તનયેન પૂજિતપદઃ સારૂપ્યમાપેશિતુઃ ।
ગઙ્ગાચન્દ્રકલાકપર્દવિલસત્ભાલસ્ફુલિઙ્ગોજ્જ્વલ-
દ્વાલન્યઙ્કુકરાગ્રસઙ્ગતમહાશૂલાહિ
ટઙ્કોદ્ધતઃ (કણ્ઠોદ્ધતઃ) ॥ ૫૦.૫૦॥

ચૈત્રે ચિત્રૈઃ પાતકૈર્વિપ્રમુક્તો વૈશાખે વૈ દુઃખશાખાવિમુક્તઃ ।
જ્યેષ્ઠે શ્રેષ્ઠો ભવતેષાઢમાસિ પુત્રપ્રાપ્તિઃ
શ્રાવણે શ્રાન્તિનાશઃ ॥ ૫૦.૫૧॥

ભાદ્રે ભદ્રો ભવતે ચાશ્વિને વૈ અશ્વપ્રાપ્તિઃ કાર્તિકે કીર્તિલાભઃ ।
માર્ગે મુક્તેર્માર્ગમેતલ્લભેત પુષ્યે પુણ્યં માઘકે ચાઘનાશઃ ॥ ૫૦.૫૨॥

ફલ્ગુ ત્વંહો ફાલ્ગુને માસિ નશ્યે-
દીશાર્ચાતો બિલ્વપત્રૈશ્ચલિઙ્ગે ।

એવં તત્તન્માસિ પૂજયેશલિઙ્ગં
  ચિત્રૈઃ પાપૈર્વિપ્રમુક્તો દ્વિજેન્દ્રઃ ॥ ૫૦.૫૩॥

દૂર્વાઙ્કુરૈરભિનવૈઃ શશિધામચૂડ-
  લિઙ્ગાર્ચનેન પરિશેષયદઙ્કુરાણિ ।
સંસારઘોરતરરૂપકરાણિ સદ્યો
  મુક્ત્યઙ્કુરાણિ પરિવર્ધયતીહ ધન્યઃ ॥ ૫૦.૫૪॥

ગોક્ષીરેક્ષુક્ષૌદ્રખણ્ડાજ્યદધ્ના
  સન્નારેલૈઃ પાનસામ્રાદિસારૈઃ ।
વિશ્વેશાનં સત્સિતારત્નતોયૈ-
  ર્ગન્ધોદૈર્વા સિઞ્ચ્ય દોષૈર્વિમુક્તઃ ॥ ૫૦.૫૫॥

લિઙ્ગં ચન્દનલેપસઙ્ગતમુમાકાન્તસ્ય પશ્યન્તિ યે
  તે સંસારભુજઙ્ગભઙ્ગપતનાનઙ્ગાઙ્ગસઙ્ગોજ્ઝિતાઃ ।
વ્યઙ્ગં સર્વસમર્ચનં ભગવતઃ સાઙ્ગં ભવેચ્છાઙ્કુરં
  શઙ્ગાપાઙ્ગકૃપાકટાક્ષલહરી તસ્મિંશ્ચિરં તિષ્ઠતિ ॥ ૫૦.૫૬॥

મુરલિસરલિરાગૈર્મર્દલૈસ્તાલશઙ્ખૈઃ
  પટુપટહનિનાદધ્વાન્તસન્ધાનઘોષૈઃ ।
દુન્દુભ્યાઘાતવાદૈર્વરયુવતિમહાનૃત્તસંરમ્ભરઙ્ગૈઃ
  દર્શેષ્વાદર્શદર્શો ભગવતિ ગિરિજાનાયકે મુક્તિહેતુઃ ॥ ૫૦.૫૭॥

સ્વચ્છચ્છત્રછવીનાં વિવિધજિતમહાચ્છાયયા છન્નમૈશં
  શીર્ષં વિચ્છિન્નપાપો ભવતિ ભવહરઃ પૂજકઃ શમ્ભુભક્ત્યા ।
ચઞ્ચચ્ચન્દ્રાભકાણ્ડપ્રવિલસદમલસ્વર્ણરત્નાગ્રભાભિ-
  ર્દીપ્યચ્ચામરકોટિભિઃ સ્ફુટપટઘટિતૈશ્ચાકચક્યૈઃ પતાકૈઃ ॥ ૫૦.૫૮॥

સમ્પશ્યારુણભૂરુહોત્તમશિખાસંલેઢિતારાગણં
  તારાનાથકલાધરોરુસુમહાલિઙ્ગૌઘસંસેવિતમ્ ।
બિલ્વાનાં કુલમેતદત્ર સુમહાપાપૌઘસંહારકૃ-
  દ્વારાણાં નિખિલપ્રમોદજનકં શમ્ભોઃ પ્રિયં કેવલમ્ ॥ ૫૦.૫૯॥

અન્નં પોત્રિમલાયતે ધનરસં કૌલેયમૂત્રાયતે
સંવેશો નિગલાયતે મમ સદાનન્દો કન્દાયતે ।
શમ્ભો તે સ્મરણાન્તરાયભરિત પ્રાણઃ કૃપાણાયતે ॥ ૫૦.૬૦॥

કઃ કલ્પદ્રુમુપેક્ષ્ય ચિત્તફલદં તૂલાદિદાનક્ષયં
    બબ્બૂલં પરિસેવતે ક્ષુદધિકો વાતૂલદાનક્ષમમ્ ।
તદ્વચ્છઙ્કરકિઙ્કરો વિધિહરિબ્રહ્મેન્દ્રચન્દ્રાનલા-
    ન્સેવેદ્યો વિધિવઞ્ચિતઃ કલિબલપ્રાચુર્યતો મૂઢધીઃ ॥ ૫૦.૬૧॥

સુવર્ણાણ્ડોદ્ભૂતસ્તુતિગતિસમર્ચ્યાણ્ડજવર-
    પ્રણદં (પ્રપાદં) ત્વાં કશ્ચિદ્ભજતિ ભુવને ભક્તિપરમઃ ।
મહાચણ્ડોદ્દણ્ડપ્રકટિતભુવં તાણ્ડવપરં
    વિભું સન્તં નિત્યં ભજ ભગણનાથામલજટમ્ ॥ ૫૦.૬૨॥

અજગવકર વિષ્ણુબાણ શમ્ભો દુરિતહરાન્તકનાશ પાહિ મામનાથમ્ ।
ભવદભયપદાબ્જવર્યમેત મમ ચિત્તસરસ્તટાન્નયાતુ ચાદ્ય ॥ ૫૦.૬૩॥

ઇત્થં વિષ્ણુશ્ચ કાશ્યાં પ્રમથપતિમગાત્પૂજ્ય
    વિશ્વેશ્વરં તં ક્ષિતિસુરવરવર્યં ચાનુશાસ્યેત્થમિષ્ટમ્ ।
સ ચ મુનિગણમધ્યે પ્રાપ્ય મુક્તિં તથાન્તે
    પ્રમથપતિપદાબ્જે લીનહીનાઙ્ગસઙ્ગઃ ॥ ૫૦.૬૪॥

સૂતઃ -
ઇત્થં શ્રુત્વા મુનીન્દ્રોઽસૌ જૈગીષવ્યોઽવદદ્વિભુમ્ ।
પ્રણિપત્ય પ્રહૃષ્ટાત્મા ષષ્ઠાંશં વૈ ષડાસ્યતઃ ॥ ૫૦.૬૫॥

જૈગીષવ્યઃ -
મારમારકજાનન્દવસતેર્મહિમા કથમ્ ।
નામ્નાં સહસ્રમેતચ્ચ વદ મે કરુણાનિધે ॥ ૫૦.૬૬॥

ક્ષેત્રાણાં ચાપ્યથાન્યાનાં મહિમાં વદ સદ્ગુરો ।
શૂરતારકસંહર્તસ્ત્વત્તો નાન્યો ગુરુર્મમ ॥ ૫૦.૬૭॥

તચ્છ્રુત્વા તુ મુનેર્વાક્યં સ્કન્દઃ પ્રાહાથ તં મુનિમ્ ।
સ્કન્દઃ -
આગામિન્યંશકેઽસ્મિંસ્તવ હૃદયમહાનન્દસિન્ધૌ
    વિધૂત્થપ્રાચુર્યપ્રકટૈઃ કરોપમમહાસપ્તમાંશે વિશેષે ।
નામ્નાં ચાપિ સહસ્રકં ભગવતઃ શમ્ભોઃ પ્રિયં કેવલં
    અસ્યાનન્દવનસ્ય ચૈવ મહિમા ત્વં વૈ શૃણુષ્વાદરાત્ ॥ ૫૦.૬૮॥

ઉગ્રોઽશઃ શશિશેખરેણ કથિતો વેદાન્તસારાત્મકઃ

ષષ્ઠઃ ષણ્મુખસત્તમાય સ દદૌ તદ્બ્રહ્મણે સોઽપ્યદાત્ ।
પુત્રાયાત્મભવાય તદ્ભવહરં શ્રુત્વા ભવેજ્જ્ઞાનવિચ્ચોક્ત્વા
જન્મશતાયુતાર્જિતમહાપાપૈર્વિમુક્તો ભવેત્ ॥ ૫૦.૬૯ ॥

શ્રુત્વાંશમેતદ્ભવતાપપાપહં શિવાસ્પદજ્ઞાનદમુત્તમં મહત્ ।
ધ્યાનેન વિજ્ઞાનદમાત્મદર્શનં દદાતિ શમ્ભોઃ પદભક્તિભાવતઃ ॥ ૫૦.૭૦ ॥

સૂતઃ -
અધ્યાયપાદાધ્યયનેઽપિ વિદ્યા બુદ્ધ્યા હૃદિ ધ્યાયતિ બન્ધમુક્ત્યૈ ।
સ્વાધ્યાયતાન્તાય શમાન્વિતાય દદ્યાદ્યદદ્યાન્ન વિભેદ્યમેતત્ ॥ ૫૦.૭૧ ॥

ઇત્થં સૂતવચોદ્યતમહાનન્દૈકમોદપ્રભા
ભાસ્વદ્ભાસ્કરસપ્રભા મુનિવરાઃ સન્તુષ્ટુવુસ્તં તદા ।
વેદોદ્યદ્વચનાશિષા પ્રહૃષિતાઃ સૂતં જયેત્યુચ્ચરન્
પ્યાહો જગ્મુરતીવ હર્ષિતહૃદા વિશ્વેશ્વરં વીક્ષિતુમ્ ॥ ૫૦.૭૨ ॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યે ષષ્ઠાંશે સુદર્શનસ્ય
મુક્તિલાભવર્ણનં અંશશ્રવણફલનિરૂપણં ચ નામ પઞ્ચાશોઽધ્યાયઃ ॥

॥ ઇતિ શ્રીશિવરહસ્યે શઙ્કરાખ્યઃ ષષ્ઠાંશઃ સમાપ્તઃ ॥

The variations/pAThabheda are placed in the parenthesis ()
next to the word it is supposed to relate to.

Words missing in the original manuscripts are indicated by dots.

Encoded by Anil Sharma anilandvijaya at gmail.com
Reproofread by Anil Sharma, Sunder Hattangadi, Ruma Dewan

*Ribhu Gita from Shiva Rahasya*
pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*